॥ श्रीरस्तु ॥

श्रीवैष्णवसंप्रदायप्रवर्तनधुरन्धराणाम् आल्वारपदवाच्यानां श्री सरोमुनि भूतमु
श्रीपरकालसूरि पर्यन्तानां दिव्यसूरीणाम्, तथा श्रीमन्नाथमुनि श्रीपुण्डरीकाक्ष
श्रीराममिश्र-भगवद्यामुनमुनीनां पूर्वाचार्याणां च दिव्यचरितविवरणपरम्

॥ दिव्यसूरिकथामृतम् ॥

२. श्रीविष्णुचित्तदिव्यसूरिप्रणीत तिरुप्पल्लाण्डुनामक-
मंगलाशासनप्रबन्धः भट्टनाथसूक्तप्रबन्धश्चेति द्वयं
सटीकम्.

श्रीकाञ्ची. जगदाचार्यसिंहासनाधीश प्रतिवादिभयङ्कर
अण्णङ्गराचार्यसंकलितम्

हिन्दीभाषानुवाद समेतम् ।

श्रीरङ्गस्थ श्रीविलासमुद्रालये संमुद्रितम् ।

मूल्यम् एकरूप्यमात्रम् ।

प्राप्तिस्थानम् :
ग्रन्थमाला आफीस कंजीवरम् ।
P. B. Annangaracharya Conjeeveram.

१९४७

॥ द्वितीयो भागोऽस्य अचिरात्प्रकाश्येत ॥

श्रीरस्तु ॥

श्रीमच्छठकोपयतिराजवरवरमुनिभ्यो नमः ॥

श्रीकाञ्ची· प्रतिवादिभयङ्कर अण्णङ्गराचार्यकृतिषु

॥ दिव्यसूरिकथामृतम् ॥

कासारयोगिशठकोपकलिद्विडादिसद्दिव्यसूरिवरवैभवमप्रमेयम् ।
पूर्वार्यवर्यविशदीकृतवर्त्मनैव गीर्वाणवाङ्मयमिदं कलयामि साधु ॥

॥ अवतारिका ॥

श्रियःपतिः परमकारुणिको भगवान्नारायण उभयविभूतिनाथ इत्युपश्लोक्यते । नित्यविभूतिर्लीलाविभूतिश्चोभयविभूतिपदाभिलप्ये । संसारमण्डलमिदं लीलाविभूतिरिति संशब्द्यते । * यद्दूरे मनसो यदेव तमसः पारे यदत्यद्भुतं यत्कालादपचेलिमं सुरपुरी यद्गच्छतो दुर्गतिः । सायुज्यस्य यदेव सूतिरथवा यद्दुर्ग्रहं मद्गिरां तद्विष्णोः परमं पदम् * इत्युपश्लोकितं श्रीवैकुण्ठनगरमेव नित्यविभूतिपदेनाभिधीयते । तस्यां त्रिपाद्विभूतौ निरवधिकानन्दनिर्भरस्सतोऽपि भगवतो लीलाविभूतिनिलयसंसारिजनस्थितिस्मरणनिबन्धनं दुःखमप्येकतोऽवतिष्ठते । * विचित्रा देहसंपत्तिरीश्वराय निवेदितुम् । पूर्वमेव कृता ब्रह्मन् हस्तपादादिसंयुता * इत्याद्युक्तप्रकारेण स्वचरणनलिनयुगलसम्प्रश्रयणमूलकसमुज्जीवनौपयिकतया करणकलेवरप्रदाने कृतेऽपि हन्त ! त इमे संसारिणो मनागप्यनवदधाना अपथप्रवृत्तिभिरेव पुनः पुनर्भवजलधावधोऽधो निमज्जन्त उत्तीर्णा उत्तितीर्षवो वा नैव भवन्तीति दुःखी भवति भगवानानन्दमयोऽपि सन् ।

यद्यपि निरङ्कुशस्वतन्त्रोऽयं सर्वेश्वरः सर्वानपि संसारिणो बलात्कारेणैव स्वयमाकृष्य स्वपादारविन्दपरिसरं प्रापयितुं प्रभोभवीति, तथाऽपि न तत्र कोऽपि रसः । स्वप्रदत्तैः करणकलेवरस्वातन्त्र्यशक्त्यादिभिः ते ते ध्यानार्चनप्रणामस्तवनादिसत्कर्मततीरनुष्ठाय स्वपादारविन्दमूलं प्राप्नुवन्तु—इति तावद्भगवतस्सङ्कल्पः । तस्य साधु निष्पत्तये च स भूयांसि शास्त्राण्यवातीतरत् । तेषां च वैफल्यं पश्यन् स्वयमेव साक्षान्नानायोनिषु समवातरत् । तदाऽपि * अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् * इति वदता दुःखातिरेकप्रकाशकेनैव बभूवे भगवता । एवं नाम बहुष्वप्युपायेषु विफलेषु जातेषु स्वकीयमनोरथस्य फलेग्रहिताविरहेण दूयमानमानसो भगवानन्तत एवं व्यचिन्तयत्—यथा लोके सजातीयैरेव मृगैर्मृगा गृह्यन्ते, तथा सजातीयैरेव संसारिभिस्संसारिण एते विनेतव्याः परिग्राह्याश्चेति । सदुपायोऽयमिति चावधारयन् तथैव कर्तुं प्रायतत प्रारेभे च सत्यकामस्सत्यसङ्कल्पो भगवान् । श्रीसरोयोगिभूतयोगिपराङ्कुशपरकालप्रभृतीन् 'आल्वार' नाम्ना 'दिव्यसूरि' नाम्ना च प्रथितान् परमभक्तान् नानास्थलेषु नानावर्णे-

दिव्यसूरिकथामृतम् ।

प्रवर्तय्य तेषां च मुखतो वेदाविर्भावरूपान् द्राविडभाषामयान् दिव्यप्रबन्धांश्च प्रकाश्य स्वसमीहितसंसिद्धिं क्रमश-संपद्यमानां समीक्षमाणस्संमोदतेस्म सर्वस्वामी ।

तेषां च दिव्यसूरीणामनुक्रमणिका सैषा— १. सरोयोगी २. भूतयोगी ३. महदाह्वययोगी ४. भक्तिसारयोगी ५. श्रीशठकोपयोगीन्द्रः ६. कुलशेखरयोगी ७. भट्टनाथापरनामधेयो विष्णुचित्तयोगी ८. भक्तांघ्रिरेणुयोगी ९. मुनिवाहनापरनामधेयः श्रीपाणयोगी १०. परकालापरनामधेयः कलिध्वंसियोगी इति । श्रीशठकोपमुनीन्द्रपादपद्माश्रितं तदेकदैवतं श्रीमधुरकविम् , श्रीविष्णुचित्तमुनीन्द्रदुहितरं गोदादेवीं च संकलय्य द्वादश दिव्यसूरय इत्यपि प्रथा जागर्ति । यतस्तयोरुभयोरपि दिव्यप्रबन्धा द्राविडाम्नायव्यपदेशभाजनचतुस्सहस्रीनिविष्टाः ।

एतेषां दिव्यसूरीणामवतारदेशकालचरित्रादिवर्णनपरः प्रबन्धो गुरुपरम्पराप्रभावनामा द्राविडभाषामयस्सुप्रसिद्धः । संस्कृतभाषायां च दिव्यसूरिचरितं प्रपन्नामृतमिति छन्दोबद्धं काव्यद्वितयं प्रथितम् । तासु च कृतिषु गुरुपरम्पराप्रभावनामानं द्राविडग्रन्थमेवानुसृत्य सरलगद्यात्मकोऽयं स्वादुः प्रबन्धस्सन्तन्यते दासदासेन संस्कृतभाषारसिकसज्जनोपकारसंविधित्सुना ॥ इत्यवतारिका ॥

॥ अथ वैभववर्णनोपक्रमः ॥

१. २. ३. सरोभूतमहदाह्वयसूरित्रयवैभवम् ।

तुलामासि शुभे श्रोणाप्रभृत्यृक्षत्रये भुवि । जातानामाद्यसूरीणां प्रभावः परिकीर्त्यते ॥

सरोयोगी भूतयोगी महदाह्वययोगीत्येते त्रयस्सूरिवरा भगवद्विषयीकारतःप्रभृति अपृथक्सिद्धा एव व्यराजन्त । एषां त्रयाणां समुदितानामेव * मुदलाल्वार्हल् * [आद्यसूरयः] इति चिरन्तनी प्रथा । वैभवं चैतेषां समुदायरूपेणैव समवगम्यते । एते द्वापरयुगान्तेऽवतीर्णा अयोनिजा इति प्रसिद्धिः ॥

तुण्डीरमण्डले सत्यव्रतक्षेत्रे काञ्चीमहानगर्यां वेगवत्यास्सरितो दक्षिणे भागे श्रीयथोक्तकारिभगवन्मन्दिरमिति प्रसिद्धमुपेयुषि वेगासेतुक्षेत्रे उदीच्यभागविराजमाने दिव्यसरसि विकसिताब्जलजकुसुमात्तुलामासि श्रोणायामवततार, प्रथमो मुनिः । अत एव सरोयोगीत्येव नाम्ना प्रासिद्ध्यतिस्म ।

तस्मिन्नेव तुण्डीरमण्डले प्राच्यसागरतीरवर्तिन्यां श्रीमल्लापुर्यां पुष्पवाटिकायां मागधीकुसुमात् तुलायामेव मासि श्रविष्ठोडुनि द्वितीयस्सूरिरवातरत् । सोऽयं भूतयोगीति नाम्ना व्यपदिदिशे । "भू-सत्तायां" इति धातोः क्तप्रत्ययान्ततया निष्पन्नोऽयं शब्दः लब्धसत्ताक इत्यर्थकः । * असन्नेव स भवति, असद्ब्रह्मेति वेद चेत् , अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुः * इति तैत्तिरीयोपनिषदाम्नातरीत्या भगवत्स्वरूपगुणविभूत्यनुभवभून्नैव लब्धसत्ताकोऽयमित्यतो भूतयोगिनामधेयमन्वर्थम् ॥

तत्रैव तुण्डीरमण्डले श्रीकैरविणीक्षेत्रदक्षिणभागस्थमहिलापुर्यां क्वचन दिव्यकूपवरे सौगन्धिककुसुमात्तस्मिन्नेव तुलामासि शतभिषङ्नक्षत्रेऽवततार तृतीयस्सूरिः । सोऽयं द्राविडभाषायां 'पेयाल्वार्' इति नाम्ना प्रथते । उन्मत्त-

सूरिरिति यावत् । भगवद्गुणविद्धोऽयमुन्मत्त इवावतस्थ इति हेतुना तादृशं नाम लम्भित इति वदन्ति । श्रीपराशरभट्टार्यप्रणीते सुप्रसिद्धे * भूतंसरश्चेत्यादिश्लोके महदाह्वयनाम्ना सोऽयमकीर्त्यत । श्रीभक्तिसारमुनीन्द्रविनयनादिप्रयुक्तो महिमा महानासीदस्येति ॥

अत्यन्तकालविप्रकर्षादेतेषां वैभवमतिसंक्षिप्तमेवावगम्यते । तथा हि । श्रीरामभरतसौमित्रिवत् क्रमशस्त्रिषु दिवसेष्ववतीर्णानामयोनिजानां चामीषामाद्यसूरीणां श्रीवैकुण्ठनाथनियोगतस्सूत्रवतीसखो विष्वक्सेनस्समागत्य पञ्चभिस्संस्कारैः पावनतामकार्षीत् । शुद्धसात्त्विका एते ज्ञानभक्तिविरक्तिविहारगृहायिता भगवद्गुणानुभवैकधारकपोषकभोग्या अन्नपानादिनिस्स्पृहास्सन्तः प्राकृतजनसहवासकातराः सदैव देशाटनपरायणाः परस्परसन्निकर्षविधुराश्च प्रत्येकशस्समचरन् । एवंविधानेतांस्त्रीनपि दिव्यपुरुषानेकत्र संमेल्य स्वीकृत्य च कैङ्कर्यम्, एषां मुखतो जगदुज्जीवयितुमकामयत परमः पुमान् ॥

सत्यकामस्सत्यसङ्कल्पश्च भगवान् किं नु व्यभिचरितव्यवसायो भविता ? तन्मनोरथफलेग्रहितायै समयविशेषः कोऽपि संजघटे । वर्षासु कस्मिंश्चन दिने अस्तं गते भास्करे सरोमुनिवरो देहलीक्षेत्रनामकं त्रिविक्रमभगवत्सन्निधानसमलंकृतं गोपालपुरमभ्येत्य [तिरुक्कोवलूरु] तत्र मृकण्डोर्महर्षेराश्रममासाद्य देहलीमधिशिश्ये । तदनु भूतयोगी तत्रागत्य संमिलतिस्म । * वैष्णवो वैष्णवं दृष्ट्वा दण्डवत्प्रणमेद्भुवि * इति शास्त्रसरणिमनुसृत्य परस्परं वन्दनप्रतिवन्दनाद्युपचारप्रवृत्त्यनन्तरं " स्थलेऽस्मिन् एकः पुमान् शयितुमलम्; द्वौ पुमांसावुपवेष्टुमलम् " इति व्यजिज्ञपत्सरोमुनिः । अथ द्वावपि निषेदतुः । अनन्तरक्षणे महदाह्वययोगी च तत्रोपाययौ । मिथ उपचारेषु संपन्नेषु " स्थलेऽस्मिन्नेकेन पुंसा शयितुं प्रभूयेत; द्वाभ्यामुपवेष्टुम्; त्रिभिस्तावदवस्थातुम् " इति सरोभूतयोगिनौ समगिरेताम् । तथैव त्रयोऽपि तत्र शयनोपवेशनेे विना स्थितवन्तो भगवद्गुणानुवादबद्धादरास्सानन्दमवर्तन्त ॥

इमामेव समयघटनामन्वीक्षमाणस्त्रिविक्रमो भगवान् अमीष्वद्भुततममनुग्रहं प्रचिकाशयिषुः गाढान्धकारं घनघनवृष्टिं च समुदपादयत् । स्वयं चातिमहता वपुषा तेषां त्रयाणां मध्यतः प्रविश्य सुदुस्सहमनिर्वचनीयं संमर्दमजीजनत् । 'आः को हेतुरचिन्तितोपनतस्यास्य दुर्विषहस्य संमर्दस्य; किमन्यः कोऽपि प्राविशदत्र ! प्रवेशोपायश्च न कोऽप्युन्नेयो भवति । प्रकाशविरहेण प्रेक्षितुमपि न शक्यते ! किमेतत् ? कथमेतत् ?' इति विह्वला अभूवन् । अस्यामवस्थायां भगवान् स्वयमेव स्वकीयया निर्हेतुकया परमकृपया स्वात्मानं प्रकाश्य दिव्यमङ्गलविग्रहं श्रीमहालक्ष्मीं दिव्यभूषणानि दिव्यायुधानि च संप्रदर्श्य त्रीनपि परमानन्दपारावारनिमग्नानकरोत् ॥

अथ ते त्रयोऽपि स्वस्वानुभवपरीवाहरूपतया प्रत्येकशः शतगाथापरिमितान् त्रीन् दिव्यप्रबन्धानाविष्कृत्य संसारिणोऽस्मादृशान् समुज्जीवयामासुः । ततःप्रभृत्यमी परस्परं क्षणमात्रविश्लेषमप्यसहमाना नित्यसंश्लिष्टा दिव्यदेशाद्यनुभवरसिकास्सन्तो योगबलेन सुचिरमिमां लीलाविभूतिमलञ्चक्रुः ॥

इत्थं कासारादिममुनिवरवैभवमतीव हृद्यमिह । अनुसन्दधतां हि सतां श्रेयांसि भवन्ति सपदि भूयांसि ॥

इति आद्यमुनित्रयवैभवं समाप्तम् ॥

---

४. अथ श्रीभक्तिसारमुनीन्द्रवैभवम् ॥

(तिरुमलिशैयाल्वार ।)

मकरे मासि मघर्क्षे भूसारक्षेत्रकलितजननस्य । श्रीभक्तिसारनाम्नो योगीन्द्रस्य प्रभावमभिदध्मः ॥

पुरा कदाचिदत्रिवसिष्ठभृगुभार्गवपुलस्त्यङ्गिरःप्रभृतयो ब्रह्मर्षयो बहवस्सत्यलोकमधिगत्य तत्र वैभवातिशयेन विराजमानं विरिञ्चं भगवन्तं प्रणिपत्य बद्धाञ्जलिपुटास्सन्त एवं व्यजिज्ञपन्—भगो ! भूलोके श्लाघ्यतमे क्वचन क्षेत्रविशेषे तपश्चर्यामनुतिष्ठासवो वयं तादृशं किमपि क्षेत्रं भवतस्सकाशादवगन्तुकामा इदानीमिह समुपस्थितास्स्मः ; कृपया ब्रवीतु तत्रभवान् तादृशं क्षेत्रमवधार्येति । विज्ञापितश्चैवं विधाता भगवान् दयमानमनास्सन् देवशिल्पिनं विश्वकर्माणमाकार्य समादिशदित्थम् , पश्यतामेतेषां मुनिवराणां पुरतो दिव्यतुलादण्डिकां विन्यस्य तस्या एकस्मिन् फलके पञ्चाशत्कोटियोजनायतं कृत्स्नमपि भूमण्डलं निधाय अथापरस्मिन् फलके **तिरुमलिशै** नामकं पुण्यक्षेत्रमेकमेव निक्षिप्य समुद्धर तुलाम्—इति । अवतंसितकमलासनशासनो विश्वकर्मा तथैव चक्रे । धृतकृत्स्न-भूमण्डलकं फलकं लाघवादूर्ध्वस्थितम् , तिरुमलिशैक्षेत्रमात्रधारकं फलकमतिमात्रगौरवादवनतं च ददृशाते ।

अथ ब्रह्मदेवो ब्रह्मर्षीणां तेषामुत्कर्षमिममुद्बोध्य, तदेव क्षेत्रं महीसारव्यपदेशभाजनमिति चोपपाद्य, तत्र गत्वा तपश्चरतेति प्रस्थापयामास तान् । ततः प्रस्थितास्ते महर्षयो महीमुपागत्य दक्षिणस्यां दिशि तुण्डीरमण्डले श्रीभूतपुरीकैरविणीक्षेत्रमध्यविद्योतमानं तदेव क्षेत्रमासाद्य जितेन्द्रियत्वादिनियमसनाथा अद्भुतं तपस्तेपिरे । तेषु च भार्गवनामा मुनिप्रवरो दीर्घसत्रनाम्नाऽनुष्ठितेन महाध्वरेण वासुदेवमाराध्य तदनु तमेव भगवन्तमुद्दिश्य घोरं तपस्तप्तु-मुपाक्रंस्त । तादृशतपःप्रत्यूहसंपिपादयिषया निर्जराः प्राहिण्वन्नूर्वशीतिलोत्तमारम्भामेनकादीनप्सरोगणान् । ताश्च सुर-सुन्दर्य इह समुपागत्य तपस्विनोऽस्य तपोनिष्ठां शिथिलयितुमुच्चावचान् प्रयत्नानाकलय्यापि हन्त वितथमनोरथाः प्रत्याववृतिरे, यदसौ भगवत्पादारविन्दयुगलैकनिषण्णनिभृतान्तरङ्ग आसीत् । ह्रिया भिया चाभिभूतासु तासु ललनासु यथागतं प्रतिनिवृत्तासु कनकाङ्गीनाम्नी काचिदपरा स्वर्वनिता निरतिशयवैदग्ध्यनिधिभूता सदृढप्रतिज्ञमुपागता मुनिवरं समया, विष्णुमायेव विश्वव्यामोहनविचक्षणविपुलशक्तियुक्ता मन्मथवसन्तमृगाङ्कमलयपवनाद्यनेकसहायवर्गसमन्विता सरलसरससङ्गीतनर्तनादिप्रवर्तनपरा प्रायतत बहुमुखम् ।

बलवद्धि विधेर्बलम् । तत एव स तापसप्रवरो भगवद्ध्यानादपाकृष्य निजमन्तरङ्गं कनकाङ्ग्यास्सङ्गीतसौवादवे समासज्ज्य विष्फारितविलोचनस्तस्या अनुपमां सुषमामवलोक्य स्मरपरवशो योगं विसृज्य भोगप्रसक्तो विस्मृत्य स्वात्मानं कियन्तंचन कालमयापयन्मोहवागुराविवशः ।

कालेन च सा कनकाङ्गी समभूदन्तर्वत्नी । अथ मकरमासि मघानक्षत्रे गर्भपिण्डप्रादुर्भावस्समजनि । भगवतो हेतिराजस्यावेशश्च तत्र संजघटे । अलक्षितावयवसंनिवेशं पिण्डाकृतिमात्रं तदुपेक्षमाणा सा मदिराक्षी संनिहिते क्वचन वेत्रगुल्मे समुत्सृज्य सिद्धसमीहिता स्वर्ययौ । क्रमेण च प्रकृतिं गतः पश्चात्तापपरवशहृदयश्च भार्गवो मुनि-वरोऽपसृत्यान्यत्र पुनरपि तपश्चर्यापरो बभूव । आस्तां नाम तत् ।

४. अथ श्रीभक्तिसारमुनीन्द्रवैभवम् ।

वेत्रगुल्मे विधूतेन च पिण्डेन परमसुन्दरपुरुषशिशुरूपेण परिणेमे क्रमशः । परिणतश्चायं दिव्यः शिशुः क्षुत्पिपासाभिभूतो विजने वने तत्र विलपन्नवर्तत । तस्मिन्नेव क्षेत्रे कृतसन्निधानो जगन्नाथो भगवान् सह श्रिया समेत्य निजेक्षणसुधासिन्धुवीचिविक्षेपशीकरैः कारुण्यमारुतानीतैः शीतलैः शिशुमभिषिच्य स्वकीयदिव्यमङ्गलविग्रहसन्दर्शनसन्दानेन व्यपगतक्षुत्पिपासं च विरचय्य तिरोहितोऽभूत् ।

अथ भगवद्विश्लेषजविषादेन दुस्सहेनाभिभूतो दिव्यशिशुः पुनरपि रोदितुमुपचक्रमे ।

तदात्वे तत्र वेत्रलवनार्थमुपागतः कोपि श्रीनिधिर्नाम वेत्रजीवी शिशोर्विलपननिनदमाकर्ण्य सविधमभ्येत्य सर्वाङ्गसुन्दरमप्राकृतमिव विराजमानम् अवनावुदितमिव भास्करं भासमानं तमेनं शिशुमभिवीक्ष्य सन्तोषविस्मयसमाविष्टान्तरङ्गः परमकारुणिकेन भगवता प्रदत्त इवायमस्माकं कुमार इति निश्चिन्वानो हर्षप्रकर्षप्रफुल्लेन पाणिकमलेन तं परिगृह्य नीत्वा निजं भवनं पङ्कजवल्लीनाम्न्यै गृहिण्यै प्रादात् अनपत्ययोरावयोरहेतुकभगवत्प्रसादपरिपाकोऽयमिति किमपि किमपि कथयन् । सा च तं सादरं सप्रेमभरं स्वीकृत्य संवर्धयन्ती श्रीकृष्णकिशोरविषयकप्रेम्णा यशोदाया इव स्वस्या अपि दैवात्स्रुतं स्तन्यं पाययितुं प्रावर्तिष्ट । स तु दिव्यशिशुः * वासुदेवस्सर्वमिति द्रढीयसाऽध्यवसायेन परिपूतात्मा स्तन्यमन्यच्चान्नपानादिकं तृणाय मन्वानो भगवद्गुणानुभवैकधारकः सांसारिकजनस्वभाववैदेशिको रोदनाक्रन्दनभाषणादिलोकव्यापाररहितो मलमूत्रादिविसर्जनविवर्जितश्च सन् अप्रतिमनिजदिव्यविग्रहतेजःपुञ्जनिर्धूततमश्छटो ववृधे ।

एवं नाम वर्धमानस्य भगवदनुभवामृतास्वादनैकजीवातोरस्य दिव्यमहापुरुषस्य विलक्षणं वैभवं विश्वतः पप्रथे । शृण्वन्तः पश्यन्तश्च विश्वे जना विस्मयसागरगाढावगाढमनसो बभूवुः । आकर्णितैतादृशाप्रतिमप्रभावस्तद्देशवासी कोऽपि चतुर्थवर्णजो जरठो मुनिमिमं संसेव्य धन्यो बुभूषुः परमपवित्रं गोः क्षीरमुपायनमुपनयन् निजधर्मपत्न्या सह प्रभाते समुपस्थितः अपरस्येव भौमस्य भास्करस्यास्य तेजःपुञ्जमसमाधिकमालोक्य विस्मयस्तिमितः स्वानीतं दुग्धभाजनं पुरतः समर्प्य परमकृपया पय इदं पेयं श्रीमतेति सप्रणयविनयं प्रार्थयामास । प्रार्थितश्च तथा भक्तिक्रीतोऽयं मुनिः प्रसन्नहृदयः पिबतिस्म तत् । अनपत्यतादुःखदूरीकरणकामिनौ तौ दम्पती अनुदिनमेवमन्वतिष्ठताम् । मुनिश्च तयोर्भावबन्धगरिमानुरक्तः पयस्तत्पिबन्नवर्तत । एकस्मिंस्तु दिने पीतशेषं पयः प्रददौ ताभ्यां दम्पतिभ्याम् । तौ च तन्निपीय सद्यो विमुक्तजरौ समृद्धयौवनौ समिन्धानसुषमौ समभूताम् ।

अथ गते च कियतिचन काले परमभक्तिनिधिस्सा ललनाऽन्तर्वत्नी सती पुत्ररत्नं प्रासूत । कणिकृष्णनाम्ना च स पुत्रः प्रथतेस्म । क्रमशोऽभिवृद्धमिमं कुमारं कदाचिन्मुनेरस्य सन्निधिं प्रापयामास जनकः । स चास्य शुभकटाक्षवीक्षणेन सम्पन्नदिव्यविमलविज्ञानः समधीतानेकसद्ग्रन्थश्च सन् भगवद्भागवतभक्तिसम्पत्समुज्ज्वलोऽभिववृधे ।

भार्गवसूनुर्मुनिवर एवं सप्तहायनावधि वेत्रजीविकुटुम्बे तिष्ठन्नथ अष्टाङ्गयोगेन भगवन्तमाराधयितुमासादयितुं च कामयमानः प्रस्थाय ततो नानादेशपर्यटनोत्सुको व्रजतिस्म । सर्वाभ्यधिकं परं वस्तु च विमृश्य निर्धारयितुमैहत । अत एव च लोकायतबौद्धादिष्ववैदिकेषु बाह्येषु समयेषु वैदिकेषु च कुदृष्टिमतेषु प्रविश्य तत्तन्मतसर्वस्वभूतनानानिबन्धनिध्याननिरतश्च सन् तदातदा तत्तन्मतानुरूपनामवहन-कृत्याचरणादियुक्तो भूयसीश्च कृतीर्निर्मिमाणः क्रमेण बहूनि

मतान्यतीत्य शैवमतमवजगाहे । प्रणिन्ये च शिवपरान् कानपि निबन्धान् । अवर्तिष्ट च परमशिवध्यानतत्परः । एवं गच्छति काले सरोभूतमहदाह्वयप्राथमिकमुनित्रये तार्तीयीको मुनिवरो महदाह्वयोऽत्र समागत्य विज्ञाय चास्य वृत्तान्तं, तमिमं सुशिक्षितं श्रीवैष्णवसंप्रदायप्रवर्तनधुरन्धरतया स्वीकर्तुमिच्छन्, यत्रायं भार्गवसूनुर्मुनिर्वसति तत्रै-वाग्रत आश्रममुपकल्प्य तत्र फलपुष्पद्रुमसंपिपादयिषुरिव कांश्चन क्षुपान् अधोमुखान्निखाय सरन्ध्रान् घटान् प्रशिथिलां च दामानं परिगृह्य सलिलसेकसमुद्यत आसीत् । हन्त बत कोऽयं समुद्यमः! पामरैरपि परिहास्या खलु सेयं प्रवृत्तिः । क्षुपाणामधोमुखं निखननम् अथ सरन्ध्रघटग्रहणम् अथ च प्रशिथिलदामोपादानमिति सर्वमपहास्यं किल । एतादृशं चास्य कृत्यमवेक्षमाणो भार्गवात्मजमुनिरात्मन्यपहसन् तत्सविधं च समेत्य 'किं भो भवान् मत्तः किमुन्मत्तः' इत्याह । प्रत्याह च सः, नाहं मत्तो न चोन्मत्तः; भवानेव सत्यं तादृश इति । प्रचलिते च किञ्चिदिव मिथो वाग्विवादे प्रत्यपादयत महदाह्वयो मुनिः "द्राघीयसा कालेन बहुषु मतेषु प्रविश्यापि परं तत्त्वमिदमिति परमार्थतोऽवधारयितुमशक्नुवन्नवसीदंश्च भवानेव हि मत्त उन्मत्तश्च; अखिलहेयप्रत्यनीककल्याणैकताने श्रीमन्नारायणे विराजमाने तमनाश्रित्य भिक्षौ सुराजम्भवमभिमन्यमानं भवन्तमृते नान्यं कमपि मत्तमुन्मत्तं वा पश्याम इति । प्रसङ्गात्प्रववृधे चोभयोः शैववैष्णववादकेलिः । पराजितश्च भार्गवमुनिः हा हन्त वृथैव सुमहान् कालो व्यतीत इति भृशमनुशयानस्सपदि विसृज्य शैवलक्ष्माणि तत्त्वोपदेष्टुस्तस्यैव महदाह्वयमुनेः पादारविन्दयुगलं प्रणिपत्य लब्ध्वा च वैष्णवदीक्षां निर्मलान्तःकरणो विपुलविष्णुभक्तिसंपदाढ्यस्समुल्ललास । समुज्जीव्य चैवमेनं महदाह्वयो मुनिर्दिव्यदेशसेवाहेवाकी व्रजतिस्मान्यतः । भार्गवमुनिश्च महीसारक्षेत्रमेवाधिगत्य योगनिष्णातो जगदेककन्दं मुकुन्दं निध्यायन्नवर्तत ।

तदात्वे च कदाचिदुमापतिरुक्षाणमारुह्य व्योमवर्त्मना गच्छन्नास्त । उमा तु भूमौ चक्षुषी विक्षिपन्ती महा-मुनेरस्य तेजसि विस्मिता प्राणनाथ! कोऽयमन्यादृशमहिमा महानिति प्रेयांसमनुयुयुजे । शिवश्च प्रत्यभाषत सोऽयं मद्भक्तिमपहाय नारायणभक्तिमूरीकृतवान् कश्चिदिति । नाथ! महतेऽस्मै आवामपि दर्शनं दत्त्वा वरमभीष्टमनुगृह्य गच्छेवेति गौरी समगिरत । ओमित्यभ्युपगम्य संनिदधे पार्वतीपतिः । मुनिस्तु तं समीक्ष्यापि अदर्शनमभिनयन् काममपि कन्थां तन्तुना सीव्यन् आन्यपर्यं प्राचीकशत् । उपेक्षामिमां प्रजानन् शङ्करः 'महात्मन्! त्वामनुग्रहीतु-मागते मयि अनादरप्रकाशनं किं नु सांप्रतम्' इति पप्रच्छ । योगिवरः प्रत्याह—भो यतो नास्ति भवता साधनीयं किमपि मम, तत एवास्म्युदासीन इति । अथापि गङ्गाधरो निरबध्नात् 'योगिवरेण्य! वितथं माभून्मामकमिहागम-नम्; अभीष्टं वरमपेक्ष्य लभस्व' इति । मुनिराह—यदि शक्नोषि वैकुण्ठमनुगृहाणेति । रुद्रः प्रत्याह—नाहं तत्प्रदानप्रभविष्णुः; नारायण एव तत्प्रदाता प्रसिद्धः । याचस्व वरमन्यमिति । अथ स्मयमानो मुनिरुवाच— तादृशीं मुक्तिं प्राप्तुमत्र भुवि सुचिरं योगमनुष्ठातुमायुर्मम द्राघिष्ठं विधेहीति । कैलासपतिः प्रत्यब्रूत—कर्मानुरोधिन आयुषो वर्धनं क्षपणं च न मय्यायतते; अन्यदपेक्षस्व इति । तदनु योगीन्द्रो मन्दस्मिताञ्चितमुखो नम्रशिराश्च सन् 'अयं तन्तुरिमां सूचीमनुसरत्विति वरं प्रदेही' ति गर्हारूपमिव जगाद । तन्निशम्य ललाटनयनो हरो भृशं प्रकुपितः 'अतिमात्रमवलिप्तमिममधुनैव कुर्यामनङ्गसधर्माणम्' इत्यभिदधानो निजनिटिलादग्निमयं नयनमुदजी-घटत् । ततस्समुत्थितां धूम्यां स्फुलिङ्गवितर्तिं च विलोकयन् भार्गवमुनिर्मनागप्यविह्वलो धैर्यसीम्नि तिष्ठन् निजदक्षिण-

४. अथ श्रीभक्तिसारमुनीन्द्रवैभवम् ।

चरणाङ्गुष्ठस्थितमक्षि समुद्धाटयामास । ततस्समुत्थितो महाग्निः कालाग्निमप्यधिक्षिपन्निव विसृत्वरो रौद्रमग्निमभिभूय प्रजज्वाल । तदा हरस्तमेनमनलमुपशमयितुकामः स्वकीयकपर्दस्थितान् भूयसः पर्जन्यान् प्राचूचुदत् । ते च संवर्तसमयजीमूतनिर्विशेषं घोरवृष्टिमुदपादयन् । ततोऽप्यचकितोऽप्रचलितश्च मुनिवरो भगवद्भक्तावेव गाढावगाढ आसीत् । अवलोक्य तादृशीं स्थितिमम्बिकापतिरतिविसयविवशमानसो '**भक्तिसार**' इति संज्ञामस्य प्रख्यापयन् विशेषतोऽभिनन्द्य चास्य वैभवं प्रययौ स्वमावसथम् ।

अथ भक्तिसारो मुनिवरो यथापूर्वमवजगाहे योगम् । तदात्वे शुक्तिहारनामा कोऽपि सिद्धः स्वसामर्थ्यभूम्ना शार्दूलमेकमपहतावलेपमाकलय्य वाहनीकुर्वन् व्योमवर्त्मना पर्यटन्नास्त । स च व्याघ्रो भक्तिसारमुनेरस्य योगमहिम्ना प्रतिरुद्धगतिरतिक्रम्य गन्तुमशक्नुवन् स्थगितगतिरवतस्थे । किमत्र कारणमिति परामृशन् स सिद्धः पृथिवीतले परितश्च निरीक्ष्य योगिप्रवरमेनं निशाम्य वाहनादवतीर्य सन्निधानमस्य समुपेत्य शक्तिमदसीयां शोधयितुकामः "भगवन् मुनिसार्वभौम ! स्वधृतामिमां कन्थामुत्सृज्य स्वीकरोतु भवानिदं मया प्रदीयमानं पीताम्बर" मिति प्रकथयन् प्रशस्ततरं कौशेयं सपदि सृष्ट्वा प्रदिशतिस्म । मुनिस्तु तद्वसनं तिरस्कृत्य स्वसङ्कल्पमात्रेण माणिक्यमयं दिव्यं वासो निर्माय प्रादर्शयत् । सहस्रादित्यवर्चसस्तस्य वाससो विलोकनेन व्रीडितस्सिद्धः स्वकीयकण्ठावलम्बिनीं कांचन मणिमालामुद्धृत्य भगवन् ! जपमालामिमां स्वीकुरुतादिति प्रदातुमाययौ । तदा भक्तिसार आत्मीयकण्ठावलम्बिनीं तुलसीनलिनाक्षमालामुद्धृत्य प्रादर्शयत् । सा तु सिद्धेन ददृशे निस्समाभ्यधिकनवरत्नमालिका । अथ चातिमात्रमपत्रपितस्स मुनिवरं मुहुः प्रदक्षिणीकृत्य प्रणिपत्याभिष्टूय सिद्धसार्वभौमस्त्वमभवानिति प्रशस्य पथाऽन्येन प्रययौ ।

भक्तिसारस्य प्रभावभूमा दिक्षु विदिक्षु च विशेषतः पप्रथे । कोङ्कणसिद्धो नाम कोऽपि रसवादी ससंभ्रमं तत्रागत्य रसगुलिकामेकां प्रदर्श्य तत्प्रभावमप्रमेयमुपवर्ण्य गृहाण तावदिमामित्यवोचत् । भक्तिसारस्तु तामवधीर्य स्वदिव्यमङ्गलविग्रहरजांस्युपादाय गुलिकीकृत्य 'अपरिमितसुवर्णप्रसवित्रीमिमां गुलिकां प्रतिगृह्य जीवतु भवान्' इत्यभिधाय तां तस्मै प्रायच्छत् । स च तां परिशोध्य सूनृतवादितां मुनिवरस्य विज्ञाय विस्मितः प्रणम्य निश्चक्राम ।

अथ भक्तिसारोऽन्यत्र कुत्रचिद्गत्वा कस्यचन गिरेर्गह्वरे निषद्य योगनिरत एवासीत् । दिव्यदेशयात्रावशात्तत्र समुपागताः सरोभूतमहदाह्वया आद्यास्त्रयो योगिवरा अन्तस्स्थितस्यापि भक्तिसारस्य बलीयसा दिव्यतेजसा समाकृष्टा अन्तः प्रविश्य कुशलानुयोगमारचय्य तत्रैव कियन्तंचन कालं भगवद्गुणानुभवसक्तचित्ता आसत । तत्र चतुर्णामेतेषां समवायो ज्ञानभक्तिविरक्तिशान्तियोग इव सुशोभनस्संददृशे । अतीते चैवं कियतिचन काले चत्वारोऽपि (महदाह्वययोगिजन्मभूमिं) महिलापुरीमुपगम्य तत्र कैरवतीर्थतीरे चिरं योगप्रवणा अवर्तन्त । अथ आद्यास्त्रयो योगिनो भूमिसञ्चरणाय प्रातिष्ठन्त ।

अथ भक्तिसारो मुनिवरो महीसारक्षेत्रमात्मीयमागत्य निवसंस्तत्र नित्यश ऊर्ध्वपुण्ड्रधारणौपयिकीं श्वेतमृत्तिकां संप्रतिपन्ने स्थाने अलभमानो व्यामुग्ध इवावतस्थे । अथ श्रीवेङ्कटाद्रिनिलयः कमलाकामुकः परः पुमान् स्वप्नेऽस्य दत्तसंदर्शनः 'काञ्च्यां श्रीवेगासेतुभगवन्मन्दिरपार्श्ववर्तिनि सरोवरे लभस्व श्वेतमृत्स्नाम्' इत्यनुजग्राह ।

अनुगृहीतश्चैवं भक्तिसारो हर्षप्रकर्षफुल्लान्तरङ्गः प्रस्थाय काञ्चीक्षेत्रमनुप्राप्य तस्यामेव सरस्यां श्वेतमृदमुपलभ्य तत्रैव वेगासेतोर्भगवतो मन्दिरे कलितावासस्तमेव भगवन्तं नित्यमासेवमानस्सुचिरं तत्र निवसतिस्म ।

पूर्वमदसीयेनैव प्रसादेन समुत्पन्नः कणिकृष्णस्तदात्वे तत्र समुपागतः स्वाचार्यस्य भक्तिसारमुनेर्विविधाः परिचर्या विरचयन् उपादानेन देहयात्रां निर्वहन्नवर्तत । तदानीं पलितचिकुरा पतितदशना च काचन जरठा भक्तिसारपादारविन्दपरिसरं प्रतिपन्ना परमभक्तियुक्ता सती संमार्जनगोमयानुलेपनरङ्गवल्लीविन्यसनादिकैङ्कर्यप्रवणाऽऽसीत् । सा च कदाचित्प्रभाते मुनिवरस्य पादाब्जे प्रणिपत्य अविकलं यौवनं वरलाभं लब्ध्वा स्वर्वनितेव स्पृहणीयसौन्दर्यसारनिधिरुल्ललास । तन्नगराधिनाथः पल्लवराजः कदाचिदेनामवलोक्य कामयमानः सुबहून्यनर्घाणि वसनभूषणानि वितीर्य विवाह्य तां प्रधानमहिषीपदे निधाय नन्दतिस्म ।

गच्छति चैवं काले, तस्या निरपायं नित्यनिरवद्यं यौवनं स्वस्य च क्रमशो जायमानां जरातुरतां च वीक्ष्य दूयमानमनाः प्रभुः किमत्र कारणमिति जिज्ञासया तामेव पप्रच्छ कथं नु भवती नित्यानपाययौवना विराजत इति । सा चाब्रवीद्भक्तिसारमुनेर्वरप्रसादत इति । अथ स्वयमपि तादृशवरप्रसादं प्रेप्सन् परिबृढस्तदर्थं तामेवानुनयतिस्म । सा च समगिरत—अनुदिनमुपादानार्थमास्माकं भवनमागच्छन् कणिकृष्णनामा भिक्षुकस्तस्यैव मुनेः प्रेयाननुचरः ; तमेव घटकं वृत्वा मुनिवरमनुवर्तसे यदि समीहितं सिध्येदिति । सदुपायोऽयमिति संमन्यमानस्सम्राट् परेद्यवि यथायथं कणिकृष्णमागतं प्रणिपत्य सविनयमूचे 'भवदीयमाचार्यं सेवितुमिच्छाम्यहम्, अतस्तमत्र समानयतु तत्रभवान्' इति । प्रतिबभाषे कणिकृष्णः 'तृणीकृतविरिञ्चादिनिरङ्कुशविभूतिरस्मदाचार्यः स्वाश्रमादन्यत्र कुत्रापि नोपगन्ता' इति । ततो राजा ययाचे 'भगवन्! मामेवाचार्यसकाशमुपगमय्य नित्ययौवनवरप्रसादलम्भनेनानुगृहाण' इति । कणिकृष्णः कथयतिस्म 'त्वादृशानैहिकभोगमात्रकामुकान् पामरानस्मदाचार्यश्चक्षुषाऽपि नेक्षितुं क्षमः ; तद्विजहीहि वितथकामनाम्' इति ।

तन्निशम्य व्यथाविक्लवो नरपतिरतिमात्रचिन्तार्णवनिमग्नमना इतिकर्तव्यतामुग्धोऽवतस्थे । तथाविधमेनं समाश्वासयितुकामास्सचिवास्समुपेत्य 'सार्वभौम! विमुञ्च वृथा विचारम्; कणिकृष्णोऽपि दिव्याचिन्त्यमहाद्भुतोत्तमशक्तियुक्त इति प्रथते ; अमृतवागेष कविवरो यथा यथा कवयति तथा तथा संपद्यन्ते सुबहून्यद्भुतानीति विश्वप्रसिद्धमिदम् ; अतश्चामुमेव साक्षादभ्यर्थयस्व ; तेनोपश्लोकितस्त्वं सिद्धकामनो भविताऽसि' इति । अथ कथञ्चिदधिगताश्वासो भूपतिरपरेद्युरागतं कणिकृष्णं सप्रश्रयमयाचत स्वात्मानमनपाययौवनमुपश्लोकयितुम् । नारायणैकस्तोताऽहं नरस्तोता न कदाऽपि भवेयमिति प्रत्याचचक्षे कणिकृष्णः । अथापि सम्राडतीव निर्बबन्ध । निर्बन्धोऽयं महान् द्राविड्या गिरा भगवद्विषयिणीं नरस्तुतिविरक्तिसूचिनीं च कामपि गाथां कवयामास कथयामास च । ततश्च प्रकुपितः प्रभुः 'नेतः परं त्वमस्मिन्नगरे निवस्तुमर्हसि ; क्षिप्रमन्यतो निष्क्रामतात्' इति शास्तिस्म ।

तदनु कणिकृष्ण आचार्यपादपादारविन्दपरिसरं प्रतिपद्य प्रवृत्तमुदन्तं विज्ञाप्य देशादस्मान्निष्क्रमिष्यन्तमिमं जनमभ्यनुजानन्तु गुरुचरणा इति प्रार्थयत । 'तर्हि त्वामृते किमत्राहं करिष्यामि; अहमपि भगवत्सनाथस्त्वामेवानुसरेयम्' इति निगद्य, भक्तिक्रीतं भक्तवत्सलं भगवन्तमुत्थापयितुमन्तर्गत्वा,

४. अथ श्रीभक्तिसारमुनीन्द्रवैभवम् ।

'कणिकृष्ण इमां नगरीं विजहत् कुहचिद्गमनं ननु कामयते ।
तमनुव्रजतो मम भो भगवन् फणितल्पयुतोऽनुचरो भवतात् ॥''

इति [द्राविडगाथया] व्यजिज्ञपद्भक्तिसारो महामुनिः । यथोक्तकारीति व्यपदेशं प्रेप्सुस्स भक्तपराधीनो भगवान् तस्मिन्नेव क्षणे स्वकं फणिपुङ्गवतल्पं समुत्थाप्य विहाय योगनिद्राम् अतीत्य चार्चावतारसमाधिं स्वयमपि प्रतस्थे । त्रयोऽप्यमी यदा तस्मान्नगरान्निश्चक्रमुस्तदैव तत्र मन्दिरान्तरेषु विराजमाना अपि भगवन्तः स्वं स्वं तेजोऽन्तर्हितमकार्षुः । अथ कृत्स्नाऽपि काञ्चीपुरी विलीनप्रभा विवृद्धतमश्छटा विवस्वतोऽपि प्रभामनुद्वहन्ती कालरात्रिकल्पाऽभवत् । ईदृश्या दुरवस्थाया निदानं विजानन् महीपतिरतीव विह्वलस्सहामात्यस्सद्यः प्रस्थाय प्रयासतः कणिकृष्णाद्यवस्थितिस्थलमभ्येत्य स्वापराधं क्षन्तुमर्थयतेस्म । अथ प्रसन्नचेताः कणिकृष्णो भक्तिसारमुनेस्सविधे व्यजिज्ञपत्प्रतिनिवृत्तिरुचितेति । मुनिवरश्च तथेत्युररीकृत्य, भगवन्तं स्वानुचरं प्रणम्य,

"कणिकृष्ण इतो विरतो गमनात् पुनरेव पुरीं प्रतियाति हरे ।
तमनुव्रजतैव मया सहितः पुनरेत्य पुरीमधिशेष्व सुखम् ॥''

इति [द्राविडगाथया] प्रार्थयत । सर्वथा भक्तविधेयो भगवानथ यथास्थानमुपागतः फणिनमधिशिश्ये, भक्तवरौ च यथायथमाजग्मतुः । राजसचिवादयश्च प्रहृष्टचेतसो बभूवुः । ततः प्रभृति स वेगासेतुभगवान् यथोक्तकारीति व्यपदिदिशे, यतो हि भक्तपरवशो यथोक्तमकुरुत । काञ्ची च हततमस्काण्डा प्रचकाशे । विज्ञातभक्तप्रभावो राजा च मदान्धतां विहाय मुनिशिष्यतां प्रतिपेदे ।

अथ मुनिवरेण्यः श्रीकुम्भघोणक्षेत्रमधिजिगमिषुः प्रस्थितो व्रजन् पथि महाव्याघ्रपुरीति प्रसिद्धेऽग्रहारे कस्यचन द्विजन्मनो गृहद्वारवितर्दिकायां विश्राम्यन्निव निषसाद । भस्मच्छन्नस्येव जातवेदसोऽस्य मुनेः प्रभावमजानानास्तत्रत्या वेदाध्ययननिरता विप्राः 'जघन्यजातीयोऽयं वेदवाक्यश्रवणानर्ह' इति मन्वाना विरेमुर्वेदपाठात् । तेषामभिसन्धिमवगच्छन्मुनिवरस्ततस्समुत्थायान्यतः प्रययौ । अथ यथाक्रमं पुनराम्नायमध्येतुमारिप्सवस्ते कतमं वाक्यमारम्भणीयमिति भृशं विचिन्तनेनाप्यप्रतिपद्यमाना श्रमविह्वला इव जोषमासत । हा हन्त किमत्र कारणमिति मिथो विचारयन्तस्ते 'अत्रागते परमभागवते या विप्रतिपत्तिरुदैदस्माकं सैव महापचारः, तत्फलमेवैतत्' इत्यवधारयन्तस्ततस्तं मुनिवरमनुवर्तमानाः क्षान्तिमार्थयन्त । स च तत्र वीथ्यां शोषणाय प्रकीर्णेषु कृष्णव्रीहिकदम्बकेषु कतिचन व्रीहीरुद्धृत्य नखतो निर्भिद्य चिक्षेप । सद्य एव ते श्रोत्रियास्तादृशक्रियार्थकं वेदवाक्यं स्मरन्तस्तदेव स्वेषामध्ययने प्रारम्भणीयमिति च प्रतिपन्नाः * कृष्णानां व्रीहीणां नखनिर्भिन्नं कृष्णा कूटा दक्षिणेत्यादिवाक्यमुपाक्रंसत । [तदिदं वाक्यं तैत्तिरीययजुस्संहितायां प्रथमकाण्डे अष्टमे प्रपाठके, तैत्तिरीययजुर्ब्राह्मणे प्रथमाष्टकसप्तमप्रपाठके च श्रूयते ।] अथ ते श्रोत्रिया अप्रतिमप्रभावोऽयमृषिसार्वभौम इति निश्चिन्वानाः प्रदक्षिणप्रणामादिभिस्तमिमं सत्कृत्य कृतकृत्या अभूवन् ।

तत्रैवाग्रहारे अन्ये केचिदग्रजन्मानो महान्तः कमपि यज्ञमनुतिष्ठन्त आसन् । भक्तिसारमुनेरप्रतिमप्रभावमवगतवन्तः कतिपये महनीयास्तमिमं यज्ञस्थलीं प्रापय्य बहुमानयितुं दीक्षिताय सूचनामदुः । सोऽपि सद्यस्संतो-

समुपसृत्य सविनयं प्रार्थ्य भक्तिसारमध्वरशालामुपगमय्य सादरभरमग्रिमपूजामकार्षीत् । पुरा धर्मसूनुनाऽनुष्ठिते राजसूयाध्वरे सत्कृतं नन्दनन्दनं भगवन्तमधिकृत्य परुषपरुषरूक्षाक्षराणि प्रयुक्तवतः शिशुपालस्य सोदरा अत्रापि केचिदासन्निव ; तत्तादृशा असूयवस्सपदि सुबहूनि कर्णकठोराणि परुषभाषितानि प्रायुञ्जत । तन्निशमनेन क्षुभित-हृदयो दीक्षितो भक्तिसारपादपद्ममूले प्रणिपतन् प्रार्थयतेस्म । भगवन्निमान् पापिनो ध्वस्तावलेपानाकलयतु क्षिप्रं तत्र-भवानिति । ओमित्यङ्गीकृतवान् परमकारुणिको भक्तिसारयोगीन्द्रः—

असूयावशानाममीषां च दर्पं समूलं निहन्तुं हरे चक्रपाणे ।
यथा वर्तसे मे मनोन्तस्तथैव प्रकाशीभव क्षिप्रमाश्चर्यशक्ते ॥

इति [द्राविडगाथया] स्वान्तर्यामिणं सर्वस्वामिनमच्युतमभ्यर्थयतेस्म । अर्थिकल्पक आपत्सखो भगवान् भोगिभोगशय-नीयशायिनमात्मीयमतिमानुषमप्रमेयं दिव्यमङ्गलविग्रहं पद्माधात्रीकरकमलपरिचरितचरणयुगलं महामुनेरस्य दिव्ये वपुषि सर्वसाक्षात्कारयोग्यमाविश्चकार तूर्णमव्याजकृपया । सर्वेऽपि साधु संसेव्य मन्देतरमोदभरभरितमानसा विस्मयविवशाश्च मुनिवरस्य पादारविन्दयोः प्रणिपतन्तः क्षमां प्रार्थ्य तदीयनिरवग्रहानुग्रहभाजनभूतास्तत्त्वोपदेशं च लब्ध्वोदजीवन् ।

अथ योगीन्द्रः श्रीकुम्भघोणक्षेत्रमधिगत्य तत्र फणिनमधिशयानं परमं पूरुषमासेवमानः काञ्च्यां यथोक्त-कारिभगवत इवात्रापि शार्ङ्गपाणेरपर्याप्तामृतभगवतो भक्तवात्सल्यभूमानमन्वभवत् । तथा हि—

त्रिविक्रमावतारकालसंभवश्रमान्नु किं महावराहमूर्तिभावकालिकश्रमान्नु किम् ।
मरुद्वृधातटेऽत्र दिव्यकुम्भघोणपत्तने शयान एव वर्तसे ? समुत्थितोऽद्य संलप ॥

इति [द्राविडगाथया] प्रार्थयमाने भक्तिसारे, अर्चावतारमपि विभवावतारपर्यायमाकलयन्निव सोऽयमपर्याप्तामृत-भगवान् यथाप्रार्थनं सद्यस्समुत्थातुमैहत ; तदवलोक्य मुनिसार्वभौमो "जयतु जयत्विदमाश्रितसौलभ्यमत्रभवत" इति मङ्गलाशासनेन भगवन्तं शयनोन्मुखमेव व्यदधात् । अत एव स भगवानद्यापि सर्वैरुत्थानशायी संसेव्यते ।

तमेवापर्याप्तामृतदिव्यमङ्गलविग्रहमनुध्यायन् तत्रैव चिरं योगे मनो युञ्जान आस्त मुनिप्रवरः । एवं सप्त-शताधिकचतुस्सहस्रसंवत्सरावधि भूतले तस्थिवानेष भक्तिसारो योगिवरो भक्तसमुज्जीवनकामनया "नान्मुकन्तिरु-वन्दादि, तिरुच्चन्दविरुत्तम्" इत्याम्नातं दिव्यप्रबन्धद्वितयं च द्राविडभाषयाऽनुगृह्य तत्रैव क्षेत्रे दिव्यं धाम प्रपेदे ॥

इति भक्तिसारमुनिवर्यसत्कथाम् अतिमात्रभक्तिभरवर्धनक्षमाम् ।
इह ये पठन्ति कथयन्ति भावयन्त्यथ ते भजन्ति दिवि योग्यसत्क्रियाः ॥

इति दिव्यसूरिकथामृते श्रीभक्तिसारमुनिवैभवं समाप्तम् ॥

५. अथ श्रीशठकोपमुनीन्द्रवैभवम् ॥

वृषे मासि विशाखर्क्षेऽवतीर्णस्य महात्मनः । शठारातिमुनीन्द्रस्य वैभवं प्रतिपाद्यते ॥

पाण्ड्यमण्डले गङ्गायमुनासरस्वतीप्रभृतिसकलसरिदपेक्षयाऽपि समुत्तुङ्गवैभवशालिन्यास्ताम्रपर्णीसरितस्तटे कुरुकापुरी नाम विलसति महानगरी । तत्र च वंशपरम्परया श्रीमन्नारायणैकसमाराधनसंसक्तचेतस्कपरमभागवतमहाकुले कारिनामा महनीयो महाभागवतस्समुत्पन्नो व्यराजत । केरलमण्डलीये तिरुवण्परिशारमिति नाम्ना सुप्रसिद्धे दिव्यदेशे उडैयनङ्गैयाख्यनाम्नीं सहधर्मचरीमुपयेमे स महान् । तत्रैव कियन्तञ्चन कालमतिपात्य अथ सह च दयितया कुरुकापुरीमधिगत्य यथाविधि गृहस्थाश्रमधर्मनिर्वर्तनधुरन्धरो विरेजे । सोऽयं सह दयितया कदाचित्तिरुक्कुरुङ्गुडिनामकं दिव्यदेशमुपेत्य तत्र भगवतः प्रार्थितार्थपरिदानदीक्षितत्वभूमानमवगत्य तस्य सन्निधाने सप्रश्रयं प्रार्थयतेस्म स्वस्य पुत्रसन्तत्यनुग्रहम् । प्रार्थितश्च भगवान् परमकृपापेशलहृदयस्सुप्रसन्नवदनस्सन् “अहमेव समागत्य युवयोस्तनयात्मना । प्रादुर्भवेयमचिराद्विषादो वां विलीयताम् ॥” इत्यर्चकमुखेनानुगृह्य तीर्थमालादि च प्रासादयत् । एवमनवधिकातिशयमप्रमेयमनुग्रहमासादयन् कारिमहात्मा यथापुरं कुरुकापुरमुपेत्य निवसन् कालक्रमेण पत्नीमन्तर्वत्नीमद्राक्षीत् । सा च समये प्रासूत दिव्यं शिशुं वृषभमासि विशाखोडुनि शुभे । दिव्यशिशोरस्य प्रभावातिशयस्सर्वथा वाचां दवीयान् । अयं साक्षाद्भगवत एवावतारभूतो वा ! नित्यमुक्तेष्वन्यतमस्य, तेषां बहूनां मिलितानां वाऽवतारभूतो वा ! विलक्षणभगवत्कृपाभूम्ना निस्समाभ्यधिकं वैभवं प्रापितस्संसारिष्वन्यतम एव वा ! इत्येवं बहुधा शङ्कितुं योग्योऽयं व्यलसदप्रमेयप्रभावभासुरः । निर्दिष्टपूर्वतिरुक्कुरुङ्गुडिदिव्यदेशाधिपतिभगवत्सूक्त्यनुरोधेन स एव भगवानेवमवततारेति ग्रहीतुं योग्यम् ॥

यत्र भगवानवतरितुमिच्छति, तत्र पुरस्तादेव * निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिश्शरीरभेदैर्विविधवरिवस्याविरचनविशारद आदिशेषः स्वयमुपसर्पतीति खलु संप्रदायः । अत एव सोऽयं फणिपुङ्गवो भगवदवतारभूतस्यास्य दिव्यशिशोर्वर्षातपादिवारणमुखेन परिरक्षणाय दिव्यतिन्त्रिणीवृक्षात्मना प्रागेवावतीर्ण आसीत्तत्रैव ॥

आप्रसवात् रोदनस्तन्यपानादिलौकिकव्यापारगन्धविरहेण विराजमानस्य म्लानिलेशविधुरस्य चास्य शिशोरतिशयं प्रेक्षमाणौ मातरपितरौ विस्मयप्रकर्षविवशान्तरङ्गौ सर्वथा भगवति न्यस्तभरौ निर्विचारौ द्वादशे वासरे श्रीनगरीदिव्यदेशाधीशस्य भगवत आदिनाथस्य सन्निधानं प्रापय्य शिशुं तद्दर्शनधन्यमाधाय सन्निहितस्य दिव्यतिन्त्रिणीतरोर्मूले सौवर्णडोलिकातलिममधिशाय्य समभ्यवर्धयताम् ॥

गर्भवासावसरे ज्ञानशालिनोऽपि शिशून् जननसमनन्तरक्षण एव स्वस्पर्शेन अज्ञानभागिनः कृत्वा रोदनक्रन्दनादिलौकिकव्यापारपरवशान् कर्तुं प्रभविष्णुः शठो नाम वायुः एनमपि दिव्यशिशुं जननकाले स्वयमभिभवितुमयतत ; तदात्वे तमसौ हुंकारेण प्रसह्य निरस्यतिस्मेति हेतुना शठकोप इति नाम्ना पप्रथे । शठरिपुः, शठारिः, शठारातिरित्यादीन्यपि नामानि तत्पर्यायभूतानि प्रथन्ते ॥

तिन्त्रिणीमूलधामा मुनिवरोऽसौ आषोडशाब्दवयसो नयनोन्मीलनविरहित एव सन् मौनावलम्बी विश्वतो विसृत्व-

रविलक्षणतेजःपुञ्जोऽवर्तत । पितरौ तु 'किमेतत्? कथमेवमभूत्?' इति विमृशन्तौ, आवयोः प्रामादिकेन केनापि भगवदपचरितेन किमेवं समभूदिति चिन्ताविह्वलौ विषण्णावास्ताम् । तदा परमपदनाथस्य शासनेन विष्वक्सेनोऽत्र रहसि समागत्य मुनिवरं पञ्चभिस्संस्कारैस्संस्कृत्य सकलार्थांश्चोपदिश्य प्रययौ ॥

षोडशकलापरिपूर्णचन्द्रवत् परिपूर्णषोडशहायनोऽसौ मुनिसार्वभौमस्तिन्त्रिणीतरुच्छायायां पद्मासनोपविष्टः परतत्त्वैकनिध्यानतत्परो ज्ञानमुद्राञ्चितपाणिपद्मः प्रचकाशे ॥

तदात्वे मधुरकविर्नाम महीसुरोत्तमो महान् क्षेत्रतीर्थयात्राकुतूहलेन पर्यटन्नुत्तरभारते, शठकोपमुनेरस्य प्रभावमाकर्ण्य दिव्यतेजःप्रसरमभिवीक्ष्य च श्रीमदयोध्यानगरीतस्सजवमुपगम्य तमिममासेवत । अस्य चैतन्यमस्ति न वेति शोधयितुमिच्छन् स एष मधुरकविः कञ्चिदश्मखण्डं चिक्षेप समया मुनिवरम् । तन्निनदनिशमनेन चक्षुषी समुदमीलयच्छठारातिः । अथ च व्यवहारशक्तिरस्य विद्यते न वेति विज्ञातुकामस्स कमप्यनुयोगमाततान । सद्यः प्रत्युत्तरं च लेभे समञ्जसम् । अथ मधुरकविर्महानन्दसागरसंमग्नस्वान्तः सर्वज्ञममुं मुनिवरमेवाश्रित्य कृतार्थो भूयासमित्यभिनिवेशमुद्वहन् साष्टाङ्गं तस्य पादारविन्दे प्रणिपत्य भृशमभिष्टूय बद्धाञ्जलिपुटः प्रार्थयतेस्म 'भगवन् मुनिसार्वभौम! तत्त्वहितपुरुषार्थेषु वैशद्यमुत्पादयतु कृपया दासस्यास्य तत्रभवान्' इति । स च करुणया स्वीचकारैनमन्तरङ्गकिङ्करम् ॥

अथ कदाचित् श्रीवैकुण्ठनाथो भगवान् सह च श्रीभूमिनीलाभिर्विहगाधिराजमधिरुह्य समागत्य मुनेरस्य ज्ञानसाक्षात्कारगोचरो भूत्वा सर्वज्ञतां द्रढयतिस्म । एवमन्ये च सर्वे दिव्यदेशाधीशा भगवन्तः श्रीरङ्गनाथ श्रीवेङ्कटाद्रिनाथ श्रीहस्तिगिरिनाथादयः स्वयमुपगम्य दिव्यदर्शनं प्रदाय स्वस्वदिव्यगुणगणाननवभावयन् । तदनु तादृशानुभवपरीवाहरूपतया दिव्यसूक्तीर्बहिराविर्भावयितुमावश्यकता समजनि तत्त्वविदग्रेसरस्यास्य । ऋग्यजुस्सामाथर्वणाख्यवेदचतुष्टयपर्यायभूताश्चत्वारो दिव्यप्रबन्धा द्राविडब्रह्मसंहितासमाख्याः १. तिरुविरुत्तम् २. तिरुवाशिरियम् ३. पेरियतिरुवन्दादि ४. तिरुवाय्मोलि नामभिः प्रथिताः क्रमेणावतरितुमारभन्त । मधुरकविरेव पार्श्वे निषण्णस्सन् परमया भक्त्या प्रबन्धानिमान् दिव्यतालपत्रारूढानकार्षीत् ॥

एतेषु चतुर्षु दिव्यप्रबन्धेषु चरमस्य सामवेदसारभूतस्य सहस्रगीतिसमाख्याविख्यातस्य प्रबन्धरत्नस्य सततगानमेव मधुरकवेर्नित्यकालक्षेपपर्याप्तमासीत् । श्रीमन्नाथमुनि श्रीयामुनमुनि श्रीरामानुजमुनि श्रीवत्साङ्कमिश्रभट्टपादप्रभृतयो वेदवेदान्तवेदाङ्गसागरपारदृश्वानो विद्वन्मणयो महान्तोऽपि तयैव द्रमिडोपनिषदा तत्त्वहितपुरुषार्थेषु विमलं विशदं विपुलं विज्ञानमुपलभ्य स्वयमाचार्यपदवीं निरवहन् ॥

दिव्यवकुलमालाभूषणभूषितत्वेन हेतुना मुनिवरोऽयं वकुलाभरणो वकुलभूषण इत्यपि नाम बिभर्तिस्म । परमतस्वरूपमत्तमातङ्गानामसावङ्कुशात्मा विरराजेति हेतुना पराङ्कुश इत्यप्यप्रथत । "शठरिपुरेक एव कमलापतिदिव्यकविः" रित्युक्तरीत्या भगवद्भक्तेष्वयमेव मुनिराडग्रगण्योऽभूदिति आचन्द्रार्कं विश्वतः प्रसिद्धये भगवतः पादुका सर्वेष्वपि देवालयेष्वस्यैव नाम्ना व्यपदिश्यमाना विलसतीति यत्तदिदमेकमेव पर्याप्तं महामुनेरस्य वैभवमसमाभ्यधिकमित्यवबोधयितुम् ।

* प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः । प्राप्त्युपायं फलं प्राप्तेस्तथा प्राप्तिविरोधि च ॥ वदन्ति सकला वेदास्सेतिहासपुराणकाः । मुनयश्च महात्मानो वेदवेदान्तपारगाः ॥ * इत्युक्तरीत्या परमात्मस्वरूप—जीवात्मस्वरूप—साधनस्वरूप—साध्यस्वरूप—विरोधिस्वरूपात्मकमर्थपञ्चकमेव सकलैरपि शास्त्रप्रपञ्चैरवबोद्धव्यमिति स्थितम् । तादृगर्थपञ्चकविशदविज्ञानसंपादनसाधनभूतो दिव्यप्रबन्धोऽनेनैव मुनिपुंगवेन स्वानुभवपरोपदेशरूपेण प्रादुर्भावित इति श्रीवैष्णवानां प्रपन्नानां मुमुक्षूणां भक्तानां भागवतानां सतामास्तिकानामस्यैव दिव्यचरणौ शरणम् ॥

इत्थं शठकोपमुनेर्वैभवमतिभोग्यमप्रमेयं च । अनुसंदधतां सुधियामखिलार्थज्ञानमनुपमं भविता ॥

इति श्रीशठकोपमुनीन्द्रवैभवं समाप्तम् ॥

---

६. अथ श्रीकुलशेखरसूरिवैभवम् ॥

कुम्भे मासि पुनर्वसुनक्षत्रे भुवि कृतावतारस्य । श्रीकुलशेखरसूरेर्वैभवमतिहृद्यमभिदधाम्यधुना ॥

चेरमण्डले कुक्कुटकोडनाम्न्यां राजधान्यां साम्राज्यमधिवहन् दृढव्रतो नाम [क्षत्रियः] भूपतिश्चिरादनपत्यतादुःखदूनमानसः श्रीमन्नारायणाराधनविशेषैर्व्यपगतविषादो भविष्यसीति महात्मभिरुदीरितस्तथैव भगवन्तमच्युतमिन्दिरापतिममन्दैराराधनैराराधयन् तत्फलतया विलक्षणदिव्यतेजसं कमपि तनूजं स्वकीयप्रधानमहिषीप्रसूतमलभत तिरुवञ्चिकलनाम्नि क्षेत्रवरे । ततश्चामन्दानन्दसंदोहकन्दलितस्वान्त एष सार्वभौमः—सोऽयं दिव्यशिशुर्नः कुले कीर्तिमप्रतिमामभिवर्धयिष्यतीत्यनेकहेतुभिरध्यवस्यन् नाम्ना कुलशेखरं चक्रे स्वमपत्यम् ।

कुलशेखरोऽयं शुक्लपक्षेन्दुवन्नित्यमभिवर्धमानः काले काले चौलोपनयनादिसंस्कारसंपन्नः साङ्गोपाङ्गान् वेदानधीत्य स्वजात्युपयुक्तानि नीतिशास्त्राणि रथगजतुरगादितन्त्राणि च निस्संशयविपर्ययमभ्यस्य सर्वोत्तुङ्गां चातुरीमुपलेभे नचिरादेव । अभिवीक्ष्य च तादृशमनुपमं चातुर्यमनवधिं नन्दथुमन्तर्बिभ्राणो महाराजोऽमुमभ्यषिञ्चद्यौवराज्ये ।

अथ च दिग्विजयाय प्रस्थितश्चतुरङ्गबलान्वितः कुलशेखरभूपतिः चोलपाण्ड्यादिप्रभुवरान् विजित्य तन्मण्डलानि स्वायत्तान्याकलय्य चेरचोलपाण्ड्यप्रभुवर इत्याद्यनेकविरुदावलीभूषितः सर्वत्र प्रसृमरभूरियशाः प्रचकाशे । तदनु दृढव्रतश्च सम्राट् "वार्धके मुनिवृत्तीनाम्" इत्युक्तरीत्या तापसवृत्तिमाश्रयितुमिच्छन् आत्मजन्मानमेनं मकुटाभिषेकमहोत्सवेनाभिनन्द्य सकलभुवनभारमस्यैव मूर्ध्नि प्रतिष्ठाप्य तपोवनमशिश्रियद्यथासमुदाचारम् ।

गुणानामाकरो महान् कुलशेखरभूपतिश्च पितृपादशासनमवतंसयन् अणुमात्रमप्यप्रस्खलितनीतिवर्त्मा अपरोऽयं रामचन्द्र इत्यशेषैरभिनन्द्यमानः सुष्ठु प्रजाः परिपालयन् काले च गृहमेधी सन् अपरामिव नीलाम् इलां नाम पुत्रीं दृढव्रतं नाम पुत्रं च प्रसूय सकलविधसंपत्समुदयसमृद्धिभासुरस्संतोषसीम्नि समतिष्ठत । एवमनवधिमैहिकैश्वर्यमनुभवतोऽस्य मानसमामुष्मिके श्रेयसि समसृज्यत । ततश्च श्रुतिस्मृतीतिहासपुराणादिप्रवीणविपश्चिदपश्चिमसततसहवाससुरभिमानसो लौकिकीषु क्रियासु विरक्तिमश्नुवानो भगवतो नारायणस्य लक्ष्मीपतेर्निर्हेतुकविषयीकारपात्रभूतः स एक एव परं तत्त्वमिति द्रढीयांसमध्यवसायमनवरतमभिवर्धयन् भगवतो विभवावतारेषु रामावतारे भृशमनुरक्तः अर्चावता-

रेषु च श्रीरङ्गनाथे निष्प्रतिद्वंद्वभक्तिभासुरः श्रीरामायणपठनपाठनैकपरायणः श्रीवैष्णवाराधनसमुत्सुकतानिधिरतिपिसत्कारविश्रुतकीर्तिरसमाभ्यधिकस्समैन्य । स्वगृहाराधने भगवतो रामचन्द्रस्य राजगोपालस्य च दिव्यमङ्गलविग्रहौ परमसुन्दरौ सर्वाभरणभूषितौ समाराधयन् नित्यनैमित्तिकोत्सवांश्च तयोर्विशेषतो निर्वर्तयन् स्वामीयां भगवद्भागवतभक्तिसंपदमन्यादृशीं प्राचीकशत् ।

श्रीरामायणदिव्यार्थान् स्वयमेव बोद्धुं बोधयितुं च कुशलोऽप्यसौ कुलशेखरः प्रवचनपरायणानां मुखतस्तच्छ्रवणमेव परमभोग्यं मन्वानः पण्डितमेकं परमभागवतं प्रत्यहमात्मीयमावसथमानाय्य तन्मुखाच्छ्रीरामकथामृतमास्वादयन् कालं चिक्षेप । अतियति चैवं काले, आरण्यकाण्डप्रवचनानेहसि * चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् । एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति * (२४–२३.) इत्यादिश्लोकार्थप्रवचनं विपुलतया प्रवर्तयति पण्डिते, कथां तां कालान्तरे देशान्तरे च प्रचलितामपि तदात्वे तत्रैव प्रचलन्तीं मन्यमानो भक्तिभूमभूमिर्भूपतिः "हा हन्त ! एतादृश्यां महीयस्यां भगवत आपदि चतुरङ्गबलसमन्विता वयं किं नु तूष्णीकास्थातुमर्हामः ; भगवद्विषये किंचित्काररहितानां धिग्धिग्जीवितम् ; न वयं निन्द्यजन्मानो भवेम ; अधुनैव वयं स्वकीयसेनासमूहसनाथाः पञ्चवटीप्रान्तं गत्वा असहायस्य दाशरथेर्यथाशक्ति साहाय्यमाचर्य विजयश्रियं पश्येम " इत्युद्घृणन् सेनासन्नाहमादिशन् कोलाहलमुच्चावचं कलयन्नुदस्थात् । एवमस्थाने समुज्जृम्भमाणमिमं संभ्रममदसीयं संपश्यन् चित्रीयमाणचेतास्सदुपायविदग्रणीस्स पौराणिकश्चातुर्यभूम्ना सद्य एव * तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् । बभूव हृष्टा वैदेही भर्तारं परिषस्वजे * इति तत्रैव विजयघट्टं वाचयित्वा असहायशूरस्यानपायसाहसस्य रक्षोबलक्षपणविचक्षणस्य रामभद्रस्य विजयश्रियं विशेषत उपन्यस्य अकाण्डकोलाहलमशीशमदवनीपतेः । ततःप्रभृति स पौराणिको यत्रयत्र रामचन्द्रस्य विजयप्रथा विशेषतो वर्णिता श्रीरामायणे, तत्रैव स्वकीयमुपन्यासप्रागल्भ्यं प्रपञ्चयन्, यत्रयत्र क्लेशवार्ता प्रसक्तयस्तत्र झाटित्येन व्रजश्च सन् जागरूक एवासीत्कथाप्रवचने ।

स पौराणिकः कदाचित्कार्यान्तरवैयग्र्येण ग्रामान्तरं गच्छन् श्रीरामायणप्रवचनाय स्वमात्मजं प्रजिघाय प्रभुवरस्यान्तिकम् । स च राज्ञः प्रकृतिमनवगच्छन् तस्मिन्दिने वक्तव्यतया समुपनतां सीतापहारकथां विषादमयीं विशेषतो विस्तृण्वन्नुपन्यास्थदहह । तदाकर्णनसमक्षण एव क्षितिपतिराग्रहस्य परां काष्ठां प्राप्नुवन् परितप्यमानमानसस्सहसा समुत्थाय 'सोऽहमधुनैव झटिति गत्वा उल्लंघ्य सिन्धोस्सलिलं सलीलं अखिलजगन्मातरमसन्मातरमानीय मम पितू रामचन्द्रस्य पादयोस्समर्पयेयम्' इत्याक्रन्दन् आयुधानि च विश्राणस्सेनाश्च सन्नाहयन् लङ्काभिमुखं प्रयातुं प्रतस्थे । प्रयाणवेगं च तं प्रेक्षमाणाः क्षितिजुषो दिविषदश्च आः ! कीदृगत्र पर्यवसानं भविष्यतीति पर्याकुला अवर्तन्त । पार्थिवस्तु पद्भ्यामेव तरेयं पयोनिधिमपीति समुद्घुष्यन् अवतीर्य चार्णवे कण्ठदघ्ने पयसि यावदगमत्तावदेवैतदीयभक्तिभरभाजनं रामचन्द्रो भगवान् प्रवृत्तिमस्य प्रतिरोद्धुमुपायान्तरमप्रतिपद्यमानः स्वयमेव सीतां पाणिना गृह्णन् सह च सौमित्रिणा पुरतस्समागत्य दिव्यदिव्यं दर्शनं दिशन् स्वकीयविक्रमातिशयं रक्षोगणक्षपणवैदग्ध्यं वैदेहीसमानयनं च समुद्घृणन् 'आगच्छ महाप्रभो ! गच्छेम पुरीम्' इति तं सपरिवारं प्रत्यावर्तयन् प्रापयंश्च पुरीमन्तर्हितोऽभूत् । तदिदमासीत्प्रभोस्संसारसागरसमुत्तारणसंसूचनमिव । एवमेवमवनीपतेरस्य भगवत्कथास्वभिनिवेश उच्चावचो वाचामभूमिरवर्तत ।

पौराणिकानामेव मुखात् श्रीरङ्गक्षेत्रमाहात्म्यमप्रमेयमाकर्णयन्नसौ चक्रवर्ती * कदाऽहं कावेरीतटपरिसरे रङ्गनगरे शयानं भोगीन्द्रे शतमखमणिश्यामलरुचिम् । उपासीनः क्रोशन् मधुमथन नारायण हरे मुरारे गोविन्देत्यनिशमपनेष्यामि दिवसान् * इत्युक्तप्रक्रियया स्वकीयामाशामतिमात्रं वर्धयन् परिजनपरिच्छदपरिवृतः प्रस्थातुं च समैहत । अमात्यास्तु 'यद्यसौ श्रीरङ्गक्षेत्रमधिगच्छेत्तर्हि तत्रैव नित्यनिवासं कामयेत; पुनरत्रागमनं मनसाऽपि न ध्यायेत्' इति प्रतियन्तः प्रतिरोधोपायचिन्तापरास्सन्तः कांश्चन परमभागवतान् श्रीवैष्णवानातिथ्याय समुपस्थितान् कृत्वा पुरतोऽवस्थापयामासुः । "षष्टिवर्षसहस्रान्तं विष्णोराराधनात्फलम् । सकृद्वैष्णवपूजायाः फलेन न समं भवेत्' इत्यमुं शास्त्रार्थमतिदृढमवधारयतोऽस्य धरणीपतेस्तदा श्रीवैष्णवाराधनकुतूहलातिशयसमृद्ध्या श्रीरङ्गयात्राकौतुकमपाहीयत । भूयसी च प्रवृत्तिर्भागवताराधने विजजृम्भे । एवं नाम यदा श्रीरङ्गयात्रोद्यमोऽस्य भवति तदा तदा सचिवैरेतादृश एव सदुपायस्संविधीयमान आसीत् । अतश्च श्रीवैष्णवाराधनप्रवृत्तिरेव नित्यशो वर्धमाना रङ्गयात्राप्रवृत्तिस्तु वाङ्मात्रेण वर्तमाना चासीत् । अत एवायमुपश्लोक्यतेऽद्यापि * घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने । तमहं शिरसा वन्दे राजानं कुलशेखरम् * इति ।

यदसौ भूमिपतिर्भागवताराधनप्रेमभूमानमनुपधिमनवधिमाविरकार्षीत्तदभिववृधे तत्र सर्वतो भागवतसमाजः । राजगृहे सर्वत्राप्यविशङ्कमसंकोचं च गतागतजुष आसन्ननेके भागवताः । तेषु च प्रीतिः प्रभोः पप्रथे वचसो वैदेशिकः । स्थित्यामस्यामतिमात्रमसूयामबिभरुरमात्याः । अचिन्तयंश्च कथमपि भूभृतो भागवतेष्वमीषु विद्वेषं जुगुप्सां वा मंक्षु जनयेमेति ।

श्रीरामनवमीमहोत्सवस्संनिदधे । तदर्थमपरिमितान्यलङ्करणानि सर्वतस्संपद्यन्ते । राजभवने रामचन्द्रमूर्तेरन्येषां च दिव्यमङ्गलविग्रहाणां दिव्याभिषेकनिर्वर्तनार्थं विग्रहतो दिव्याभरणान्युद्वासितान्यभूवन् । विपुलवेदघोषवाद्यघोषसनाथं सुमहता समारोहेण समपादयन्नभिषेकमाराधकमहाभागाः । तदात्वे सर्वेषु च राजाधिराजप्रभृतिषु भगवत्सेवासमासक्तचित्तेषु सत्सु, भूषणबृन्देष्वन्यतमामनर्घां नवरत्नमालाममात्या अपहृत्य न्यगूहन् । अथ च भगवन्मूर्तीनां भूषणालङ्कारे प्राप्ते तां दिव्यभूषामनवेक्षमाणा आराधका अतिमात्रभयविषादविह्वला विनिवेदयन्तिस्म धरणीपतेः पुरः । सम्राट् च सचिवान् समाहूय भूषणमलिम्लुचो भवद्भिरविलम्बेन विमृश्यानेतव्य इति शास्तिस्म । अचकथन्नमात्यास्तदा 'महाप्रभो भगो ! श्रीवैष्णवा भागवता इति च सततमितस्ततः स्वैरमटन्तो मिथ्याभक्ता अमी एव मुषितभगवद्भूषणा भवितुमर्हन्ति; नेतरेषामेतावती धृष्टता कदाऽपि भवेन्नाम; तानन्तरेण नान्यत्र गता दिव्यभूषेति सत्यं शपामहे; त एव प्रसभमवस्कन्दनीयाः; तथा सति द्रुतमेव लभ्येत दिव्यभूषणं तत्' इति । एवं कथनेन राज्ञो भागवतेषु वैमनस्यमुत्पादयितुमेव किल सचिवैर्भूषणमपजह्रे ।

अतिसाहसिकैर्जाल्मैरमात्यैरभिहितमिदं कर्णारुन्तुदं वचो विनिशम्य विश्वंभराधिपतिः हा हन्त हन्त बत कष्टं कष्टमिति सद्यः कर्णौ पिधाय हरिभक्तसाधुजनं सद्गुणशीलादिसम्यगवबोधसौरभोल्लासिमनस्कतया पारमार्थिकभक्तेषु तेषु मनागपि मनोविकृतिमनुद्वहन् मृषाभाषिषु मन्त्रिष्वेव महत्तरममर्षोद्वेगमावहन् "वैष्णवशिखामणयो न कदाऽपि मनसाऽपि पातकमीदृशं कलयेयुः, सत्यं सत्यमिदम्; तदेतदनवद्यं प्रमापयितुमद्भुतं च किमपि कर्म

करवाणि पश्यत " इति संगिरमाणस्सपदि कुम्भमेकमन्तर्निहितदन्दशूकमानाय्य तदेव वाक्यं पुनरुच्चारयन् प्रासारयत्पाणिं कुम्भस्य कुक्षौ । पुनः पुनरवादीच्चैवं 'त्रिकरणशुद्धा एते श्रीवैष्णवा यदि भगवद्भूषां मुषितवन्तस्स्युः तर्हि दशतु कामं दन्दशूको मम शयम्; प्राणैश्च मां वियोजयतु सद्य' इति । सत्यवद्धस्सर्पः कथं नु दशेत्? परं प्राचीकशत्प्रभुवरस्य सूनृतवादितां भागवतानां चाप्रमेयं प्रभावम् ।

तदात्वे सचिवाः स्वकीयामसमीक्ष्यकारितामनुशयाना अतीव चकिताश्च महाप्रभोः पादपद्मयोः प्रणिपत्य साञ्जलिबन्धं सविनयं स्वकीयं दौरात्म्यमभ्युपगच्छन्तः क्षमां च प्रार्थयमाना उद्गीर्णबाष्पाम्बुनयनाञ्चला अतिष्ठन् । क्षमाधनो महाप्रभुश्च "मनसा वाचा कर्मणा च नेतःपरं भागवतेषु द्रोहं वोढुमर्हथ यूयम्; सर्वथा सर्वविधपरिचर्यास्तदीयपादपद्मेषु प्रयुज्य समुज्जीवत; तत्पादसलिलपानमेव परमं प्रायश्चित्तमिदानींतनस्य पातकस्य" इत्यभिधाय पाययित्वा च तत्पादतीर्थं तानपि समुदजीवयत् ।

अथ च महीपतिरनेकावद्यभाजनराज्यशासनधुरं वोढुमनिच्छन् निजमात्मजमभिषिच्य राज्ये, इलां नाम दुहितरं च श्रीरङ्गनाथभगवदेकपरिणयकामिनीं तथैव निर्वृत्तमनोरथां विरचय्य, स्वयं च भगवद्भागवताराधननिरतस्तत्रैव श्रीरङ्गधाम्नि कतिचन हायनान् यापयामास । अथान्यत्र च श्रीवेङ्कटाद्रिश्रीमदयोध्यादिदिव्यदेशेषु पर्यट्य तत्र तत्र भगवतो मङ्गलमाशास्य स्वानुभवपरीवाहरूपतया "पेरुमाळ् तिरुमोऴि" इति प्रथमानां द्राविडाम्नायमयीं कृतिं च भवभयभेषजात्मिकामनुगृह्य सप्तषष्टितमे वयसि दिव्यं धाम जगाहे ।

स एष दिव्यसूरिः स्वकीये दिव्यप्रबन्धे श्रीवेङ्कटाद्रिविषयके दशके "श्रीमद्वेङ्कटशैलनाथ! भवतो दिव्यालयप्राङ्गणे सोपानत्वमुपेत्य सोऽहमनिशं पश्यानि वक्त्रं तव" इति स्वकीयामाशंसामाविरकार्षीदिति हेतुना अद्यापि सर्वेष्वपि दिव्यदेशेषु मुखमण्टपस्थं पृथु सोपानं कुलशेखरसोपाननाम्ना संप्रदायरसिकैर्व्यपदिश्यत इति वेदितव्यम् ॥

इत्थं श्रीकुलशेखरसूरिवरस्य प्रभावमतिहृद्यम् । ये ध्यायन्ति वदन्ति प्रलिखन्ति त एव धन्यजन्मानः ॥

इति श्री कुलशेखरसूरिवैभवं समाप्तम् ॥

---

७. अथ भट्टनाथ (श्रीविष्णुचित्त) सूरिवैभवम् ॥

मिथुने मासि स्वात्यां भुव्यवतीर्णस्य भट्टनाथस्य । सूरेर्वैभवमतुलं संप्रति विज्ञापयामि सारतरम् ॥

पाण्ड्यमण्डले श्रीधन्विनव्यक्षेत्रे [श्रीविल्लिपुत्तूरु.] वैदिकविप्रवरेण्यसंततौ मिथुनमासि स्वातीनक्षत्रे शुभे कोऽपि महापुरुषः प्रादुरभूद्वटपत्रशायिभगवत्कटाक्षविशेषेण, यः खलु विष्णुचित्तनाम्ना प्रसिद्धिमुपाययौ । यथा तु तुलसी निसर्गत एव विलक्षणसौरभसंभृता चकास्ति, तथा सोऽयमपि महान् स्वभावत एव भगवद्भक्तिभूमभूषितस्तत्कैङ्कर्यैकसक्तचित्तो ववृधे ।

एवमेष वर्धमानो मान्यमहोदयः कीदृशेन कैङ्कर्येण कृतेन भगवान् प्रसीदेदिति मनसि पर्यालोचयन्नवर्तत ।

तस्मिन् क्षेत्रे कश्चन प्राज्ञः पौराणिकः श्रीविष्णुपुराणप्रवचनेन भूयसस्सज्जनानावर्जयन् विरराज । तदीयगोष्ठ्यामयमपि महान् कदाचिदन्वितस्सन् भगवत्कथाश्रवणकुतूहली निषीदतिस्म । तदात्वे तु स पौराणिकः * प्रसादपरमौ नाथौ मम गेहमुपागतौ । धन्योऽहमर्चयिष्यामीत्याह माल्योपजीवनः * इत्येतत्पद्यरत्नं व्याचक्षाणः कंसजिघांसया मधुरां पुरीं समाजग्मुषो नन्दसूनोः मालाकारभवनं स्वयमभ्येत्य कुसुममालिकां याचमानस्य कथां कर्णामृतमयीं कथयामास । तदाकर्णनजहर्षप्रकर्षप्रफुल्लचित्तो विष्णुचित्तो नित्यं भगवतः पुष्पमालासमर्पणमेव तत्प्रसादनिदानं महत्तरं कैङ्कर्यमिति दृढमध्यवस्यन् मनोहरमुद्यानवनमुपकल्प्य तस्मिंश्च नानाविधानि सुरभिकुसुमानि संवर्ध्य तत्क्षेत्राधिपतये वटपत्रशायिभगवते नित्यमर्पयन्नाननन्द । नक्तंदिवमपि तदुद्यानपोषणमेवास्य नित्यकर्म समभूत् । एवमेवासौ ब्रह्मानन्दमयं सकलमपि समयं गमयन्नास्ते ।

पाण्ड्यकुलजन्मा वल्लभदेवनामा समतीतसीमभूमा भूपतिः कोऽपि दक्षिणमधुरापुर्यामधिराज्यमातस्थिवान् नगरशोधनाय नित्यं नक्तं निगूढेन वपुषा वीथीषु परिभ्रमन् जातुचित् काचन कोणे शयानं कमपि पथिकमुत्थाप्य 'कस्त्वं भोः! कुतस्त्यः कुत्रत्यः' इत्यादि पर्यपृच्छन् । स च प्रत्यभाषत—ब्राह्मणोऽहम्, गङ्गायात्रां परिसमाप्य प्रतिनिवर्तमानः श्रान्तिशान्तये शायितवानत्रेति । तदाकर्ण्य राजा प्रोवाच—'ब्राह्मणः खल्वसि; ब्राह्मणा ननु नीतिज्ञाः; यदि जानाति भवान् ब्रवीतु कामपि नीतिम्' इति । आदिष्टश्चैवमसौ द्विजातिरब्रवीत्—

वर्षार्थमष्टौ प्रयतेत मासान् निशार्थमर्धं दिवसं यतेत ।
वार्धक्यहेतोर्वयसा नवेन परत्रहेतोरिह जन्मना च ॥" इत्येतत्पद्यरत्नम् ।

[वर्षाकालात्मकमासचतुष्टयोपयोज्यवस्तुजातसंभरणार्थमष्टासु मासेषु यत्नं कुर्यात्; रात्रिकालोपयोज्य वस्तूनि संपादयेदहनि; वार्धकोपयोज्यमर्थजातं यौवने संनाहयेत्; पारलौकिकाय श्रेयसे कृत्स्नेऽपि जन्मन्यस्मिन् प्रयस्येन्नर इति तावदस्य श्लोकस्य तात्पर्यम् ।]

व्युत्पन्नो विवेकी च स चक्रवर्ती श्रुतस्यास्य श्लोकस्यार्थं मुहुर्मनसि चिन्तयन् "ऐहिकभोगेषु नास्ति काचिदस्माकं न्यूनता, पारत्रिकाय श्रेयसे तु नाद्य यावदस्माभिः प्रयतितम्, तेनैव हि प्रयत्नेनावश्यं भवितव्यम्; कथमसौ कीदृशो भवितुमर्हति?" इत्येवंविधां चिन्तामन्तरुदञ्चितामनुक्षणमभिवर्धमानां श्रीपूर्णनाम्नः [शेल्वनम्बि] पुरोधसस्सविधे परेद्यवि न्यवेदयत् । विवेकिनां भगवद्भक्तानामग्रेसरस्स पुरोहितः प्राह—'प्रभुवर! परे पुंसि भक्तिविवर्धनमेव पारत्रिकाय श्रेयसे प्रकल्पेत भूयस' इति । तन्निशम्य राजा चतुर्विधपुरुषार्थविश्राणनविचक्षणं परं तत्त्वं निर्धारयितुं कस्स्विदभ्युपाय इत्यन्वयुङ्क्त । स च पुरोधाः प्रोचे—नानादेशीयानधिगतभूरिशास्त्रमर्मसर्वस्वान् विद्वद्वरिष्ठान् समावाह्य तन्मुखेन निर्धारणीयोऽयमंश इति ।

युज्यत इत्यभिनन्दन्नवनीपतिरथ वित्तमपरिमितमेकस्यां सञ्चिकायामावद्ध्य विद्याशुल्कतयोपकल्प्य सभामण्डपे 'केचिदुत्तुङ्गस्थाने प्रतिष्ठाप्य सर्वतः प्रथयामास "अत्रागत्य वैदिकप्रमाणवृन्दोपन्यसनपूर्वकं यथायथं परं ब्रह्म निर्धारयतामुत्सङ्गे विद्याशुल्कग्रन्थिरसौ स्वयमुपनंस्यति तावत्" इति । प्रथामिमामवजग्मिवांसः पण्डितपरिबृढा भूयांसो विशेषतो नानादिगन्तत उपेत्य वादकेलिसन्नद्धास्संवीबभूवुः ।

तदात्वे श्रीधन्विनव्यनगरक्षेत्राधिनाथो वटपत्रशायी भगवान् श्रीविष्णुचित्तसूरिमुखतो वेदान्तसिद्धं परं तत्त्वं प्रख्याप्य जगतीमुज्जीवयेयमित्युत्कण्ठामुत्कटामुद्वहन् तस्यैव सूरेस्स्वप्ने दृष्टिपथमुपयात इत्थमनुजग्राह—" स्वामिन्! अत्रभवानद्यैव मधुरापुरीमुपगम्य पाण्ड्यभूपतिपरिकल्पितायां पण्डितपरिषदि श्रीमन्नारायणपारम्यमप्रधृष्यं प्रतिष्ठाप्य प्रभुणा तेन परिक्लृप्तं विद्याशुल्कं च स्ववशीकृत्य समुपायातु " इति । स च विष्णुचित्त एवमुत्तरमुदैरित् "भगवन्! शास्त्रविज्ञानलवलेशविधुरोऽहमौद्यानिकः कथं नाम विद्वद्वरिष्ठैकसुकरं कृत्यं कर्तुं प्रभवेयम्? खनित्रादिसाध्ये प्रबलेऽपि कर्मणि नियुक्तोऽहं नियतं तन्निर्वर्तयितुं निपुणस्स्याम्; स्वाधिकारवैदेशिके कर्मणि कथं नु मां नियोजयति श्रीमान्?" इति । भगवांस्तु " नैष विचारो युक्तो भवतः; आज्ञामात्रपरतन्त्रो गन्तुमर्हति भवान्; कार्यनिर्वाहस्तु ममैव भरः " इत्यभिधाय सद्यस्तिरोहितः ।

अथ शयनादुत्थितो विष्णुचित्तो विस्मयविवशो भगवदनुकम्पामधिकृत्य धन्यवादमाम्रेडयन् यथाभगवदाज्ञमाचरितुमवधार्य प्रस्थितः पाण्ड्यराजपण्डितपरिषदं प्रययौ । उपागतमेनमुद्वीक्ष्य सपुरोहितस्सम्राट् * रूपमेवास्यैतन्महिमानं व्याचष्टे* इत्यनुसंदधानो दिव्यतेजःपुञ्जमूञ्जा वैभवविशेषमभ्यूह्य, अभ्युत्थानप्रणामाद्युच्चावचोपचारप्रकाशनेन महत्तरं गौरवमाविष्कुर्वन् सभामण्डपमध्ये महति सिंहासने तमिममुपावीविशत् । एवं नाम प्रकटितां बहुमानमामवलोक्य साभ्यसूया अन्ये सर्वेऽपि विद्वद्वरेण्या " अपरिमितशास्त्रवैदुष्यविभूषितानस्मान् अवज्ञापात्रभावं प्रापय्य यथाजातस्य कस्यचिदेवं नाम सभाजनं सर्वथाऽप्यस्थाने " इत्यधिचिक्षिपुः । तान्यधिक्षेपवचनानि मनागपि कर्णकुहरमप्रवेशयन्तौ पुरोहितप्रभुवरौ सिंहासनोपरि देदीप्यमानदिव्यतेजसं विष्णुचित्तमुद्दिश्य ' स्वामिन्! परमया करुणया परतत्त्वनिर्णयमातनोतु तत्रभवान् प्रमाणोपन्यसनपूर्वकम् ' इति सविनयादरं संप्रार्थयेताम् ॥

प्रार्थितश्चैवमेष महात्मा स्वप्नसंदृष्टस्य सर्वेश्वरस्य कमलापतेः करुणानिधेरनवग्रहमनुग्रहमेकमेव प्रबलमवलम्बमाकलयन् तत्पादारविन्दयुगलपरिचिन्तनपावनमानसस्सन् करतलामलकीकृतसर्वशास्त्रार्थस्सर्वज्ञसार्वभौमो भवन् श्रुतिस्मृतीतिहासपुराणाद्यशेषप्रमाणबृन्दादमितानि वचनान्युपादाय तदर्थांश्च स्वयमेव आक्षेपसमाधानैस्सह सयुक्तिकं संप्रदर्श्य परमतप्रक्रियाश्च समूलमुन्मूल्य, श्रीवैष्णवदर्शनस्यैव प्रामाणिकतां श्रीमन्नारायणस्यैव परदैवतां तच्छरणागतेरेव परमहिततां च सुविशदमतिचारुतरमप्रधृष्यमुपन्यस्य प्रतिष्ठापयामास, निमज्जयामास च निरवधिकविस्मयसंतोषसागरे निखिलानपि प्रेक्षकजनान्, नमयामास च कृताधिक्षेपविद्वज्जनशिरांस्यपि ॥

अथ वल्लभदेवः प्रभुवरः सपुरोहितो विष्णुचित्तसूरेर्विज्ञानवैभवमवाङ्मनसगोचरमतिमात्रं प्रशस्य तत्पादारविन्दपरिसरे साष्टाङ्गं प्रणिपतन् प्रैक्षत च तस्यैव सूरेरुत्सङ्गे स्वयमुपनतं तं विद्याशुल्कग्रन्थिम्, यः खल्वात्मना स्थूणाशिरसि पुरा स्थापित आसीत् । सूरिवरोऽपि भगवत्कृपातिशयप्रकाशकमनन्यलभ्यमेनं द्रव्यग्रन्थिमात्मसादकरोत् । विद्वांसोऽप्यथ सर्वे विष्णुचित्तपादारविन्दपांसुपवित्रीकृतशिरस्काः शिष्यभावं प्रकाशयन्त उच्चैरभिष्टूय कृतकृत्या अभूवन् । महामहिमशालिनोऽस्य सूरिवरस्य वीथीषु विजययात्रोत्सवं सुमहता समारोहेण संविधातुकामा महाराजप्रभृतयस्सर्वेऽपि तमिममभ्यर्च्य हस्तिमस्तकमधिरोप्य,

जयति जयति विद्वान् भट्टनाथो महात्मा जयति जयति मान्यो विष्णुचित्तो महीयान् ।
जयति जयति धन्यो दिव्यसूरिर्गरीयान् जयति जयति तत्त्वस्थापनाचार्यवर्यः ॥

जयति जयति लक्ष्मीनाथकारुण्यपात्रं जयति जयति विद्वन्मस्तकन्यस्तपादः ।
जयति जयति सूरिस्सर्ववित्सार्वभौमो जयति जयति तत्त्वज्ञानिनामग्रगण्यः ॥

इत्येवमेवं विजयघोषणा विरचयन्तः प्रावीवृतन्नप्रमेयमहोत्सवम् । ततःप्रभृति भट्टनाथ इति बिरुदमस्य जगति विशेषतः पप्रथे । श्रीचिह्नकाहलीशङ्खभेरीनिनदातिशयसनाथं जैत्रयात्रोत्सवमनुपममनुभवति सति भट्टनाथे सूरिप्रवरे, तनूभवस्य महोत्सवं दिदृक्षू मातरपितराविव दिव्यदम्पती श्रीवैकुण्ठदिव्यधाम्नः पतगराजमारुह्य समुपेत्य परमाद्भुतं दर्शनमग्रतो दिदिशतुः । दिव्येन चक्षुषा सानन्दमीक्षमाणो दिव्यसूरिवरेण्यो विष्णुचित्तो मनागप्यवलेपमनुद्वहन् परमभक्तिसीम्नि स्थितो भगवतो ज्ञानशक्त्यादिगुणगणान् विस्मृत्य सौन्दर्यसौकुमार्यलावण्यादीनेव गुणान् भृशमनुसन्दधानः 'हा हन्त हन्त! अकालकाल्ये दिव्ये धाम्नि परं विराजितुमर्हो भगवान् एवं नाम कालसाम्राज्यास्पदेऽत्र प्रकृतिमण्डले दृष्टिपथमुपयातः! आः! किमप्यनवद्यमस्य भवेत्किमु!' इति प्रेमभूम्ना भृशमतिशङ्कमानो विह्वलविक्लबहृदयस्तद्दिव्यमङ्गलविग्रहस्याखिलहेयप्रत्यनीककल्याणैकतानस्यापि नित्यश्रियं नित्यमङ्गलमाशंसमानस्तस्यैव हस्तिनः स्कन्धे निषण्णस्सपदि * पल्लाण्डु पल्लाण्डु * [जय विजयीभव] इत्युपक्रम्य मङ्गलान्याशास्त । भगवांश्च कृतकृत्यः परमसंतुष्टो निजं धाम विजगाहे ॥

अथ च भट्टनाथो मुनिवर आत्मीयपादारविन्दप्रणिपतितं पाण्ड्यकुलपतिं नरपतिमतिशिशिरकटाक्षणेनानुगृह्य भागवतगोष्ठीगरिष्ठमाकलय्य निजावसथदिव्यदेशमासाद्य राजपरिषदि समुपलब्धमखिलमपि शुल्कद्रव्यं श्रीवटपत्रशायिभगवन्मन्दिरगोपुरनिर्मापणकैङ्कर्ये विनियुज्य यथापुरं कुसुमोपहरणकैङ्कर्यविरतोऽध्यात्मशास्त्रप्रवचनेन शिष्यमण्डलीस्समुज्जीवयन् दिगन्तविसृत्वरविपुलविमलयशाः प्रचकाशे ॥

अनेनानुगृहीतं दिव्यप्रबन्धद्वितयं सुप्रसिद्धमहिमशालि प्रथते । १. तिरुप्पल्लाण्डुनामा मङ्गलाशासनदिव्यप्रबन्धो द्वादशगाथात्मकः । २. पेरियाल्वार्तिरुमोलि [श्रीविष्णुचित्तसूक्त] नामा दिव्यप्रबन्ध एकषष्ट्यधिकचतुश्शत (४६१) गाथात्मकः । तदिदं दिव्यप्रबन्धद्वितयं प्राथमिकसहस्रे प्रथमतो न्यवेशि पूर्वाचार्यैः । श्रीकृष्णावतारगुणचेष्टितानुभवोऽस्य निष्प्रतिद्वन्द्वः परमविलक्षणः प्रथते । विष्णुचित्तो भट्टनाथ इति च नामनी बिभ्राणोऽप्यसौ महादिव्यसूरिः [पेरियाल्वार्] इत्येव सुप्रसिद्धं व्यपदेशमश्नुते । कारणं चात्रैवमनुगृह्णन्ति श्रीवरवरमुनीन्द्रा उपदेशरत्नमालायाम्— भगवन्मङ्गलाशासनविषये दिव्यसूर्यन्तरापेक्षयापि भृशमतिशयितमभिनिवेशमावहद्यदसौ तत एव महानिति बिरुदमुपलेभे—इति ॥ वेदान्ताचार्यास्तु गोदास्तुतावामनन्ति—स्वदुहितृचिकुरधृतपुष्पमालिकां भगवत उपहरन्नसौ महान् व्यपदिदिश इति । सा च कथा गोदादेवीवैभवप्रकरणेऽनुसन्धेया ॥

इति श्रीभट्टनाथार्यवैभवं हृदि बिभ्रताम् । वेदवेदान्तसर्वस्वं हस्तामलकतामियात् ॥

इति श्रीभट्टनाथसूरिवैभवं समाप्तम् ॥

॥ श्रीरस्तु ॥

॥ श्रीगोदादेवीवैभवम् ॥

कर्कटे पूर्वफल्गुन्योर्विष्णुचित्तात्मजात्मना । उदितायाः श्रियो देव्या गोदायाः कथये कथाम् ॥

पुरा त्रेतायुगे विदेहदेशे मिथिलापुर्यां जनकचक्रवर्तिनो यज्ञशालार्थक्षेत्रे यथा हि वैदेहीवपुषा श्रीरुदियाय, तथैव कलियुगेऽस्मिन् पाण्ड्यमण्डलान्तर्गते श्रीधन्विनव्यनगरे श्रीविष्णुचित्तमुनेः पुष्पोद्याने तुलसीवर्धनार्थमुपकल्प्यमाने भूभागे सैव श्रीरुदैद्विष्णुचित्तात्मजावपुषा कर्कटमासि पूर्वफल्गुनीनक्षत्रे परमपवित्रे । * जनकानां कुले कीर्तिमाहरिष्यति मे सुतेति यथा ह्यनुसंदधे विदेहभूपतिस्तथैव विष्णुचित्तसूरिरपि विशेषतोऽनुसंदधानः अनपत्याय स्वस्मै परमकारुणिकेन भगवता प्रदत्तां तां दुहितरं भावयन् गोदेति नाम तस्याः कुर्वन् * धन्वाध्वन्यस्य धारासलिलमिव धनं दुर्गतस्येव दृष्टिर्जात्यन्धस्येव पङ्गोः पदविहृतिरिव * इत्युक्तरीत्या अलभ्यलाभेन तेन परमानन्दपारावारनिमग्नहृदयस्स तां लोकोत्तरप्रक्रियया परिपोषयन् काले पञ्चभिश्च संस्कारैस्संस्कृत्य परज्ञानपरभक्तिविरक्तिसंपत्समुज्ज्वलामद्वितीययशस्विनीमकार्षीत् ॥

पित्रोः परमानन्दसंदोहसंदायिनी सेयमाशैशवादच्युते भगवत्यप्रच्युतभक्तिभूमा तस्यैव पत्नीभावं स्वस्यामध्यवस्यन्ती * तमन्तरेण नैवान्यं मनसाऽपि पतिं वृणे * इति सुस्पष्टं च संगिरमाणा विष्णोरेव तस्य वैभवं विपुलं विचिन्तयन्ती व्याहरन्ती विलिखन्ती च विवर्धतेस्म । जनकः श्रीमान् विष्णुचित्तः प्रत्यहं वटदलशायिभगवते समर्पयितुं पुष्पमालां सज्जीकृत्य कण्डोले निधाय कार्यान्तरपरस्स्यात् । तदात्वे सेयं दिव्याम्बरदिव्याभरणभूषिता सती तामेव पुष्पमालां स्वकीयचिकुरप्रकरे रहसि बिभ्रती "भगवतोऽहमनुरूपा मनोहरा च किमु वर्ते!" इति स्वात्मानं परीक्षमाणा, पुनः पितुरुपस्थानादर्वागेव तां पुष्पमालिकां चिकुरबन्धादुद्वास्य कण्डोले तस्मिन्नेव यथायथं विनिदधती नित्यमेवमाचरन्ती; अविदितैतत्समाचारेण पित्रा समर्पितया तयैव स्रजा भगवन्तममन्दानन्दकन्दलितस्वान्तमारचयन्ती चावर्तत ॥

एवमपगच्छति बहुतिथे काले कस्मिंश्चन दिने यथावत्पुष्पमालां सन्नाह्य कार्यवशाद्बहिर्गतो विष्णुचित्तस्सहसा च प्रतिनिवर्तमानो दुहितुश्चिकुरप्रकरे विन्यस्तां तां स्रजमवलोक्य, आः! कीदृशमिदमपचरितमित्यवसीदन् अमर्षपरवशश्च सन् 'साध्वि! नैवंविधं कर्म कर्तुमर्हति भवती; मनसाऽपि चिन्तयितुमयोग्यमिदं कर्म हन्त कथं नु भवती कर्मणाऽपि करोति? किमेवं नित्यशः कलयन्ती वर्तसे? हा बत! मामपि खल्वपचारगर्ते निपातितवत्यसि; दुःसहमिदं म दुःखं त्वया कृतम्' इत्यादिकमभिधाय 'मा स्म तावदितःपरमेवं कार्षीः' इति च शिक्षयित्वा तस्मिन्दिने भगवत्सन्निधौ पुष्पसमर्पणमकुर्वाणः कैङ्कर्यविच्छेदविषादाभिभूतस्तूष्णीक आसीत् ॥

अनुपदमेव निशीथे स एव वटपत्रशायी भगवान् मुनेरस्य स्वप्ने दर्शनं दिशन् 'कुतो नु भवानद्य मे स्रजं न समार्पिपत्?' इत्यनुयुज्य, दुहितुरपचरितमेव तत्र निमित्तमिति मुनिना विज्ञापितमाकर्ण्य सादरमेवमादिदेश—भगो! चिरात्तदुच्छिष्टामेव स्रजमुपभुज्य सुरभिमौलिस्समृद्धानन्दश्चाहमस्मि; तादृशाय मह्यं तादृशीमेव मालां नियतमुपहर्तुमर्हति भवान् इति । आदिश्य चैवमन्तरधीयत हरिः ॥

अथ शयनादुत्थितो विष्णुचित्तो गोदां स्वदुहितरं साक्षादस्येशानां जगतो विष्णुपत्नीमेवावधारयन् ततःप्रभृति भगवद्दिव्याज्ञानुसारेण तादृशीमेव स्रजमुपहरन् तस्य निरवग्रहमनुग्रहमैकान्तिकमाससाद । अनेनैव हेतुना दुहितुश्च नाम चक्रे * शूडिक्कोडुत्त नाच्चियारिति [स्वोच्छिष्टमाल्यदात्री देवीति] । इदमैतिह्यमस्मिन्दिव्यदेशे अद्याप्यनुष्ठानगोचर आलक्ष्यते । प्रत्यहं प्रातर्गोदादेवीमन्दिरात्तदुपभुक्तं माल्यं वाद्यघोषादिमर्यादासनाथमानीयते श्रीभगवन्मन्दिरमिति ॥

गोदादेव्या वयो वर्धते ज्ञानभक्तिविरक्तिभिस्सह । भगवत्येकस्मिन्नेव चास्या अनुरागोऽप्यभिवर्धते । * पतिसंयोगसुलभं वयो दृष्ट्वा च मे पिता । चिन्तार्णवगतः पारं नाससादाप्लवो यथा * इति श्रीरामायणोक्तप्रक्रियया अस्या जनकोऽपि विष्णुचित्तो वैवाहिकचिन्तार्णवविनिमग्न आस्त । भगवन्तमेकमन्तरेणान्यं कापुरुषं नैव मनसाऽपि कलयेयमिति तावदेषा सुदृढमध्यवस्यति । पिता च तदीयं वस्तु स एव कामं स्वीकुरुतामिति निर्भरोऽवतस्थे । इयं च स्वकीयप्रेमपूरपरीवाहरूपं दिव्यप्रबन्धद्वितयं प्रादुर्भाव्य भगवन्तमनवग्रहानुग्रहोन्मुखं कर्तुमयतत । तच्च दिव्यप्रबन्धद्वयम्—तिरुप्पावै, नाच्चियार् तिरुमोऴि इति प्रसिद्धम् ॥

एवमनन्यसाधारणमैकान्तिकमप्रतिममनुरागमुद्घाटितवतीं गोदां दुहितरं कदाचिदन्वयुङ्क्त भट्टनाथमुनिः पिता—भद्रे ! भगवन्तमेव कान्तं कामये इति ननु कथयति भवती; अष्टोत्तरशतदिव्यदेशाधीशेषु कतमं नु भगवन्तमुपयन्तुमिच्छा ते ? इति । सर्वेषामपि भगवतां वैभवं विस्तरेण व्याचष्टे यदि तत्रभवान्, अथ वदेयमिति सुतया तया चोदितस्सूरिवरेण्यः क्रमेण सर्वेषामपि भगवतां वैभवं यथायथं व्याचक्षाणः सर्वाङ्गसुन्दरे श्रीरङ्गनाथ एकस्मिन्नेवार्चावतारभगवति नन्दनन्दन एकस्मिन्नेव च विभवावतारभगवति समिन्धानानुरागां दुहितरमजानात् । ज्ञात्वा च, हा हन्त ! कथमेष मनोरथोऽस्याः फलेग्रहिर्भविता ? भगवानर्चामूर्तिः रङ्गनाथः कथमिवास्याः पाणिं पाणिना ग्रहीष्यति ! इति विचारविह्वलोऽवर्तत । अथ कदाचन रङ्गनाथोऽस्य मुनिवरस्य स्वप्ने प्रादुर्भूय 'स्वामिन् ! स्वकीयां दुहितरमानयतु तत्रभवानस्मदीयं धाम; अङ्गीकरिष्यामि तामहमुत्कण्ठया; निर्विचारस्सत्वरमानय तनयारत्नम्' इत्यादिश्यान्तरधीयत । विष्णुचित्तश्च विस्मयस्तिमितमानसो हर्षप्रकर्षमविन्दत । एवमेव स रङ्गनाथः स्थानिकप्रभृतीनां स्वमन्दिरपरिजनानां च स्वप्ने दृष्टिपथमुपेत्य 'सर्वे यूयं सकलमङ्गलवाद्यसनाथाः छत्रचामरादिपरिबर्हपरिच्छदपाणयो नवरत्नमयीं शिबिकामस्मदीयां श्रीविष्णुचित्तनगरं नीत्वा तस्य मुनेर्दुहितरं गोदां शिबिकारूढामाकलय्य समानयत' इत्याज्ञामदात् । अवतंसितैतदाज्ञाः परिजनास्सर्वेऽपि सद्यः प्रस्थाय श्रीधन्विनव्यनगरीमासाद्य भट्टनाथमुनेस्सविधे भगवदाज्ञां विज्ञाप्य, अथ प्रमुदितान्तःकरणेन वटपत्रशायिभगवदनुज्ञातेन शिबिकारूढगोदासमन्वितेन च तेन सह श्रीरङ्गधाम प्रस्थातुं समनह्यन् ॥

कर्णामृतमयीं शुभवार्तामिमामाकर्ण्य संतुष्टस्वान्तो वल्लभदेवो भूपतिः कल्याणमहोत्सवमिमं स्वयमप्यनुभूय धन्यो बुभूषुः यथाशक्ति किञ्चित्कारैः कृतार्थश्च बुभूषुः सर्वानपि स्वकीयान् किङ्करान् कृत्स्नमार्गपरिष्करणे नियुज्य रथगजवाजिप्रमुखपरिवृतो विष्णुचित्तमुनिसन्निधानमाससाद । ते च किङ्करा धन्विनव्यनगरीतः प्रभृति श्रीरङ्गधाम पर्यन्तं पन्थानं सलिलसेक-रङ्गवल्लीपरिकर्म-तोरणालङ्करण-क्रमुककदलीस्तम्भस्थापनादिपरिष्क्रियाभिरसमाभ्यधिकशोभमातेनिरे ॥

श्रीविष्णुचित्तोऽथ दुहितरं गोदां श्रीरङ्गनाथप्रहितमणिमयशिबिकाधिरूढां मङ्गलवाद्यघोषणाभिस्सह सपरिवारः श्रीरङ्गनगरीमानीय भगवतो दिव्ये भवने पुरतो विराजमाने दिव्यमण्डपे तामवरोहयामास । अवरुह्य च सा भगवन्तं रङ्गनाथं दूरतस्सुष्ठु संसेव्य संमोदसलिलनिधिसंमग्नमानसा नूपुरादिभूषणनिनदसुभगा हंसीव शनैश्शनैस्सरन्ती भोगिराजमधिरुह्य भुजङ्गशयनस्य महाभुजङ्गस्य वक्षसि संश्लिष्य नित्यानपायिनी निर्वृतिमवाप ॥

अहो भाग्यमहो भाग्यमित्यनुसंदधानो विस्मयहर्षविषादविवशो विष्णुचित्तोऽथ भगवता स्वसविधे समाहूतः 'क्षीरसागरवदेव श्रीमानपि मम श्वशुरस्सभमू'दिति सादरमभिहितः तीर्थमाल्याद्यनुग्रहणेन बहुमानितश्च यथायथं स्वस्थानमास्थाय कैङ्कर्यनिर्वहणाय विसृष्टः सह वल्लभदेवभूभुजा प्रतिनिववृते ॥

इत्थं गोदावैभवमद्भुतमनिशं हृदाऽवधारयताम् । अहरहरभिवृद्धिमियुः कल्याणानां परम्परा भवने ॥

इति श्रीगोदादेवीवैभवं समाप्तम् ॥

॥ भक्ताङ्घ्रिरेणुसूरिप्रभावः ॥

धनुर्मासि धनिष्ठेऽन्ववतीर्णस्य भूतले । भक्ताङ्घ्रिरेणोर्महिमा कथ्यते भक्तमुक्तये ॥

चोलमण्डले * पुळ्ळम्पूदङ्गुडिनामकदिव्यदेशसन्निकृष्टे मण्डङ्गुडिनाम्नि महिते स्थले धनुर्मासि ज्येष्ठोडुनि शुभे पुरश्चूडवैदिकब्राह्मणोत्तमसंततौ संजज्ञे कोऽपि महान् । भगवत्कटाक्षवीक्षामहिम्ना समुत्पन्नस्स दिव्यशिशुः पितृपादैर्विप्रनारायण इति कृतनामा कालेकाले चौलोपनयनादिसंस्कृतः साङ्गोपाङ्गवेदाध्ययनसंपन्नः शुद्धसत्त्वैकनिधिः विज्ञानवैराग्यशेवधिश्च सन् विश्वतोविस्तृत्वरविपुलविख्यातिर्विरराज ॥

रहस्यत्रयार्थनिष्ठागरिष्ठोऽयं महात्मा भगवद्भागवतवरिवस्यैव परमं श्रेय इति प्रतिपद्यमानो गृहस्थाश्रमस्वीकारविमुखः प्रथमाश्रमैकप्रवणचेताः श्रीरङ्गनगरीमधिगत्य तत्र भोगिभोगशयनीयशायिनं माधवं संसेव्य तदीयनिस्समाभ्यधिकसौन्दर्यभूमसमाकृष्टचेतास्तत्रैव नित्यवासं संकल्प्य श्रीविष्णुचित्तसूरिवदेव नित्यं भगवते पुष्पमालिकासमर्पणकैङ्कर्यसमुत्सुकः पुष्पोद्यानमतिहृद्यं परिकल्प्य तत्र संवर्धिताभिस्तुलसीपुष्पमालिकाभिरच्युतं प्रीणयन् स्वाश्रमोचितभिक्षाचर्यया देहयात्रां निर्वहन् सर्वजनप्रशस्यसदनुष्ठानवैभवो विरराज विशेषतश्च भक्तानां भागवतानामनवधिं मोदमावहन् ॥

एवमतिपतति पावनः कालो भक्तप्रवरस्यास्य । अथ कदाचिद्देवदेवीनाम्नी काचन निरवधिकसौन्दर्यलावण्यशालिनी पण्यस्त्री श्रीमदुत्तमभगवदालयान्तिकनिवासिनी सह सखीभिर्निचुलापुरीमुपेत्य तत्र चोलभूपतेस्सदसि स्वकीयं नृत्तगीतादिप्रागल्भ्यमप्रतिमं प्रदर्श्य व्यामोह्य भूयसीं बहुमतिमुपलभ्य सावलेपं प्रतिनिवर्तमाना विप्रनारायणस्यास्य हृद्यमुद्यानं पथि समालोक्य तदीयरामणीयकेन प्रसभमन्तराकृष्टा संनिवेशानुपवनस्य तस्य सुमनोहरानवलोक्य तत्रैव नित्यवासं कामयमाना स्वातन्त्र्येण पुष्कलेन निवासाय तत्स्वामिनं स्वाधीनं चिकीर्षन्ती ततइतः सविभ्रमगतिं चक्रे । प्रैक्षत च तत्रैव क्वापि कोणे आलवालपरिष्करण-सलिलसेकादिकार्यैकव्यग्रं द्वादशोर्ध्वपुण्ड्रविलसद्दिव्यगात्रं तुलसीनलि-

नाक्षमालाविलसदुरस्कं तेजसां राशिमूर्जितमिव स्थितं विप्रनारायणम् । प्रेक्ष्य च सरभसमन्तिकमुपसृत्य स्वदेह-सौन्दर्यातिशयं तस्मै प्रदर्श्य विभ्रमांश्च विविधान् विदधती सा जितेन्द्रियाग्रगण्येन तेन तृणवत्कृता नैव मनागपि वीक्षिताऽभूत् । अथापि सेयं स्वकीयामुत्कण्ठां न लेशतोऽपि विजहौ । कथञ्चिदप्येनं स्वाधीनयेयमेव सत्वरमिति सुदृढाभिनिवेशा बभूव । स तु महान् कैङ्कर्येष्वेव गाढावगाढकरणग्रामश्चास्तमितान्यभावश्च विलसतिस्म ॥

देवदेवी तु कथयति स्वकीयसखीसविधे—'महाप्रभुवरानपि क्षणमात्रे स्वाधीनयन्तीमप्रतिमरूपलावण्यसंपदं बिभ्रती साहं महात्मनाऽनेन तृणवत्कृताऽस्मीति सत्यमिदमाश्चर्यस्थानम् । किमसावुन्मत्तः ! आहोस्विन्न पुमान् !' इति ॥

सा च प्रत्युवाच—' भगवत्कैङ्कर्यैकनिष्णातमानसोऽयं विरक्ताग्रेसरो विषयचापलवैदेशिको न त्वया स्वाधीन-यितुं शक्यः प्रयत्नशतैरपि ; यदि भवती स्वाधीनयेतैनम् , तर्हि षण्मासान् किङ्करा भवानि तवाहम्' इति । शपथमिमं श्रुतवती देवदेवी स्वयमपि तथा शेपे यद्यहं वितथप्रयत्ना भवेयं तर्हि संवत्सरं ते किङ्करा भवेयमिति ।

अथ सा स्वकीयान्याभरणानि सर्वाण्यवमुच्य सखीवर्गाय प्रदाय भगिनीप्रमुखं सर्वमपि जनं स्वस्वावसथ-गामिनं कृत्वा स्वयमेकाकिनी काषायाम्बरधारिणी सती सूरिवरस्यास्य सन्निधिमुपसृत्य पादाब्जयोश्च प्रणिपत्य, का त्वम् ? किमर्थमिहागतेति तेनानुयुक्ता 'पूर्वजन्मकृतदुष्कृतभूम्ना साऽहं गणिकाकुले समुत्पन्ना ; तत्कुलानुरूप-वृत्त्यवलम्बनाय जनन्या निर्बद्धाऽहं सर्वथा तत्र विहतस्पृहा सर्वमपि बन्धुवर्गमपहाय परमभागवताग्रेसराणां तत्रभवता-मेव पादारविन्दपरिसरे स्थित्वा स्वरूपानुरूपवरिवस्यां विधाय समुज्जीवेयमिति समिन्धानकुतूहला समागममिह । तदपारकरुणावरुणालयास्तत्रभवन्तः अनाथामिमां मामकम्पानुकम्पापात्रतां नेतुमर्हन्ति ननु । अत्र च आलवालपरि-ष्क्रिया सलिलसेचनं कुसुमापचयो माल्यग्रथनमुद्यानपालनमित्यादिषु कर्मसु यथार्हं दासीमिमां नियोक्तुं प्रभवन्ति श्रीमन्तः । पादारविन्देन प्रेरितं कर्म शिरसा प्रतिगृह्य सादरं सुष्ठु निर्वर्तयितुमस्मि सज्जा समुत्सुका च । अवश्य-मनुग्राह्योऽयं जनः ; अन्यथाशङ्कनगन्धोऽपि मा भून्मयि महानुभाव !' इति सविनयभरं व्यजिज्ञपत् । आकर्णितै-तद्वचा विप्रनारायणोऽस्याः कपटमयं मानसमजानन् प्रकृतिसिद्धेन निजेनार्जवेन तस्या वचस्सूनृतं प्रतियन् अस्या इहावस्थितिरुपवनकैङ्कर्यसौकर्याय कल्पेतेति कलयन् तत्प्रार्थनाम् ओमित्यूरीकृत्य कैङ्कर्येषु नियुङ्क्तेस्म ; सा च स्वामिनोऽस्य भुक्तशिष्टं भुञ्जाना समुचितानि वरिवस्यनानि वितन्वाना श्रद्धाभक्तिसंपत्समृद्धिमाविष्कुर्वाणा उपवन-संस्कारमसमाभ्यधिकमुपबृंहयन्ती स्वात्मानमतिमात्रविस्रम्भभाजनतामनैषीत् ।

गच्छत्सु चैवं कतिपयेषु मासेषु कदाचिन्महत्यां वृष्ट्यां स्यन्दमानायां पर्णशालान्तरवतस्थिवान् विप्रनारायणो बहिष्टात् वर्षाभिघातखिन्नामितिकर्तव्यतामुग्धां देवदेवीं स्वाभाविकेन जीवकारुण्येन समागन्तुमन्तराज्ञापयामास । स एव च क्षणो * मम माया दुरत्ययेति प्रथिताया मायायाश्च विजयक्षण इवासीत् । यथानियोगमन्तःप्रविष्टा सा मधुरललितैर्वचोमृतैर्विप्रनारायणं विवशयन्ती सपदि विधूतविरक्तिकमाचरयन्ती कतिपयदिनावधि तेन सहैव निवसन्ती निर्वृत्तशपथा किमनेनाकिञ्चनेनेति निस्स्पृहमानसा निजमगारमगाहत । सूरिश्चासौ तद्विश्लेषासहिष्णुतया तस्या एव वेश्याया वेश्म समुपगम्य अन्तःप्रवेशमप्यलभमानो द्वारि परं विक्लवो व्यतिष्ठत ।

अस्यामवस्थायां श्रीरङ्गराजदिव्यमहिषी स्वात्मनाथमभिवीक्ष्य संजगादैवम् ;—'भगो प्रियवल्लभ ! बहुतिथं कालमावयोरनुपमानि कैङ्कर्याणि कृतवान् विप्रनारायणो हन्त स्ववृत्तिं विसृज्य श्ववृत्तिं वेश्यायामवलम्ब्य तया भृशं तिरस्कृतोऽप्यनिवर्तमानो मुहुरनुवर्तमानश्च तस्या एव खलु वेश्मद्वारि वितिष्ठते विगतविप्राचारः ; हा बत ! काचिदियं ते विचित्रा लीला ? हा हन्त परमभक्तानपि किमेवं मायया बध्नासि ? अलमियता कालेन प्रपञ्चितया मायया । अथेदानीं यथापुरमनुग्रहैकभाजनं तमाधाय नित्यकैङ्कर्यैकनिरतं स्वीकुरुष्व सद्य' इति प्रार्थयतेस्म । श्रियःपतिश्च मन्दं स्मयमानो भवतु तावदिति प्रतिभाष्य सद्यः कामपि विचित्रघटनामजीजनत् ।

अयमेव स्वयं मानुषं वपुरास्थाय स्वकीयदिव्यालयीयपात्रेषु किमप्यनर्घं सौवर्णकलशमादाय देवदेव्यास्सदनमासाद्य कवाटमुद्घाटयेति कण्ठनादमदर्शयत् । तया चाथ कस्त्वं कुतस्त्यः कुत्रत्यः किमर्थमत्रागत इत्यनुयुक्तोऽसौ मायामानुषः 'रङ्गशायिदासनामाऽहमस्मि ; विप्रनारायणेन प्रेषितोऽत्रागतोऽस्मि सोपहारः, क्षिप्रमुद्घाटय कवाटम्' इत्युदैरिरत् । सा चागत्य कवाटमुद्घाट्य को विशेष इत्यनुयुञ्जाना तेन सौवर्णकलशमुपलम्भिताऽभूत् , अशृणोच्च विप्रनारायणस्येदमुपायनमिति वचनम् ।

श्रुत्वा चैतदत्यादरेण सा पप्रच्छ कुत्रेदानीं वर्तते स इति । प्रत्युवाच स एवं स्वमावसथमधिवसति स इति । तर्हि तमिहाहमाह्वयामीति कथयेत्यभिधाय सहैमकलशा विवेशान्तः । भक्तसुलभो मानुषरूपी भगवानथ विप्रनारायणस्यान्तिकमुपगम्य देवदेवी भवन्तमाकारयतीति निगद्य न्यलीयत । विप्रनारायणश्च हर्षप्रकर्षपरवशहृदयस्सरभसमागत्य दासीगृहं प्राविशत् ।

रात्रिश्च सा व्यपेयाय । प्रभाते यथायथं श्रीरङ्गनाथभगवन्मन्दिरे प्रोद्घाटिते सौवर्णकलश एकः प्रमुषित इति वार्ता व्यजृम्भत । देवालयाधिकृता अन्ततो राजद्वारे न्यवेदयन् स्तेयविचारणायै । राजभटाश्च सद्यो भगवदालयमभ्येत्य पूजकपरिचारकादीन् प्रसभमवस्कन्द्य भृशमपीडयन् । सर्वथा ते निरपराधा इति सिद्धे, बहिस्तत्र तत्र शोधनाय रहस्यभटा न्ययुज्यन्त । प्रनष्टं तत्सौवर्णपात्रं देवदेवीसदनमुपागतमस्तीति तच्चेटीमुखादाकर्ण्य तत्रागत्य तदुपलभ्य तद्गृहस्थितान् सर्वानपि जनानागस्विभावेन राज्ञः पुरत उपस्थापयामासुः ।

अथ राजाऽन्वयुङ्क्त देवदेवीं भगवतः पात्रमिदं कथमिव त्वयाऽपहृतमिति । सा प्रत्युवाच—महाप्रभो ! नाहं जानामि कस्येदं पात्रमिति ; विप्रनारायणेनोपहृतमिति कथयन् रङ्गशायिदासनामा कोऽपि दूतस्समानीय मद्धस्ते प्रादात् । एतावदेव जानाम्यहम् , नेतोऽधिकमन्यत्किमपीति । अथ परिवृढो विप्रनारायणं पप्रच्छ वस्तुतस्त्वमेव खलु तस्करोऽसीति । सोऽपि बाष्पपर्याकुलमुख आह—नाहं किमपि वेद्मि । अकिञ्चनस्य मम दूतोऽपि नास्ति कश्चिदिति ।

शुश्रुवानेतत्सर्वं भूपतिः पर्यालोच्य वेश्याया उचितदण्डं विधाय अथ विप्रनारायणस्य समुचितं दण्डं विधित्सुस्तं कारागारबद्धमकार्षीत् ।

अथ निशायां श्रीरङ्गेश्वरी स्वं प्रेयांसमवलोक्य 'भगवन् ! लीलाविषयो माभूत्तव विप्रनारायणः ; केवलं

कृपायाः पात्रं भूयात् ' इत्यर्थयते स्म । भगवान् रङ्गरमणस्तथेत्यङ्गीकृत्य सद्यो भूपतेस्तस्य स्वप्ने दर्शनं दिशन् "वारवनितारतस्य विप्रनारायणस्य कर्मक्षयाय वयमेव सौवर्णकलशं तद्दासनाम्ना तद्वनिताहस्तं प्रापयाम ; वस्तुतो नायं तस्करः, परिशुद्धमसुं विद्धि " इत्यबोधयत् । अथ जागरितो जगतीपतिः स्वप्नोदन्तमिमं सचिवप्रमुखेभ्यो विस्मयविवशो विनिवेद्य विप्रं बन्धनाद्विसृज्य विधाय चोपचारान् प्रजिघाय निकाय्यम् ।

संसारनिगलबन्धाद्विमोकस्य पिशुनेनेव स्थितेनानेन कारागारमोक्षेण संतुष्यन्नपि विप्रो हा हन्त महीयान् कालो मुधा व्यतीत इति भृशं विषीदन् अनुशयानश्च सन् * अनुतापादुपरमात्प्रायश्चित्तोन्मुखत्वतः । तत्पूरणाच्चापराधास्सर्वे नश्यन्ति पादशः * इति शास्त्रार्थमनुचिन्तयन् ज्ञानानुष्ठानशेवधीनां महानुभावानां परिसरमुपसृत्य स्वात्मनो दोषानशेषानाविष्कृत्य समुचितप्रायश्चित्तविधानं प्रार्थ्य, परमभागवतश्रीपादतीर्थनिषेवणमेव निरुपमं प्रायश्चित्तमिति प्रतिपद्यमानस्तथैव निर्वर्त्य विशुद्धिं विजगाहे । अथ च यथापुरं भगवद्भागवतपरिचर्यासु प्रवणो भगवद्दास्यादपि भागवतदास्यमेव परमं श्रेय इति सुदृढमवधारयन् अनुष्ठानमुखतश्च तामेव निष्ठां गरिष्ठां विश्वतः प्रख्यापयन् नाम्ना च भक्तांघ्रिरेणुरिति पप्रथे । यतोऽयमहेतुकाप्रतिमभगवत्कटाक्षभूम्नैव करतलामलकीकृततत्त्वहितपुरुषार्थस्सर्वज्ञ आसीत्तत एव श्रीपराङ्कुशादिदिव्यसूरिगोष्ठीगणनामपि लम्भितोऽभूदसौ भगवदाज्ञया । भक्तानां नित्यानुसन्धेयं विश्वप्रसिद्धवैभवशालि दिव्यप्रबन्धद्वितयं चान्वगृह्णादसौ दिव्यसूरिवरः तिरुमालै, तिरुप्पळ्ळियेळुच्चि. [श्रीमालाप्रबन्धः, प्रबोधन प्रबन्धः] इति नामभ्यां विभासुरम् । " श्रीमालां यो न जानाति न स जानाति माधवम् " इति द्राविड्यां वाण्यां सुप्रसिद्धेनाभाणकेन सुगममदसीयस्य श्रीमालाप्रबन्धस्य सर्वातिशायित्वम् । प्रबोधनप्रबन्धश्च सर्वेषां भक्तानां नित्यमनुसन्धेयतया नियन्त्रितोऽस्तीति तत्प्रभावश्च सुबोधः ॥

भक्तांघ्रिरेणुसूरेर्वैभवमिदमादरेण हृदि दधताम् ।
भगवद्भागवतांघ्रिषु भक्तिर्विपुलाऽमलाऽतुला विलसेत् ॥

इति श्रीभक्तांघ्रिरेणुसूरिवैभवं समाप्तम् ॥

अवधेयं संशोधनम् ।

भट्टनाथसूरिवैभवे (१९ तमे पुटे) नवम्यां पङ्क्त्याम् " किमप्यनवद्यमस्य " इत्येतत् " किमप्यवद्यमस्य " इति संशोधनीयम् ।

पुनस्तत्रैव पञ्चदशपङ्क्त्याम् " कुसुमोपहरणकैङ्कर्यविरतः " इत्येतत् . . . . . . कैङ्कर्यनिरत इति संशोध्यम् ।

एवमन्ये चाक्षरदोषाः परिशोध्याः ।

॥ अथ मुनिवाहनसूरिवैभवम् ॥

वृश्चिके मासि रोहिण्यामुदितस्य महीतले । श्रीपाणसूरेर्महिमा महिष्ठः प्रतिपाद्यते ॥

चोलमण्डलीयेषु राजनगरेषु पञ्चस्वन्यतमे, धर्मवर्मनाम्नस्तनयात्वेन नीलादेव्या अवतारेण महिते च निचुलापुरे [उरैयूरुक्षेत्रे] वृश्चिकमासीये रोहिणीभे शुभे शिशुः कश्चिदवततार द्विजन्मनः कस्यचन केदारे सस्यमुखात् । तथाऽवतीर्णं तं दिव्यं शिशुं तत्रत्यः कोऽपि पञ्चमजातीयस्समवेक्ष्य जन्मान्तरसुकृतफलपरिपाकोऽयं न इति संतुष्यन् चिरंतनमनपत्यतादुःखमात्मीयमपाचिकीर्षता परमकारुणिकेन परमात्मना प्रेषित इवायं सुन्दरः शिशुरिति सुदृढमध्यवस्यन् परिगृह्य पत्नीहस्ते प्रदाय गोक्षीरादिभिः परिशुद्धाभ्यवहारैरेव परिपोषयन्नवर्तत ।

एवं नाम वलक्षपक्षविधुरिव वर्धमानोऽयं महान् केवलभगवत्कृपामूलकस्वावतारो यतस्तत एव लौकिकव्यासङ्गविरहितो भगवत्पादारविन्दमधुकरीभूतमानसौ वीणागानप्रवीणस्तत एव $ पाणसूरिरिति प्रथामुपेयिवान् नारदमहर्षि—निर्विशेषं ज्ञानवैराग्यशेवधिः संगीतकलाकुशलश्च समुल्ललास ।

महाभागवताग्रणीरेष गायकमणिः श्रीरङ्गनाथभगवदन्तरङ्गप्रहर्षणाय संगीतगानकैङ्कर्यं संविधित्सुः प्रस्थाय 'जघन्यकुलसंवृद्धोऽहमुभयकावेरीमध्यविराजमाने श्रीरङ्गदिव्यक्षेत्रे कथमिव पादं विन्यस्येयम्!' इति चकितमना दक्षिणकावेरीतीर एव दूरादवस्थाय वीणापाणिस्सन् भगवद्रङ्गनाथविषयकाणि दिव्यभव्यकीर्तनानि कर्णामृततया गायन् किन्नरगन्धर्वादीनपि लज्जाविवशान् वितन्वन्नवर्तत ।

श्रीतोताद्रिसन्निहिते * तिरुक्कुरुङ्गुडिनाम्नि दिव्यक्षेत्रे पुरा भगवद्विषयकाणि गीतानि गायंगायं, कैशिकाख्य—गीतप्रभावभूम्ना ब्रह्मराक्षसमपि शरणागतं संशोध्य सद्गतिं च प्रापय्य स्वयमपि संसारादुत्तीर्णो यो * नम्पाडुवान्नामा जात्या मातङ्गः परमभागवतः, तस्मादप्यतिशयितमहिमा भक्ताग्रेसरस्सोऽयं पाणसूरिः * आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान् । सदा परगुणाविष्टः * इत्युक्तप्रक्रियया विकृतसर्वावयवो नित्यशः प्रभाते दक्षिणकवेरकन्यारोधसि भगवन्मुखोल्लासहेतुभूतदिव्यगानकैङ्कर्यनिष्णातस्सन्नेव कालं चिक्षेप ।

क्षिप्यमाणे चैवं बहुले काले, नित्यं श्रीरङ्गनाथाय भगवते तीर्थमाभिषेचनिकमुपहरन् लोकसारङ्गमहामुनिर्नाम ब्राह्मणोत्तमः कस्मिंश्चन दिने तीर्थनयनाय सौवर्णकुम्भसनाथपाणिः कावेरीमुपगम्य, नातिदूरेऽवतिष्ठमानं पाणसूरिं प्रेक्ष्य जुगुप्सितमनाः 'रे अधम! अपसर' इत्याचक्रन्द । अथापि सोऽयं नापासरत् यतोऽस्तमितान्यभावो भगवत्पादारविन्दैकप्रवणहृदयो * नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानातीत्युक्तरीत्याऽवतस्थे ।

अपसरेत्यभिहितोऽपि नापसरत्ययमवलेपभरात् तिष्ठति च तत्रैव स्थाणुरिवेत्याकर्ण्य जात्यभिमानशालिनः केचन द्विजन्मानस्सरभसमभ्येत्य, अपेह्यपेहि पाप चण्डालेति मुहुराचक्रन्दुः । सर्वथाऽपि भगवत्पादारविन्दसक्तचित्तस्य स्वात्मानमत्यन्तं विस्मृतवतश्च पाणसूरेः कर्णकुहरे तदप्याक्रन्दनं नैव निपपात । ततोऽयं स्थानान्मनागप्यचलितो

$ द्राविडभाषायां सुप्रसिद्धमिदं दिव्यनामधेयम् ।

गानैकतत्परोऽवतस्थे । आगता ब्राह्मणास्तु तथानामावतस्थिवांसमेनमालोक्य ‘ नायं ज्ञानयोगी, अपि तु गानयोगीव ’ इति मन्वाना यथागतं प्रतिनिववृतिरे । जाल्मा मूर्खाश्च कतिपये विप्रास्तु यथाकथञ्चिदप्येनं प्रसभमपसार्यैव कार्यमन्यत्सरयेमेति कृतशपथा अश्मखण्डान् प्रचिक्षिपुरस्य गात्रे । वपुषि निपतितैरपि तैः कलयाऽपि नैष विव्यथे नापि चचाल ; * गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः । अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः * इत्यदः पौराणिकमेव पद्यरत्नं स्मारयामास । तादृशीं स्थितिमस्य दृष्टवन्तस्ते विस्मिता भीतभीताश्च विसर्पन्तिस्म ।

यद्यप्यश्मखण्डप्रक्षेपणतः पाणसूरेर्वपुषि वा मनसि वा न काऽपि व्यथा मनागप्युदियाय, तथाऽपि पारमार्थिकभक्तजनान्तःकरणशरणस्य भगवतो रङ्गरमणस्य हृदयमतिमात्रमवसीदति स्म, फालतलं च रुधिररूक्षं ददृशे । तदिदं दृष्टशिवानर्चकमहाभागो भृशं विह्वलश्चकितो भगवदालयाधिकारिणां सविधे ‘ हा बत ! किमेतदत्याहितम् ! क्षिप्रमवधत्त भृशम् ’ इति सनिर्वेदभरमावेदयामास । ते च तमिममुत्पातवृत्तान्तमविलम्बेन भूपतिमबोधयन् । स च सचिवेन सह संमन्त्रयन्नपि ‘ कथमिदं जातम् ! कश्च परिहारमार्ग ’ इतीषदप्यसंविदानो भगवत एव पादारविन्दयोर्भरं विन्यास्थत्सर्वथा । ततः पूर्वं कदाचित् श्रीरङ्गरमणी स्वात्मनः प्राणवल्लभमुद्दिश्य ‘ नाथ ! चिरादेव नौ नित्यं निध्यायन् पाणसूरिरावयोर्नेदीयान् खलु वर्तितुमर्हति ; कुतो नु स दवीयान्वर्तते ? ’ इत्यनुयुज्य, अचिरात्स भविष्यति नौ नेदीयानिति पत्युः प्रतिवचनमलभत च । संनिदधे च तस्या मनोरथपूरणावसरः । तथा पाणसूरेरसमाभ्यधिकवैभवप्रकाशनौपयिकसमयविशेषश्च समुपस्थितः । भगवत्प्राप्तेर्जातिविशेषो नानुकूलो न च प्रतिकूलः, भक्तिरेकैव तदनुकूलेति सकलशास्त्रसारार्थतत्त्वं प्रचिख्यापयिषू रङ्गनाथो भगवान् लोकसारङ्गमहामुनेः स्वप्ने समुपस्थाय ‘ परमपवित्रचरित्रं भक्तिभूषणं भागवताग्रगण्यमस्मदीयं पाणसूरिं स्कन्धोपरि समुपवेश्य समानय तावदिह सत्वरम् ’ इति दिदेश दिव्यशासनम् । ब्राह्मे मुहूर्ते शयनादुत्थितस्स मुनिपुंगवः स्वप्नलब्धं शासनमनुचिन्त्य सुबहु विस्मयमानो धन्यधन्यमात्मानं मन्यमानश्च सन् सर्वतः प्रकाश्य तद्भगवच्छासनं भूयिष्ठया ब्राह्मणगोष्ठ्या परिवृतः कनकसरित्सरसिरसमुपेत्य तत्र स्नात्वा धृतधौतवस्त्रो द्वादशोर्ध्वपुण्ड्राञ्चिततनुर्निर्वर्तितप्रातराह्निकोऽथ पाणसूरेरवस्थितिस्थलमभ्युपेत्य तत्पादयोस्साष्टाङ्गं प्रणिपत्य न्यवेदयद्रङ्गरमणस्य निरुपममव्याजकरुणापरिणामरूपं शासनम् ।

निशम्य चैतदेष निजं निकर्षं वस्तुतो व्याहरन् कथमहं पावनीं रङ्गभुवम् अतिमात्रहेयमत्पादन्यासेन दूषयेयम् ? सर्वथा मत्स्वरूपविरुद्धमिदं शासनं कथमवतीर्णम् ? कथं वा तदिदमयं जनः पालयितुं प्रभवेदिति विज्ञापयन् संकोचमात्मीयमुदघाटयत् ।

अथ मुनिवरो व्याचष्ट—मा नाम भूत्पादन्यासो भवतो भगवदावसथे ; यथा हि भगवान् गरुत्मतः स्कन्धमध्यास्ते तथा तत्रभवान् धन्यजन्मनो दासस्यास्य स्कन्धमधिरोहतात् ; एवमेव चाहं भगवता संदिष्टोऽस्मीति । श्रुत्वा तदेतत्पाणसूरिः ‘ आः कष्टं कष्टम् ! किमेतदुच्यते ! कथं वैतन्मया श्रूयते ? कम्पते मे गात्रम् , वेपते च हृदयम् । भागवतपादारविन्दयोर्मूर्धानमर्पयितुमप्यनर्होऽयं जनः कथमिवैतत्साहसं कलयितुमीष्टे ? कृपया विसृज्यतामयं जन इति सप्रश्रयं प्रार्थयते स्म बद्धेनाञ्जलिना नतेन शिरसा गात्रस्सरोमोद्गमैः कण्ठेन स्वरगद्गदेन नयनेनोद्गीर्णबाष्पाम्बुना ।

अथ च मुनिसार्वभौमस्सर्वथाऽप्यनुल्लंघनीयां भगवदाज्ञां विज्ञापयन् भृशं निर्बध्नन् पाणसूरिम् ओमित्यङ्गीकाराभिमुखमाततान । स्थाने चैतदत्यन्तपरतन्त्रमात्मस्वरूपमभिविदुषः । सद्यो मुनिवरस्य स्कन्धमध्यास्त बद्धाञ्जलिपुटः पाणसूरिः अनुसंधातुमारेभे च * अमलनादिपिरानित्युपक्रमशालिनमनुपमं (स्वकीयं) दिव्यप्रबन्धम् । तत्र प्रथमगाथायां प्रथमचरणे चरितमिदमंशतस्सूचयामास च * अडियार्क्कॆन्नै आट्पडुत्त विमलन् * इति । भागवतपारतन्त्र्यसीमाभूमौ निवेशितोऽभूवमहं भगवतेति तदर्थः ।

स्कन्धाधिरोपितपाणसूरिर्मुनिसार्वभौमः श्रीरङ्गनाथदिव्यालये $ आमोदस्तम्भपरिसरं प्राप्य शेषशायिनो भगवतः पुरस्तादवातारयदमुं तथा, यथा ह्यातिवाहिकगणो मुक्तात्मानं नीत्वा श्रीमदानन्दमन्दिरमहामणिमण्डपान्तरवतारयति ।

अमुनैवेतिहासेन मुनिवाहन इति नाम्ना प्रथमान एष सूरिवरः श्रीरङ्गनाथदिव्यमङ्गलविग्रहमापादचूडमनुभूय मुदितान्तरात्मा स्वात्मनयनयोरन्यविषयविमुखतां संकीर्त्य स्वकीयं दिव्यप्रबन्धं दशगाथात्मकं श्रीरङ्गनाथदिव्यावयवसुषमाभिवर्णनविचक्षणं परिसमाप्य सद्यो विलक्षणभगवदङ्गीकारभाग्यभूमानमासेदिवान् तत्पादारविन्दयोरन्तर्हित एकतत्त्वभावमवजगाहे । तमिममतिशयं तदात्वे तत्रस्थितास्सर्वेऽपि सानन्दं साक्षात्कृत्य विस्मयस्तिमितमानसा अभूवन् ।

गोपालो भगवान् यथा दिव्यवेणुनादेन गोकुलं प्राहर्षयत्तथा निजदिव्यवीणागानकनिनदेन भगवन्तमच्युतं शेषशायिनं हर्षप्रकर्षविवशहृदयं कृतवानेष दिव्यसूरिवरः पञ्चाशतं हायनानिह लीलाविभूत्यामत्यपातयदिति वदन्ति सन्तः ।

भगवान् वेदान्तदेशिको गुरुसार्वभौम एतस्मिन्पाणसूरावतिमात्रमप्रतिमं प्रावण्यं प्रकाशयन् अदसीयं दिव्यप्रबन्धं मुनिवाहनभोगनाम्ना कृतिरत्नेन व्याचक्षाणश्च प्रख्यापयामास वैभवमेतदीयमप्रमेयम् ।

इत्थं श्रीपाणसूरीन्द्रवैभवं ध्यायतां सताम् । काले जायेत सायुज्यमच्युतस्य रमापतेः ॥

॥ इति श्रीमुनिवाहनसूरिवैभवं समाप्तम् ॥

॥ अथ श्रीपरकालमुनीन्द्रवैभवम् ॥

मासे वृश्चिकनामनि कार्तिकभे जन्म भेजुषस्सूरेः ।
श्रीमत्कलिविध्वंसिन उदीरयामः प्रभावमतिहृद्यम् ॥

चोलमण्डले * तिरुमङ्गै * इति नाम्ना प्रथमानो विराजते कोऽपि जनपदविशेषः । तत्र सुप्रसिद्धतया विलसतस्तिरुनगरीति व्यवह्रियमाणस्य दिव्यदेशस्य संनिकर्षे * तिरुक्कुरैयलूरिति प्रथिते दिव्यस्थले चतुर्थे वर्णे कोऽपि महानवततार कार्तिकमासि कृत्तिकर्क्षे चोलदेशाधिपतिसेनापतेस्तनूभवात्मना । अथ नील इति नाम चक्रेऽस्य पिता । क्रमेण संवर्धमानः कुमारोऽयमेव परकालसूरिरिति कलिध्वंसिसूरिरिति च परस्तात्पप्रथे ।

$ गर्भगृहान्तर्भगवतस्सन्निकर्षे विराजमानं स्तम्भद्वयमामोदस्तम्भनामतः प्रथितम् ।

सोऽयं स्वकीयकुलानुगुणतया बाल्य एव संशिक्षितहेतिविद्यस्समुत्तीर्णश्चोलभूभुजा स्वकीयसेनाधिपतिपदव्यामभिषेचितस्सन् प्रभोः प्रतिपक्षिभिस्सह प्रबलयुद्धेषु संभवत्सु स्वयमेव सानीकोऽभियाता प्रहर्ता च भवन् विचित्रेणोल्बणेन स्वविक्रमेण परानशेषान् पराजितान्कृत्वा परकाल इति नाम प्रतिपेदे । अत एव हर्षप्रकर्षपरवशहृदयः प्रभुवरः तमिमं * तिरुमङ्गैनाम्नस्तस्य जनपदस्य पालकत्वेन चाभ्यषिञ्चत् । अथ * तिरुमङ्गैमन्ननिति नाम प्राप्विानसौ राज्यधुरन्धरत्वमन्यादृशमवहत्प्रकाशयच्च । एवं गच्छति कालोऽस्य ।

तस्मिन् जनपदे * अण्णन्कोयिलिति व्यवह्रियमाणे श्वेततटाकनाम्नि दिव्यदेशे तन्नामशालिनि कमलसरसि देवलोकादमरललना भूयस्यः प्रत्यहमागत्य कलितसलिलविहरणाः प्रतिनिवर्तमाना आसन् । तास्वन्यतमा काचन लक्ष्मीनाम्नी सुन्दरी स्वेच्छया दैवं वपुरपहाय मानुषं वपुरास्थाय तत्र कुमुदकुसुमापचयव्यग्राऽऽसीदेकाकिनी । तदात्वे तत्रानुष्ठानार्थमुपस्थितः कोऽपि वैष्णवो वैद्यस्तामवेक्ष्य कास्विदसि त्वमिति पप्रच्छ । 'मया साकमागता योषितो मामिह विसृज्य निर्ययुः ; अशरणां मामभिरक्षितुमर्हति तत्रभवान्' इति तया प्रार्थितस्स परमानन्दसंदोहकन्दलितस्वान्तः अनपत्यताविषादमात्मनः प्रनष्टं मन्वानः तथेत्यभ्युपगम्य तां स्वकीयं शरणमुपगमय्य, दैवलम्भितमिदमपत्यरत्नं सुष्ठु संरक्षेति कलत्रहस्ते प्रदाय, कुमुदकुसुमापचयवैयग्र्यहेतुना कुमुदवल्लीति नाम च चक्रे तस्याः कन्यायाः ।

क्रमेण च सा जगाहे विवाहोचितं वयः । * पतिसंयोगसुलभं वयो दृष्ट्वा च मे पिता । चिन्तार्णवगतः पारं नाससादाप्लवो यथा * इति जनकात्मजाप्रोक्तप्रक्रियया भिषजस्तस्य कन्यापितुर्विचारो विजजृम्भे । गुणगणसिन्धोः कन्यारत्नस्यास्य पतिरनुरूपः किमिह जगति वर्तत इति विचारविह्वलस्समभूदसौ ।

अथ तस्या रूपलावण्यसौन्दर्यातिशयमप्रतिमगुणपूर्तिं कर्णाकर्णिकया निशमयन् परकालस्तामवेक्षितुमुत्कण्ठामुत्कटामुद्वहन् राज्यकार्याणि चोपेक्षमाणो भिषजस्तस्य भवनमुपगम्य तेन सह संभाषमाणः कन्यका च तां समीक्ष्य विस्मितः तस्या वृत्तान्तमनुयुज्यावगत्य तत्पाणिग्रहणे स्वस्याभिरुचिमुदजीघटत् । भिषक् च तथा करवाणीति सप्रमोदं मनसि कलयन् कन्यकाया अभिसन्धिमवगन्तुमैहत । सा च चक्राङ्कनोर्ध्वपुण्ड्रधारणादिपञ्चसंस्कारपरिकर्मविरहित श्रीवैष्णवेतरं नाहमुद्वहेयमिति स्वकीयं द्रढीयांसमध्यवसायमाविश्चकार ।

स्थाने सोऽयमध्यवसायोऽस्या इत्यभिनन्दन् परकालस्तथैव भविष्यतीत्यभिधाय प्रतिनिवृत्तः ¶ सुगन्धवनदिव्यदेशाधीशस्य भगवतस्सन्निधिमुपेत्य प्रार्थ्य शङ्खचक्राङ्कनमुपलभ्य द्वादशोर्ध्वपुण्ड्रमण्डनमण्डितदिव्यगात्रस्सन् पाणिग्रहणमङ्गलाय पुनस्समाययौ कुमुदवल्लीसनीडम् ।

पुनश्च सा संजगाद—संवत्सरावधि नित्यं सहस्रं श्रीवैष्णवान् भोजयित्वा तेषां श्रीपादतीर्थं स्वीकृत्य भुक्तशिष्टं च भुक्त्वा पवित्रो भूयाः, अथ ते पाणिं गृह्णीयाम्, न त्वन्यथेति । यदसौ परकालस्तस्यामतिमात्रमभिनिवेशमावहत् तदङ्गीचकार दुष्करं महत्तरं तदपि कृत्यं तथैव निर्वहेयमिति । एवं नाम

¶ तिरुनरैयूरिति शुभनाम्ना प्रसिद्धोऽयं दिव्यदेशः कुम्भघोणक्षेत्रसंनिकृष्टः ॥

प्रतिज्ञां द्रढीयसीं स्वीकृत्य सा तमुपयेमे । यथाप्रतिश्रवं च परकालो नित्यं भागवताराधनं विशेषतस्संप्रवर्तयति-राजद्रव्यमपरिमितं यतो हि स्वाधीनमास्ते । क्रमशश्च भूपतिरजानात्परकालस्तावदस्मदीयवित्तव्ययेन भूयिष्ठां भागवताराधनामन्वहं प्रवर्तयतीति । अथ च भटद्वारा तीक्ष्णामाज्ञामावेदयामास । स परकालाय द्रव्यमशेषमविलम्बेन कोशागारं प्रापयितव्यमिति । अथाप्येष 'श्वः परश्वः प्रातस्सायं पश्चा' च्छब्दैरेव व्यवधिमावेदयन्नास्त । तदनु राजभटास्ते चक्ररतिदारुणं निर्बन्धमिति धिक्कृता अधावन् । विदितैतद्वार्तो महीपतिर्महताऽमर्षेण कषायिताक्षोऽथ सेनापतिमादिदेश सत्वरमवस्कन्द्य समानय परकालमिहेति । स च सानीकस्सजवं समुपेत्य परकालमिममभिभवितुमयतत । तदात्वे सोऽयं शूराग्रणीः 'आडल्मा' इति नाम्ना प्रसिद्धं स्वकीयं तुरगवरमधिरुह्य सनाथश्च सन् सेनाभिः अभियाता प्रहर्ता च भूत्वा परसैन्यं कान्दिशीकमाकलय्य विशेषतो विरेजे विजयश्रिया । तदिदं वृत्तमवजग्मिवानवनीपतिः स्वयमेव सहानीकस्समागत्य परकालमभिभवितुमारभमाणः प्रापश्यदस्य विक्रममसमाभ्यधिकम् । अत एव च स विस्मयविवशहृदयो भृशं प्रहृष्टस्तमिममभिनन्द्य क्षिप्रमेव देयं द्रव्यमुपह्रियतामित्यभिधाय विधाय चैनं मन्त्रिवशंवदं विजगाहे निजमावसथम् !

स च सचिवस्तमिमं परकालं कञ्चन देवालये बद्धं न्यधत्त । तत्रासौ तिस्रो रात्रीरुपवसतिस्म । अथ भगवान् श्रीहस्तिशैलशिखरोज्ज्वलपारिजातो देवाधिराजः स्वप्नेऽस्य दिव्यदर्शनं दिशन्नादिदेश—समायाहि काञ्चीं, तत्र यथेष्टं वित्तं वितराणीति । अथ च स निरवग्रहे भगवदनुग्रहे समिन्धानविस्रम्भस्सचिवसकाशे समगिरत 'काञ्चीक्षेत्रे निधिरस्ति ; तत्रागत्य गृहाण वित्तमिति । ओमिति प्रस्थितेन तेन सह काञ्चीमुपागतः परकालो निधिमलभमानो विषादविक्लवो मूर्च्छितो बभूव । तदनु वरदाधिराजः पुनरपि स्वप्ने समुपेत्य मा भैषीरित्यभयमनुगृह्णन् वेगवतीसरित्तटे निधिसद्भावस्थलं निर्दिश्यान्तरधीयत ।

अथ प्रबुद्धः परकालो भगवन्निर्दिष्टस्थले निधिमुपलभ्य राज्ञे देयमर्थं निश्शेषं विश्राण्य, अवशिष्टेन भागवताराधनं सानन्दं निर्वर्तयन्नवर्तत । राजा चास्य वैभवमप्रमेयमवगत्य विस्मयार्णवमग्नमानसो विशेषतोऽमुमुपचर्य, अस्मात्स्वीकृतमर्थराशिं कोशागारे निक्षेप्तुमनुत्सहमानो भागवताराधने तमशेषं विनियुज्य शुध्यतिस्म ।

॥ श्रीमदालि श्रीनगरीभगवद्रूपामोषणोद्यमः ॥

भगवता देवाधिराजेन प्रदर्शितो निधिरपि क्रमशो निरवशेषोऽभूत्तदीयाराधनभूम्ना । पुनरपि द्रव्यलिप्सा ववृधे । * न कंचन वसतौ प्रत्याचक्षीत, तद्व्रतम् ; तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् * इत्यौपनिषदमुपदेशमनुध्यायन्निव परकालः स्तेयचतुरैश्चतुर्भिस्सह तस्करैस्तत्रतत्र गत्वा द्रव्याण्यपहृत्य तदीयाराधनकैङ्कर्यमनुवर्तयन्नवर्तत । अकृत्यमपि स्तेयमिदं सत्कार्यनिर्वहणदृष्ट्या खलु संपद्यत इति संतोषतः प्रसन्नान्तरङ्गः परमः पुमान् श्रीमान्नारायणः परमसुकृतकारिष्वग्रगण्यमेव परकालं मन्वानस्तमिमं विशेषकटाक्षपात्रतां नेतुं संकल्पयन् अनर्घबहुभूषणभूषिताङ्गवैवाहिकब्राह्मणवेषधारी सन् सपत्नीकस्समाययौ, यस्मिन्पथि चरति परकालस्तत्रैव । स्तेयाय पान्थान् प्रतीक्ष्य 'तिरुमणम् कोल्लै' इति सुप्रसिद्धे स्थले अश्वत्थानोकहमूले निलीनस्स्थितः परकालः प्रेक्ष्य हर्षप्रकर्षविवशान्तरङ्ग आयुधपाणिः परिवारेण साकमुपसृप्य तौ दम्पती अवस्कन्द्य अस्त्रभूषणादि सर्वमपहरन् वरस्य

पादाङ्गुष्ठे विराजमानमनर्घमङ्गुलीयकं हस्तेन निष्कासयितुमशक्नुवन् दशनतो निष्कास्य, अथ हृतं सर्वमपि वस्तुजातमेकभारात्मना निबद्ध्य समुद्धर्तुं सुबहु प्रयतमानोऽपि भूतलान्मात्रयाऽपि चालयितुमप्यपारयन् किमेतत् ! कथमेवमिति विस्मयमानस्तमेव वरं वीक्ष्य 'भो ब्राह्मण ! किमु कमपि मन्त्रबन्धमकार्षीः ? सत्यं वद तावत्' इति निशितकरवालप्रदर्शनपूर्वकं भीषणं वचो व्याजहार । तदा सर्वेश्वरस्वरूपी स वरः 'सत्यं मन्त्रबद्ध एव कृतो मया, शृणु तावत्तमिमं मन्त्रम्, आयाहि समीपतः' इत्याहूय सकलवेदसारभूतमष्टाक्षरमहामन्त्रमुपदिश्य कर्णमूले सद्यो गरुत्मन्तमधिरुह्य दिव्यं दर्शनं चादिशत् ।

॥ दिव्यप्रबन्धरचनोपक्रमः ॥

पादाङ्गुलीयकनिष्कासनार्थभगवत्पादारविन्ददशनप्रभावतो मन्त्रराजोपदेशप्राप्तितो दिव्यमङ्गलविग्रहदर्शनलाभतश्च समूलनिहताज्ञानान्धतमसः समुदिततत्त्वज्ञानज्योतिर्विकासश्च परकालसूरिः भगवन्तं परिपूर्णानुभवगोचरमाकलय्य तादृशानुभवजनितमानन्दातिशयं परीवाहसापेक्षं पश्यन् आशुकवित्वमधुरकवित्वचित्रकवित्वविस्तृतकवित्वबिरुदभाक्त्वानुगुण्येन द्राविडब्रह्मसंहिताव्यपदेशभाग्सुरान् दिव्यप्रबन्धान् प्रादुर्भावयितुमुपाक्रंस्त । श्रीशठकोपमुनिवरेण चतुर्वेदसारभूताश्चत्वारो दिव्यप्रबन्धा ये प्राकाश्यन्त, तदङ्गभूताष्षड्दिव्यप्रबन्धा अनेन परकालसूरिणा प्राकाशिषतेति संप्रदायः । ते चामी षट् प्रबन्धाः १. पेरियतिरुमोलि. २. तिरुक्कुरुन्ताण्डगम्. ३. तिरुवेलुकूतिरुक्कै. ४. शिरियतिरुमडल्. ५. पेरियतिरुमडल्. ६. तिरुनेडुन्ताण्डगम् इति नामभिः प्रथन्ते । शठकोपमुनीन्द्रस्तु स्वकीयान् दिव्यप्रबन्धान् तिन्त्रिणीमूलधामा सन्नेव प्राचीकशत्; दिव्यदेशाधिनाथास्ते ते भगवदर्चामूर्तिविशेषास्तत्रैव सन्निधाय तस्मै दर्शनं ददुः । असौ तु परकालयोगी स्वयं पद्भ्यां व्रजन् दिव्यदेशान् संसेव्य दिव्यप्रबन्धाननुजग्राहेति च संप्रदायविदस्संगिरन्ते । परमकारुणिकेन भगवता कर्णकुहरोपदिष्टस्य श्रीमदष्टाक्षरमहामन्त्रस्यैव महिमानं प्रथमतो वर्णयितुमुपक्रम्य * वाडिनेन् वाडीत्युपक्रमशालि प्रथमदशकमभिधाय, यत्र स मन्त्रराजः प्रादुरभूत्तत्र बदरिकाश्रमे च जिगमिषुः प्रस्थाय तदादि सर्वान्दिव्यदेशानासेवमानो दिव्यगाथाश्च कीर्तयन् पर्यटतिस्म ॥

॥ श्रीपरकालमुनेर्दिव्यदेशयात्रा ॥

श्रीसरोयोगिप्रभृतीनां सर्वेषामपि दिव्यसूरिवराणां दिव्यदेशप्रावण्यातिशयसद्भावेऽपि विशिष्यासौ मुनिवरो दिव्यदेशानुभवैकनिष्णातः पप्रथे । * तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते * इति । ब्रह्मज्ञानादतिरिक्तं मुक्तिसाधनं नास्तीति सुदृढमब्रवीदुपनिषत् । एष तु मुनिसार्वभौमो दिव्यदेशप्रावण्यादतिरिक्तं मुक्तिसाधनं नैवास्तीति स्वसिद्धान्तमनर्गलमुदजीघटत् । तिरुक्कुरुन्ताण्डगसमाख्ये स्वकीये द्वैतीयीके दिव्यप्रबन्धे एकोनविंशगाथायामसुमर्थमनुसमधत्त—* उलहमेत्तुम् कण्डियूररङ्गम् मेय्यम् कच्चिपेर्मल्लैयेन्नु, मण्डिनारुय्यलल्लाल् मत्तैयाक्कुय्यलामे * इति ।

स्वानुष्ठानसंवादी परोपदेश एव प्रशस्यत इति कलयन् स्वयमशेषेषु दिव्यदेशेष्वतिमात्रमवजगाहे । श्रीबदरिकाश्रम - सालग्राम - नैमिशारण्य - श्रीमदहोबिल - श्रीवेङ्कटाचलप्रभृतिदिव्यदेशमार्गेण श्रीरङ्गक्षेत्रमासाद्य, तत्र विमानमण्डपगोपुरप्राकारादिनिर्मापणाय भगवता श्रीमता रङ्गनाथेन सहुमानं नियुक्तोऽसौ मुनिवरः

" जितबाह्यजिनादिमणिप्रतिमा अपि वैदिकयन्निव रङ्गपुरे ।
मणिमण्डपवप्रगणान् विदधे परकालकविः प्रणमेमहि तान् ॥ "

इति श्रीरङ्गराजस्तवे श्रीपराशरभट्टार्यप्रोक्तरीत्या तादृशं सुमहत्तरं कैङ्कर्यमचिरेण निरवर्तयत् । चोलमण्डले नागपट्टण-नाम्नि स्थले बौद्धास्सौवर्णं बुद्धविग्रहं संस्थाप्य प्रणमन्तीति श्रुत्वा तदपहारे कृते विशेषतो भगवत्कैङ्कर्याणि सुकराणि भवेयुरिति प्रतिपद्यमानोऽसौ परकालसूरिस्सपरिवारस्तत्र गत्वा निशीथे तद्विग्रहोत्पाटनसदुपायांश्च चातुर्येणावुद्ध्य सद्य एव समुत्पाट्य समानीय तद्विक्रयलब्धेनापरिमितेन वित्तेन, एवमेवमार्जितैश्चामितैरर्थराशिरनघमनर्घं च कैङ्कर्यबृन्द-मुदजृम्भयत् । * योऽसाधुभ्योऽर्थमादाय साधुभ्यस्संप्रयच्छतीति शास्त्रार्थोऽस्मिन् विशिष्य फलेग्रहिरभूत् । एवंनाम परमाद्भुतनानाकैङ्कर्यनिर्वहणेन भगवन्तं रङ्गनाथं सुप्रसन्नहृदयमाकलय्य ततोऽनुज्ञामुपलभ्य प्रस्थाय मार्गक्रमेण पाण्ड्यकेरलमण्डलान्तर्गतानपि दिव्यदेशान् संसेव्य स्वानुभवपरीवाहरूपाश्च दिव्यगाथा जगति सुप्रसिद्धा विरचय्य दिव्यं धाम निषेवितुकामो भगवच्चरणारविन्दयोरार्तप्रपत्तिमाकलय्य तत्कृपया श्रीवैकुण्ठमुपेत्य नित्यकैङ्कर्य निरत आसीत् ॥

एवं श्रीपरकालस्य सूरेर्वैभवमद्भुतम् । ध्यायतां नियमेन स्युर्ज्ञानभक्तिविरक्तयः ॥

इति श्रीपरकालसूरीन्द्रवैभवं समाप्तम् ॥

॥ अथ मधुरकविसूरिवैभवम् ॥

श्रीमच्छठरिपुमुनिवरशिष्यप्रवरस्य मधुरकविनाम्नः । मेषे चित्रोडुनि भुव्यवतीर्णस्य प्रभावमभिदध्मः ॥

श्रीमच्छठकोपमुनीन्द्रावतारमहित श्रीकुरुकापुरीसन्निहिते तिरुक्कोलूरुनाम्नि दिव्यदेशे मेषमासि चित्रानक्षत्रे पुरश्चूडब्राह्मणोत्तमकुले कोऽपि महानवततार । [असावेव मधुरकविः ।] सूर्योदयतः पुरस्तादरुणोदयवत् वकुलभूषण-भास्करोदयतः प्रागेव सोऽयं महानवतीर्णः काले काले यथाविधि चौलोपनयनादिसंस्कारसंपन्नो वेदवेदाङ्गादिनिखिल-मधीत्य तत्त्वविदामग्रणीः प्रचकाशे । कर्णामृतदिव्यसूक्तिग्रथनचतुरतया मधुरकविरिति नाम दिव्यमविन्दत । भक्तिभूम्ना सोयं क्षेत्रतीर्थयात्रासु हेवाकी प्रस्थित उत्तरभारते पर्यट्य साकेतनगरमधिगत्य तत्र श्रीरामसीतागुणानुभव-तत्पर उवास ।

तदा कदाचिदसौ नक्तं दक्षिणां दिशमुदीक्षमाणस्तत्र रोदसी व्याप्य विशेषतः प्रकाशमानमप्रतिमदिव्य-तेजःपुञ्जमवलोक्य तत्तत्त्वमजानन् ' ग्रामनगरादिकं दह्यते किमु ! दारुणो दावानलः किमु ! ' इत्येवमाशङ्कमानः किमपि किमपि निर्धारयितुमप्रभविष्णुरवतस्थे । अनारतमेवमवेक्षमाणस्स सूर्यचन्द्राग्नितेजःपुञ्जादप्यतिशयेन विभास-मानस्यास्य विलक्षणस्य तेजसस्तत्त्वमवगन्तव्यमिति कुतूहलेन तमेव प्रभापुञ्जं लक्ष्यपदे निधाय प्रस्थितो महता जवेन द्राघीयांसं पन्थानमतीत्य कुरुकापुरीमुपेत्य तत्र श्रीमतो वकुलाभरणमुनीन्द्रस्य दिव्यमङ्गलविग्रहं तेजसां राशिमूर्जित-मिव स्थितमासेव्य सोऽयमेव तेजोराशिरुत्तरस्यां दिशि ददृशेऽस्माभिरित्यवधार्य, शठकोपमुनीन्द्रस्य तस्य अप्राकृत-मूर्तिसन्निवेशमवाङ्मनसगोचरवैभवास्पदमवेक्ष्य तच्चरणारविन्दयुगलैकशरणस्तदेकशिष्यो बभूव ।

तदा स मुनीन्द्रः पञ्चभिस्संस्कारैरिमं संस्कृत्य स्वीकृत्य, अर्चावतारवेदस्वरूपान् चतुर्वेदसारभूतान् दिव्य-प्रबन्धाननुगृह्य तानस्मा उपदिश्य एतद्द्वारा जगति लब्धप्रचारानकार्षीत् ।

स एष मधुरकविर्भरतैकप्रवणश्शत्रुघ्न इव भागवतप्रावण्यमेव साधीयः प्रतिपद्यमानः श्रीशठकोपमुनीन्द्रेऽस्मि-न्नेव परमदेवताप्रतिपत्तिमप्रधृष्यामुद्वहन् * कण्णिनुण् शिरुत्ताम्बुनाम्ना प्रसिद्धं लघु दिव्यप्रबन्धरत्नं च तद्विषयकं विज्ञाप्य स्वकीयमनुपममध्यवसायं विश्वप्रसिद्धं वितेने ।

कालक्रमेण च दिव्यं धाम जग्मुषि शठकोपमुनीन्द्रे आचार्यविश्लेषमसहमानः परितप्य क्रमेण समाश्वस्य तस्यैव कीर्तिततीर्जगति प्रथयन्नथ जगाहे गुरुचरणचरणारुणनलिनपरिसरम् ॥

इत्थं श्रीमधुरकवेः शठकोपमुनीन्द्रचरणशरणस्य । वैभवमात्मनि दधतामाविस्स्युस्सकलसंपदः क्रमशः ॥

इति श्रीमधुरकविवैभवं समाप्तम् ॥

इति श्रीकाञ्ची प्रतिवादिभयङ्कर अण्णङ्गराचार्यस्य कृतिषु

॥ दिव्यसूरिकथामृतं समाप्तम् ॥

॥ श्रीरस्तु ॥

॥ श्रीमते शठकोपमहामुनये नमः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमद्वरवरमुनये नमः ॥

॥ पूर्वाचार्यवैभवसंग्रहः ॥

(श्रीकाञ्ची. प्रतिवादिभयङ्कर अण्णङ्गराचार्यलिखितः ।)

श्रीमद्वैष्णवसंप्रदायसरणिप्रख्यापनप्रोल्लसत्ख्यातीनामिह नाथयामुनयतिक्ष्मामृन्मुखानां सताम् ।
आर्याणां परमं पवित्रमनघं चारित्रमत्यद्भुतं पूर्वैर्द्राविडभाषया प्रकटितं दैव्या गिरा प्रस्तुमः ॥

परमपावन श्रीवैष्णवसंप्रदायप्रवर्तनधुरन्धराणां द्राविडाम्नायव्यपदेशभासुरदिव्यप्रबन्धप्रणयनप्रख्यातानां दिव्य-सूरिवराणां विलक्षणं वैभवं प्रागुपावर्णयाम ।

अथ तेषां दिव्यसूक्तिततीर्बहुभिः प्रकारैः परिपोष्य श्रीवैष्णवदर्शनसमुद्धारकैङ्कर्यमनघमाकलितवतां श्रीम-न्नाथमुनिप्रभृतीनां पूर्वाचार्यव्यपदेशभाजां गुरुवराणां प्रभावं संक्षेपतः प्रकाशयामः ।

आचार्यगोष्ठ्यां प्राथमिकं स्थानमलङ्करोति भगवान्नाथमुनिः । दिव्यसूरिषु चरमस्य श्रीमत्परकालमुनीन्द्रस्य कालादनन्तरं श्रीवैष्णवदर्शननिर्वाहकसदाचार्यावतारविरहेण हन्त ! बहुतिथः कालोऽन्धतमससमयो व्यतीयाय । अथ च परमकारुणिकः परमः पुमान् हार्दतमोनिरसनपुरस्सरसदसद्विवेचनात्मकज्ञानप्राचुर्यसंपिपादयिषया श्रीमन्नाथमुनिप्रमुखान् सदाचार्यसार्वभौमान् भौमानाकलय्य तेषामुपदेशैः दिव्यग्रन्थैः अनुष्ठानैरनुष्ठापनैश्च जगदिदं समुज्जीवयामास । तत्तादृशानां महावैभवानामाचार्यवर्याणां पवित्रं चरित्रमस्माकमनवरतमनुसन्धेयमिह ॥

॥ इत्युपोद्घातः ॥

॥ श्रीमन्नाथमुनिवैभवम् ॥

* नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धैः सम्यक् त्रातं यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः * इति श्रीवेदान्ताचार्यवर्योक्तरीत्या दर्शनमस्मदीयं श्रीमन्नाथमुनिसमाख्यगुरुवरोपज्ञम् । सोऽयं महान् दक्षिणस्यां दिशि चिदम्बरक्षेत्रप्रान्ते * काट्टुमन्नार् सन्निधिरिति व्यावहारिकनाम्ना सुप्रसिद्धे वीरनारायणपुरे मिथुनमासि अनूराधानक्षत्रे ईश्वरमुनीनामात्मजन्मा सन्नवततार । यथाकालं चौलोपनयनादिभिस्संस्कृतो वेदवेदाङ्गसामान्यशास्त्राध्यात्मशास्त्रादीन्यधीत्य महाविद्वान् विरेजे । ईश्वरभट्टाळ्वानभिधान आत्मजश्चासीदेतस्य । तस्यैव पुत्ररत्नं यामुनाचार्य इति प्रथितः स्तोत्ररत्नादिप्रणेता गुरुसार्वभौम इति ध्येयम् ।

श्रीमानेष नाथमुनिः स्वकीयामेव जन्मभूमिमधिवसन् वीरनारायणस्य भगवतो विविधा वरिवस्या विरचयन् विरराज ।

अथ कदाचित् * सिंहाचलं श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम् , श्रीमद्द्वारवतीप्रयागमथुरायोध्यागयापुष्करं सालग्रामगिरिमित्युपवर्णितेषु सुप्रथितेषु औत्तरदिव्यक्षेत्रतीर्थेषु सेवां कामयमानो भगवदनुज्ञां परिगृह्य सपरिवारः प्रस्थाय पर्यटन् उत्तरभारते बहुतिथं कालमयापयत् । अथ च भगवदाज्ञया दक्षिणां दिशमभ्येत्य श्रीरङ्गादिदिव्यदेशांश्च संसेव्य स्वीयं जन्मधाम समासाद्य भगवद्भागवतकैङ्कर्यनिर्वाहधूर्वहस्सन् अध्यात्मशास्त्रप्रवचनपरायणश्च समुल्ललास ।

एवं गच्छति काले कदाचन श्रीयादवाद्रिप्रान्ततः केचन श्रीवैष्णवास्तत्रागत्य श्रीवीरनारायणभगवन्मन्दिरे नानाविधानि स्तोत्राणि स्वाधीतानि श्रुतिमधुरसुस्वरोदञ्चितमुद्गृणन्तो मध्ये श्रीशठकोपमुनीन्द्रानुगृहीतद्रमिडोपनिषत्समाख्यसहस्रगीत्यन्तर्गतं [पञ्चमशतकीय-अष्टमदशकात्मकम्] * आरावमुदे अडियेनुडलम् * इत्येतद्दशकं च श्रुतिसुभगमनुसंदधिरे ।

तस्य च दशकस्य चरमगाथायाम्—* ओरायिरत्तुळ्ळिप्पत्तुम् * [श्रीशठकोपमुनिप्रणीतासु सहस्रसंख्याकदिव्यगाथासु इदं दशकम्] इत्यनुसन्धीयमानं वाक्यमाकर्णितवान् नाथमुनिः एवं नाम सहस्रं गाथा अवतीर्णास्सन्तीत्यवगच्छन्ताननुसन्धातृमहाभागान् पप्रच्छ—" भो भगवन्तः! अपि जानन्ति भवन्तः सहस्रमपि गाथा " इति । ते च प्रोचुः एतद्दशकमेव गाथानां जानीमः, न पुनरन्यत्किमपीति । अथ पुनरन्वयुङ्क्त नाथमुनिः—यद्यपि न

जानन्ति श्रीमन्तः, ज्ञातारः केऽपि सन्ति वा भवदीयधामप्रान्तेष्विति । नैवेत्येव ते प्रत्युत्तरमुदीर्य भगवत्तीर्थप्रसादादिकं स्वीकृत्य निश्चक्रमुः ।

ततः प्रभृति नाथमुनिरहर्निशमनयैव चिन्तया भृशमभ्यभूयत । आकर्णितस्य दशकस्यावसाने "कुरुकापुरावतीर्णशठकोपमुनिप्रणीते सहस्रे" इति खलु वाग्विन्यास आसीत्; ततश्च श्रीशठकोपमुनीन्द्रस्य जन्मस्थलीं श्रीकुरुकापुरीमधिगत्य तत्र विचारयामीत्यध्यवस्यन् भगवदनुज्ञां स्वीकृत्य प्रस्थितः प्राप तामेव ताम्रपर्णीतीरस्थितां कुरुकापुरीं मार्गक्रमेण ।

तत्र च भगवन्तमादिनाथं श्रीशठकोपमुनीन्द्रं च सुष्ठु संसेव्य श्रीमधुरकवेः शिष्यपरम्परायां स्थितं श्रीपराङ्कुशदासनामानं स्वामिनं सुहृदमवाप्य तत्सकाशे न्यवेदयत् स्वागमनप्रयोजनमेष नाथमुनिः । "शठरिपुकथिता दशशतगाथाः कोऽपि महानिह जानाति किमु ? अथ वा पुस्तकमस्ति किमत्र ? " इति तावदप्राक्षीत् । स च महानेवं प्रत्यब्रूत— 'भगो ! श्रीशठकोपमुनीन्द्रफणितय इतरदिव्यसूरिवरदिव्यसूक्तयश्च बहुतिथादेव कालात्प्राक् प्रमुषितप्रचारा अभूवन्निति शृणुमः । तथाऽप्यस्मत्कुलकूटस्थेन श्रीमन्मधुरकविनाऽनुगृहीतं कण्णिनुण्शिरुत्ताम्बु समाख्यं श्रीशठकोपमुनीन्द्रस्तोत्ररूपं गाथादशकमस्ति तावदिह । तदिदं शठारेर्मुनेरग्रतो द्वादशसहस्रकृत्वो नियमविशेषसनाथं जपतां सतां मुनिवरानुग्रहभूम्ना समीहितसिद्धिर्भवित्रीति महद्वचः श्रुतमस्ति नः इति ।

तदिदं निशम्य नाथमुनिः प्रसन्नचेताः परमानन्दपारावारनिमग्नान्तरङ्गस्तं प्रणिपत्य 'भगवन् ! मधुरकविभिरुदीरितं तत्प्रबन्धरत्नं कृपया मह्यमुपदिशतु तत्रभवान्' इति प्रार्थ्य प्राप्य च ततस्तदुपदेशं दिव्यतिन्त्रिणीतरुमूले निषद्य सनियमं द्वादशसहस्रकृत्वो जजाप, शुश्राव च तदवसाने श्रीमहालक्ष्मीप्रेरणया प्रादुर्भूतस्य शठकोपमुनिवरस्य वाचम् आकाशवाणीमिव समुन्मिषितां किं ते समीहितमभिधत्स्वेति । अथ तदाकर्णनजाह्लादशीतनेत्राम्बुः पुलकाञ्चितगात्रश्च नाथमुनिर्बद्धाञ्जलिपुटस्सन् व्यजिज्ञपदेवम्—स्वामिन् परमकरुणानिधे ! सहस्रगीतिप्रमुखान् अशेषानपि दिव्यप्रबन्धाननुगृहाणेति । प्रार्थित एवं श्रीवकुलाभरणमुनीन्द्रः परमप्रीतिविवशान्तरङ्गः * दिव्यं ददामि ते चक्षुः इतीवानुगृह्य रहस्यत्रयं चतुस्सहस्रीम् दर्शनदिव्यार्थान् अष्टाङ्गयोगरहस्यं च योगदशायां प्रसाद्यान्तरधीयत ।

श्रीवेदान्ताचार्यप्रणीते संप्रदायपरिशुद्ध्याख्ये रहस्यप्रबन्धे द्राविडभाषया प्रोक्तमित्थम्—"एतद्युगारम्भे ब्रह्मनन्द्यादिभ्यः परस्तात् वेदान्तसंप्रदायस्य प्रवर्तकोऽभूत् श्रीशठकोपमुनीन्द्रः" इति । "प्रादुर्भावविशेषतो नाथमुनेः शठकोपमुनिराचार्यो बभूव" इति च । तैरेवोक्तं गुरुपरम्परासारे च—"श्रीमन्नाथमुनेर्योगदशायां साक्षात्कृत शठकोपसूरिराचार्यभावमापेदे" इति ।

"व्योम्नः परस्तात्सविधं समेत्य लक्ष्मीनियोगात्कुरुकाधिराजः ।
समन्त्ररत्नद्वयमाह यस्मै नाथाय तस्मै मुनये नमोऽस्तु ॥"

इतीदं प्राचीनं पद्यरत्नं चात्रानुसन्धेयम् ।

एवं श्रीशठकोपमुनीन्द्रसन्निधानादधिगतसर्वस्वः कृतकृत्यो नाथमुनिरथ किञ्चित्कालपर्यन्तं श्रीकुरुकापुर्यामेव सुसुखं निवसन् तत्रत्यान् श्रीवैष्णवान् द्राविडाम्नायवेदिनो विरचय्य, तदनु स्वदेशगमनाभ्यनुज्ञामासाद्य मार्गस्थान् दिव्यदेशानासेवमानः तत्र तत्र दिव्यप्रबन्धामृतवर्षुकश्च सन् क्रमेण निजं धाम समुपेत्य, दिव्यप्रबन्धां-

स्तान् शतमुखप्रचारभासुरान् कर्तुं भगवदाज्ञामुपलभ्य स्वकीयौ भागिनेयावुभौ दिव्यगाननिष्णातावारचय्य द्रामिडीं जगतीमशेषां दिव्यप्रबन्धगानमयीं वितेने । संस्कृतवेदस्य वेदव्यासो भगवानिव द्राविडब्रह्मसंहिताया असौ नाथमुनिरिति विश्वतः प्रथा विलसतिस्म ।

तदात्वे गङ्गाधरचोलपुराधिनाथप्रभृतयः प्रभुवरा नाथमुनेरस्य निष्प्रतिद्वंद्वं देवगानवैदुष्यं परीक्षणेन विज्ञाय, तमिमं विशेषतः पारितोषिकलम्भनादिभिर्बहूकर्तुमयतन्त । परं तु तृणीकृतविरिञ्चादिनिरङ्कुशविभूतिकोऽसौ महात्मा तदीयसत्कारनिस्स्पृहस्सन् श्रीवीरनारायणभगवत्पादारविन्दनित्यकैङ्कर्यैकनिधिस्सन् परमैकान्तिप्रवरः प्रथते स्म ।

एतस्य मुनेरन्तेवासिनोऽष्टौ । १. उय्यक्कोण्डार्, २. कुरुकैकावलप्पन्, ३. नम्बिकरुणाकरदासः, ४. एरुतिरुवुडैयार्, ५. तिरुक्कण्णमङ्गैयाण्डान्, ६. वानमामलै देवियाण्डान्, ७. उरुप्पुट्टूराच्चान्पिल्लै, ८. शोकत्तूराल्वान् —इत्यमी। तानिमान् शिष्यप्रवरानुभयवेदवेदान्तविद्यानिधीन् विरचय्य समुदजीवयन्मुनिसार्वभौमो नाथमुनिः ।

न्यायतत्त्वनामकं प्रबन्धरत्नमेतत्प्रणीतं प्रचक्षते । सा च कृतिरिदानीं नोपलभ्यते । लुप्तेत्याहुः । ग्रन्थस्य तस्य मुखपद्यमात्रमेकमुपलभ्यते—* यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः । तं प्रणम्य हरिं शास्त्रं न्यायतत्त्वं प्रचक्ष्महे ॥ इति । श्रीवेदान्ताचार्यवर्यकालपर्यन्तमेष ग्रन्थः प्रचारेऽवर्ततेति न्यायसिद्धाञ्जनादिग्रन्थगम्यम् ।

* लोकेऽवतीर्णपरमार्थसमग्रभक्तियोगाय नाथमुनये यमिनां वराय इति श्रीयामुनार्योक्तरीत्या सोऽयमाचार्यवरश्चिरं योगनिष्ठ आसीत् । 'कुरुकैकावलप्पन्' इति प्रसिद्धमन्तेवासिनं योगरहस्याभ्यासकृत्ये नियुज्य तस्मा उपदिदेश परमया कृपयाऽष्टाङ्गयोगक्रमम् । स्वकीयमात्मजन्मानमीश्वरभट्टारकमुद्दिश्य 'भो! उदेष्यति ते कश्चिदात्मजः; स नाम्ना यामुनेय इति प्रथां प्रापयितव्य' इत्युदैरिरत् । अथ पुण्डरीकाक्षमन्तेवासिनमुद्दिश्य 'तस्मै (उदेष्यते) यामुनेयाय दर्शनार्थरत्नान्युपदिशतु भवान्' इत्यादिश्य, कुरुकैकावलप्पन्नामकमन्तेवासिनं वीक्ष्य 'योगरहस्यमुपदिशतु भवांस्तस्मै' इत्याज्ञाप्य यथापुरं योगानुष्ठाने निष्ठामभजत ।

कदाचिदस्मिन्नाथमुनौ गृहाद्बहिर्गतवति सति, द्वौ धन्विनौ एका च ललना वानरेणैकेन सह समागत्य नाथमुनिः कुत्रेति पुत्रीमनुयुज्य जग्मुः । अथ नाथमुनौ गृहमागते वृत्तान्तमेनमुदीरयतिस्म दुहिता । मुनिश्चैतदाकर्ण्य * अग्रतः प्रययौ रामः सीता मध्ये सुमध्यमा। पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनुजगाम ह * इत्युक्ताः पङ्क्तिरथनन्दनसुमित्रासुतजनकनन्दिन्यो मारुतात्मजेन सह समागताः स्युरिति विभाव्यताननुसर्तुकामः प्रस्थाय, मार्गे ीक्ष्यमाणानखिलानुद्दिश्य "एवं गच्छन्तो दृष्टा वा भवद्भिः'? इत्यनुयुज्य, गच्छन्ति तावत्, प्रयान्ति तावत् इति तैस्तैः प्रत्युक्तं च निशम्य सजवं द्राघीयांसं पन्थानमतीत्य गङ्गाधरचोलपुरनाम्नि स्थले प्राच्यद्वारपर्यन्तं गत्वा तत्रत्यानामनुयुक्तानां मुखात् न वयमद्राक्ष्मे'ति निर्गतमुत्तरं निशम्य शुचा विह्वलस्सोऽयं मुनिसार्वभौमस्तत्रैव निपतितो मोहं गतो जगाहे च दिव्यं धाम ।

उदन्तमिममन्तेवासिन आकर्ण्य वैयाकुलीविवशहृदयास्तत्र समेत्य संसेव्य तदीयविमलचरमविग्रहम् अतिमालमवसादमापन्नाः क्रमेण समाश्वास्य चरमकैङ्कर्याणि यथायथं निरवर्तयन् ॥

श्रीमन्नाथमुनिवैभवं समाप्तम् ।

॥ श्रीपुण्डरीकाक्षश्रीराममिश्रगुरुद्वयवैभवम् ॥

श्रीमतो नाथमुनेरन्तेवासिष्वग्रेसरः * उय्यक्कोण्डारिति भाषानाम्ना प्रथितः पुण्डरीकाक्षगुरुप्रवरो मेषमासि कृत्तिकास्ववततार । सोयं नाथमुनिकटाक्षसंधुक्षितसकलार्थतत्त्वविज्ञानभूमा दिव्यप्रबन्धप्रवचनप्रवणो दर्शनप्रवर्तनधुरन्धरो विरराज । एतस्य च शिष्येषु * मणक्काल्नम्बीति प्रसिद्धः श्रीराममिश्रगुरुः प्रधानतया प्रचकाशे । सोऽयं पुण्डरीकाक्षगुरुचरणचरणारविन्दपरिसरे द्वादश शरदो निरन्तरपरिचर्याः प्रकल्पयन् अन्तरङ्गसेवक आसीदिति प्रथा । पुण्डरीकाक्षगुरोस्सहधर्मचरी गोदाम्बा यदा स्वाचार्यचरणारविन्दे प्राप, ततःप्रभृति श्रीराममिश्रगुरुरसावेव स्वाचार्यगैहिककार्यमखिलं स्वस्मिन्नायतमानमादधानः पारमार्थिककिङ्करस्सन् प्रथितप्रभावो बभूव ।

कदाचिदयं स्वाचार्यस्य कन्यके द्वे अपि सरसि स्नपयित्वा गृहमानयन् मध्येमार्गं कुल्यां पङ्किलां प्रेक्ष्य विह्वले ते स्वकीयपृष्ठतलद्वारा गमयितुकामः स्वयं कुल्यायां तस्यां सेतुभावमापन्नः तयोः कन्यकयोः पादन्यासतोधन्यं स्वं पृष्ठतलं कलयन् अथ विदितैतदुदन्तेन स्वगुरुवरेण विशेषतो बहुमानितोऽभूच्छिरसि पादाब्जविन्यासरूपेण सत्कारेणेति प्रसिद्धिः ॥

अथ गच्छति काले पुण्डरीकाक्षगुरुवरः परमपदयात्रासमुत्सुकस्सन् राममिश्रमेवमादिदेश—भवानेवात्रत्येभ्योऽन्तेवासिभ्य उभयवेदान्तरहस्यार्थानुपदिशन् दर्शननिर्वाहधुरन्धरो विलसतात्; भगवतो नाथमुनेः पौत्रः कश्चिदवतरिष्यत्यचिरात्, तं यामुनेयनाम्ना प्रथयितुमर्हति भवान् । स च भवत्सविध एव गृहीतसकलदर्शनार्थसर्वस्वो दर्शनप्रवर्तको विराजेत । भगवान्नाथमुनिश्चरमसमये कैङ्कर्यमिदं [श्रीयामुनार्याय प्रवचनात्मकम्] मया निर्वाह्यमाज्ञापयामास ; अथापि तु मन्दभाग्योऽहमाचार्यपादपादारविन्दपरिसरं प्रेप्सुरस्मि । अतो भवतैव निर्वाह्यं तत्कैङ्कर्यम् । स्वयमनुवर्तमानोऽपि वा भवान् भूत्वा यामुनार्यमवतरिष्यन्तमधिगताध्यात्मविद्यारहस्यसर्वस्वमाकलयितुमर्हति—इति ।

आदिश्य चैवमाचार्यचरणचरणारविन्दयुगलमनुध्यायन्नगाहत दिव्यं धाम भगवतो वैकुण्ठपतेः पद्मासनोपविष्टस्सन् । अथ च भृशमवसन्ना शिष्यमण्डली क्रमशः समाश्वस्तचित्ता सर्वं चरमकैङ्कर्यं यथाविधि निरवर्तयत् ॥

नमः पङ्कजनेत्राय नाथश्रीपादपङ्कजे । न्यस्तसर्वभरायास्मत्कुलनाथाय धीमते ॥

श्रीराममिश्रगुरोर्वैभवशेषम् उपरितनयामुनाचार्यवैभवेऽनुसन्धेयम् ॥

॥ श्रीयामुनाचार्यवैभवम् ॥

दर्शननिर्वाहधुरन्धरपदव्यां विराजमानो राममिश्रगुरुः श्रीमन्नाथमुनिसूनोरीश्वरभट्टार्यस्य कर्कटमासीयोत्तराषाढोडुनि दिव्यपुत्रजन्मोत्सवस्समपद्यतेति निशमयन् प्रहर्षभरितान्तरङ्गस्तत्र समागत्य जातकर्मनामकर्मणी यथाविधि विरचय्य गुरुवरनियोगानुरोधेन यामुननाम्ना तं शिशुं प्रथयामास । श्रीगोदादेव्या स्वकीये श्रीव्रत [तिरुप्पावै] प्रबन्धे पञ्चम्यां गाथायां "यमुनैत्तुरैवन्" इति नाम्ना श्रीकृष्णो भगवान् व्यपादिश्यत । तदेव नाम शिशुरत्नस्यास्य क्रियते स्म । तस्यैव द्राविडभाषामयस्य नाम्नः प्रतिच्छन्दभूतं नाम यामुन इति यामुनेय इति च ।

अथ शुक्लपक्षेन्दुवदहरहरभिवर्धमानः स दिव्यशिशुरन्नप्राशनचौलोपनयनादिसंस्कारान् यथाविधि यथाकालं लम्भितो महामेधावी वेदांश्चाधीते स्म ' पुनरुच्चारणाकाङ्क्षी पदानां चेष्टते परम् ' ॥ एवमङ्गोपाङ्गानि चाधीयानः काले गच्छति पित्रा वियुक्तस्तदौर्ध्वदेहिकं च निर्वर्त्य सामान्यविशेषशास्त्राध्ययनैकबद्धश्रद्धो व्यराजत यामुनार्यः ।

तदात्वे महाभाष्यभट्टारकनामा महाविद्वान् शास्त्रप्रवचनप्रवीणोऽवर्तत । तस्यैव सन्निधानेऽयमधीयान आसीच्छास्त्राणि । चोलमण्डलाधीशस्य प्रभोरास्थाने विपश्चिदपश्चिमपदवीमधितिष्ठन् * आक्कियाल्वान्नामा पण्डितपरिवृढस्तद्देशीयान् सर्वानपि विदुषो विजित्य पराजितैस्तैस्तैर्विद्वद्वरैरर्थ्यमाणं वर्षाशनं शुल्कं कररूपेण गृह्णन्नवर्तत । तस्य भृत्यः क्वचन दिने यामुनार्योपाध्यायपादपरिसरमुपगम्य करद्रव्यदाननिर्बन्धकृदासीत । तदा द्रव्याभावेन विषण्णं म्लानवदनमुपाध्यायपादमुद्वीक्ष्य विदितोदन्तो यामुनार्यः तेन भृत्येनोपानीतं पत्रमुच्छिद्य ' याहि रे याहि भृत्यापशद!' इति तिरस्कृत्य प्रजिघाय ।

स च सेवकः स्वामिसविधमभ्येत्य विद्यार्थी कोऽपि बालक एवं चक्र इति न्यवेदयत्प्रवृत्तिम् । स च स्वामी विपश्चिदपश्चिमः पुनरपि तं भृत्यं प्रैषयत्—स विद्यार्थी कीदृशयोग्यताशालीति सम्यगवगत्य समायाहीति समादिश्य ।

एवमादिष्टस्सेवकः पुनरागत्य विचार्य—" न वयं कवयस्तु केवलं न वयं केवलतन्त्रपारगाः । अपि तु प्रतिवादिवारणप्रकटाटोपविपाटनक्षमाः ॥ " इत्यमुं श्लोकं यामुनार्येण विलिख्य दत्तं निनाय स्वामिनिकटम् । स चेदं श्लोकरत्नमनुवाच्य किमेतादृशोऽपि कोऽपि विद्वद्वरेण्यो विराजत इति विस्मयविवशो महाप्रभुसविधे निवेदयामास तमिममुदन्तम् । स च विवेकी परिवृढो यामुनार्यं स्वयं दिदृक्षुरास्थानमण्डपमानेतुमान्दोलिकां च प्राहैषीत्परिजनपरिच्छदसनाथाम् । तामान्दोलिकामधिरुह्य राजद्वारमुपागतो यामुनार्यः,

" आशैलादद्रिकन्याचरणकिसलयन्यासधन्योपकण्ठात् आरक्षोनीतसीतामुखकमलसमुच्छ्वासहेतोश्च सेतोः ।
आ च प्राच्यप्रतीच्यक्षितिधरयुगलाच्चन्द्रसूर्यावतंसात् मीमांसाशास्त्रयुग्मश्रमविमलमना मृग्यतां मादृशोऽन्यः ॥"

इति श्लोकरत्नं विलिख्य राज्ञे प्रैषयत् । तदिदमास्थानविद्वांश्च विलोक्य कोपावेशकलुषिताक्षः, वृथा दम्भेन केवलमेवं विलिखन्तं विबुधापशदममुमहं वादाहवे विजित्य विहतावलेपं करिष्याम्येवेति राज्ञस्सविधे समगिरत ।

राजा च यामुनार्यं स्वान्तिकमुपगमय्य पप्रच्छ—विद्यानिधे! अस्मदास्थानविद्वन्मणिना साकं वादकेलिं प्रवर्तयितुम् अपि नाम सन्नह्यति श्रीमानिति । प्रत्यूचे यामुनार्यः—आः किमेवमनुयुज्यते? एतदर्थमेव खल्वहमुपस्थित इदानीमिह । न कश्चिदन्तरायः । अवश्यमावयोर्वादयुद्धेन प्रवृत्तेन भवितव्यम् । परं तु वादे जयापजयविनिर्णयाय मध्यस्थः कोऽपि महापण्डितोऽप्यावश्यकः खलु । न चेत् कथं नु नाम वादयुद्धपर्यवसानम्? अतश्च सम्राडेव स्वयं तटस्थानपि विदुषस्सज्जीकरोत्विति ।

राजा च तथैव मध्यस्थान् विदुषो द्रुतमानाय्य विद्यास्थानमण्डपे सर्वानुपवेश्य स्वयं च सह महिष्या तत्र सिंहासनमधिष्ठाय वादकेलिरुपक्रम्यतामित्यादिदेश । तदात्वे राज्ञो महिष्याश्च मिथः कोऽपि समयबन्धस्समपद्यत । * रूपमेवास्यैतन्महिमानं व्याचष्ट इत्युक्तियोग्यं दिव्यं तेजो यामुनाचार्यमुखे प्रेक्षितवती राजमहिषी नैष पराजितो

भवितेति सुदृढमभिदधे । स्वकीयस्यास्थानविदुषः पक्षे पतन् पार्थिवस्तु नास्मदीयो विद्वान् कदाऽपि पराजितो भवेदिति प्रतिसमगिरत । 'अस्तु; अन्ततो विजयशालिने विदुषे प्रदास्याम्यवश्यमर्धराज्यम्' इति प्रतिजज्ञे च

अथ स प्रत्यर्थी विद्वान् यामुनाचार्यमुदैरिरदेवम्—आवयोः शास्त्रार्थचर्चा प्रचलतु नाम परस्तात्; पुरस्तात्तु लौकिकी प्रहेलिका मनागिव प्रचलतु । भवता यन्निषिध्यते तदहं साधयेयम्; यच्च साध्यते भवता तदहं प्रतिषेधयेयम्; पराजितस्य शिरसि प्रहारं कुर्वीत विजयी—इति । एतदाकर्णयन् यामुनार्यस्समनन्तरमेव '१. त्वन्माता न वन्ध्या. २. राजा सार्वभौमः. ३. राजपत्नी पतिव्रता.' इति लौकिकवाक्यवितयं प्रायुङ्क्त । भवता यन्निषिध्यते तदहं साधयेयमिति स्वकलितप्रतिज्ञानुसारेण प्रत्यर्थिनस्तस्य पण्डितस्य मुखात् मन्माता वन्ध्यैवेति साधनीयमापतितम् । हन्त ! कथमेवं साधयितुमुत्सहेत सः । अथ च राजा न सार्वभौमः, राजपत्नी न पतिव्रता' इति वक्तव्यमापतितम् । राज्ञो राजमहिष्याश्च निग्रहाच्चकितस्स कथमिव तादृशं वाक्यद्वितयमुदीरयेत् । ततस्सोऽवतस्थे किंकर्तव्यतामुग्धोऽवनतशिराः ॥

अथ शास्त्रार्थेष्वपि वादकेलिरुपाक्रम्यत । तत्रापि स पण्डितम्मन्यः क्षिप्रमेव भग्नोऽभवत् । तदा स्वामी यामुनार्यस्समकथयत्—रे अल्पज्ञ ! जयशालिना पराजितस्य शिरसि ताडनं कर्तव्यमिति त्वया कथितमुपक्रमे; राजपुरोहितस्य वयसा ज्यायसश्च सतस्तव शिरसि ताडनं नाहं कामये इति । तदिदमाकर्ण्य तत्रत्यास्सर्वेऽपि विद्वांस आत्मगुणसमृद्धिमदसीयामधिकृत्य भृशं प्रमुदितान्तःकरणाः तमिमं (यामुनार्यं) ब्रह्मरथमधिरोप्य वीथीपरिभ्रमणमहोत्सवमचीकरन् । तदात्वे राजमहिषी—प्रथमतो राज्ञस्सविधे स्वात्मना यदुक्तं तत्तथ्यं कृतमभूदनेनेति प्रहर्षपरवशा सती 'मां पालयितुं ह्यागतोऽसि' [என்னை ஆளவந்தீரோ ?] इत्यभिधाय परिरभ्य भर्त्रा सह तमेनमन्तर्निनाय । ततःप्रभृति तेनैव हेतुना [ஆளவந்தார்] ❀ आळवन्दारिति प्रथामवजगाहे गुरुवरोऽसौ । भूपतिश्च यथाप्रतिश्रुतमर्धराज्यप्रदानेन तमिममाद्रियते स्म । असौ च यामुनाचार्यः सहधर्मचरीसमन्वितो राजभोगानुभवशाली नानाविद्याप्रवचनप्रवणश्च बभौ ।

अथ च श्रीराममिश्रो गुरुवर उदन्तमिममशेषमाकर्ण्य परमानन्दपारावारमग्नान्तरङ्गो यामुनार्यावलुलोकयिषया समागतो राजद्वारे दौवारिकैः प्रतिरुद्धान्तर्गमनः केनोपायेन प्रविशेयमन्तरिति परिचिन्तयन् रसवत्यां परिचारकस्य मुखात् यामुनार्यो भोज्येषु शाकवर्गेषु अलर्कपत्रे भृशं स्पृहयालुरिति शृण्वन् प्रत्यहमलर्कपत्रार्पणकर्मणि निरत एवं षण्मासानत्यवाहयत् । अथापि यामुनगुरोराभिमुख्यमलभमानः खिन्नमना अथ कतिपयदिनावधि अलर्कपत्रार्पणादुपरत आसीत् । तदा कस्मिंश्चिद्दिने भुञ्जानो यामुनाचार्यः परिचारकमनुयुयुजे किमिति कतिपयैर्दिनैरलर्कपत्रपचनं न चलतीति । स च प्रत्युवाच— यः खलु वृद्धब्राह्मणो नित्यमुपहरन्नासीत्पुरा स नेदानीमुपाहरतीति । अथ गुरुरुवाच, यदि स पुनरिह कदाचिदायास्यति तदात्वे मह्यमभिधातव्यमिति । तदनु पुनरपि प्रत्याशाप्रचोदितो राममिश्रगुरुरलर्कपत्रमुपाहरन् पाचकमद्राक्षीत् । सोऽपि यथानियोगं यामुनार्यस्य सविधे विज्ञाप्य तमिममन्तर्निनाय ।

यामुनाचार्यस्तु राममिश्रस्य विलक्षणेन तेजसा विवशीकृतस्साष्टाङ्गं प्रणिपत्य दिव्यासनवरे तमुपवेश्य सविनयमेवं विज्ञापयामास—चिरात्तत्रभवन्तोऽत्र समुपहरन्त्यलर्कपत्रमित्यवगच्छामि; न जाने कयोत्कण्ठया श्रीमन्त उपहरन्तीति; यदपेक्षितं तत् परमकृपया प्रकाश्यताम्; यथाशक्ति समर्प्य धन्यो भवेयम्—इति। अथ प्रत्युवाच राममिश्रो गुरुः—स्वामिन्! दातुमेवाहमुत्कण्ठितोऽस्मि, न पुनः किमप्यादातुम्। भवदीयैः पूर्वैस्सञ्चितो निधिरस्ति निरपायः; तदुपलम्भने परमहं व्यवसितः; क्रमेण चोपलम्भयिष्यामि तम्। तदर्थमत्र प्रत्यहमागत्य किमपि विज्ञापयितुं कामये; यथा च द्वारि न कोऽपि प्रतिरोधो भवेत्तथा नाम शासनमवतारणीयम्- इति। यामुनार्यश्च हर्षप्रकर्षफुल्लान्तरङ्गस्सन् ओमित्यङ्गीकृत्य, प्रत्यहं सोपचारमन्तरानेतुं च दौवारिकानादिदेश। अथ राममिश्रो गुरुवरस्सानन्दमनुदिनमायाति यामुनाचार्यसविधम्, उपदिशति च भगवद्गीतायाः स्वादुतमान् सांप्रदायिकानर्थविशेषान्। सभक्तिश्रद्धातिशयं शृण्वन् यामुनाचार्योऽत्यन्तमार्तिभरमाबिभ्राणः कदाचिदन्वयुङ्क्त सविनयम् — भगवन्! परमपुरुषं साक्षात्कर्तुमुत्कण्ठितस्य मम मनोरथपूरणोपायः कश्चित् कच्चिन्नास्तीति। 'कुतो नास्ति? अस्त्येव परमोपाय' इत्यनुगृह्य पुनश्च रहसि कांश्चिदर्थविशेषान् कर्णमूले समुपादिशत स एष रामगुरुः। अथ भृशमभिववृधे यामुनार्यस्य परमात्मनि प्रेमभरः स्वदितरविषयेषु विरक्तिभूमा च। प्रतीक्षितामीदृशीमवस्थां प्रजातां प्रपश्यन् प्रहृष्यंश्च रामगुरुरथ प्रस्थाय तेन सह श्रीरङ्गदिव्यधाम समागत्य तत्रभोगिभोगशयनीयशायिनम् आयतिकिरीटमलिकोल्लसदूर्ध्वपुण्ड्रमाकर्णलोचनमनङ्कुशकर्णनपाश मुत्फुल्लवक्षस मुदायुधबाहु महन्नीविं च रङ्गपतिमब्जपदं दर्शयित्वा 'भवदीयैः पूर्वपुरुषपुङ्गवैरार्जितो महानिधिरसौ ननु' इत्यनुजग्राह। यामुनार्यश्च फणिनमधिशयानं परमपुरुषमापादचूडमासेव्य, अतीतो भूयान् कालो वृथैव व्यतीत इति भृशमनुशयानो नयनेनोद्गीर्णबाष्पाम्बुना भूयोभूयस्समासेव्य कण्ठेन स्वरगद्गदेन चाभिष्टूय* यदहरेव विरजेत्तदहरेव प्रव्रजेत् *इति शास्त्रमनुसृत्य तुर्याश्रमं निषेव्य यावच्छरीरपातं श्रीरङ्गदिव्यधामनिवास एव शरणमिति सुदृढमध्यवस्यंस्तत्रैव निवसतिस्म नित्यमध्यात्मशास्त्रप्रवचनेन शिष्याननुगृह्णन्।

तदात्वे १. महापूर्णगुरुः, २. गोष्ठीपूर्णगुरुः, ३. श्रीशैलपूर्णगुरुः, ४. श्रीमालाधरगुरुः, ५. श्रीकाञ्चीपूर्णमिश्रः, ६. वानमामलैयाण्डानाख्यः, ७. दैववारियाण्डानाख्य इत्याद्या विंशतिर्महानुभावा यामुनार्यपादारविन्दयोराशिश्रियन्। एते सर्वेऽपि विद्वांसो दर्शनधुरन्धराश्च व्यराजन्त।

तदा कदाचिद्राममिश्रो गुरुराह यामुनार्यम् —'आर्य! भवदीयः पितामहः श्रीमन्नाथमुनिः कुरुकैकावलप्पन् समाख्ये कुरुकेशदेशिके योगरहस्यविशेषात्मकं निधिं निदधे; स च श्रीमता तत्र लब्धव्यः' इति। तदाज्ञानुसारेण तल्लाभसमयविशेषप्रतीक्षी विरराज यामुनेयगुरुवरः॥ सर्वेऽप्यमन्दानन्दभाजः श्रीरङ्गक्षेत्रमेवाधिवसन्तो निर्वहन्ति दर्शनम्।

श्रीराममिश्रो गुरुरथ लीलाविभूतिं विहाय नित्यांविभूतिमीप्सुः काले काले यामुनार्याय भूयांसि हितवचनान्युपदिश्य श्रीपराङ्कुशपरकालादिप्रणीतद्राविडाम्नायदिव्यप्रबन्धदिव्यार्थरसायनपानैनैयत्यं चाज्ञाप्य

'भवत्सधर्माणं कमपि दर्शनधुरन्धरं समुत्पादयेथाः, श्रीरङ्गश्रियं च यथोत्तरमभिवर्धयेथाः; श्रीमन्नाथमुनिदिव्यचरणारविन्दे एव भवतो निरपायं शरणम्' इति परमप्रेमपेशलानि सूक्तिरत्नानि चानुगृह्य स्वाचार्यस्य पुण्डरीकाक्षगुरोर्दिव्यपादारविन्दे अनुध्यायन दिव्यं धाम जगाहे।

राममिश्रगुरोरस्य पादाब्जयोराश्रिताश्शिष्याः यामुनार्यः, दैवत्तुक्करशुनंबि, गोमठत्तुत्तिरुविण्णगरप्पन, वङ्गीपुरत्ताच्चि - इत्याद्याः। सर्वेऽप्यमी सामान्यविशेषशास्त्राब्धिनिष्णाता विशिष्य द्राविडब्रह्मसंहितामहाधना आचार्यातिशायिकीर्तिविशेषा विलसन्तिस्म।

श्रीरामगुरोरस्य मणकाल्नम्बीत्येव प्रथा। कुम्भे मासि मखर्क्षमवतारदिनमस्य। एतद्विषयकं नित्यानुसन्धेयं स्तुतिपद्यमेतत् = ॐ अयत्नतो यामुनमात्मदासम् अलर्कपत्रार्पणनिष्क्रयेण। यः क्रीतवानास्थितयौवराज्यं नमामि तं राममेयसत्वम्॥ ॐ इति॥

कुरुकैकावलप्पनसमाख्ये श्रीमन्नाथमुनीन्द्राणामन्तेवासिवरेण्ये श्रीकुरुकेशदेशिके योगरहस्यविशेषार्थनिधिर्लब्धव्य इति स्वाचार्येण राममिश्रगुरुणोपदिष्टं स्मरन् यामुनार्यः - स महाचार्यो गंगाग्राहि चोळपुराग्रहारे [गङ्गैकोण्डचोळपुरम नाम्नि स्थले] निवसति योगसंशीलननिरतस्सन्निति विज्ञाय तत्र प्रययौ। स देशिकस्तदात्वे क्वचन जीर्णकुड्यापवरके निषण्णो योगसंशीलनपर आसीत्। तस्य समाधिभङ्गो न कर्तुं युज्यत इति धिया यामुनार्यः पादचारशब्दमप्यनुत्पादयन् तज्जीर्णकुड्यवहिष्ठ एवासीत। अथानुपदमेव योगी स गुरुवरः श्रीमन्नाथमनिवंश्यः कोऽपि समायातः किमत्रेति परावर्तमानः पप्रच्छ। तदाकर्ण्य यामुनार्यो विस्मयविवशो "दास एषोऽस्मी"ति विज्ञापयन् प्रविश्य चान्तः प्रणिपत्य साञ्जलिबन्धमनुयुयुजे, भगो! कथमहो विज्ञातं दासस्यागमनं श्रीमतेति। अथ तेन गुरुवरेण समन्दस्मितमेवं प्रोक्तम्= मम च भगवतश्च भोगे संपद्यमाने प्रेयसीं श्रीमहालक्ष्मीमपि नाद्रियते स भगवानिति वस्तुस्थितिः। स एषोऽधुना मामप्युपेक्ष्य द्वि स्त्रि रवैक्षत कुड्याद्बहिः। एतस्य कारणं मत्तोऽप्यभ्यर्हितस्य श्रीमन्नाथमनिवंश्यस्य कस्यचिदत्र समुपस्थितिरेव स्यादित्यहममन्ये - इति। तदिदमाकर्ण्य यामुनार्यो हर्षप्रकर्षमासेदिवान् पुनः प्रणम्य प्रार्थयतेस्म साञ्जलिबन्धम् - भगवन्! योगरहस्यविशेषोपदेशतः कटाक्षणीयो दास इति। सच तथेत्यङ्गीकृत्य 'श्रीमन्! उपदेक्ष्यामः शरीरावसाने; आगामिनि मकरमासि तिष्यनक्षत्रे अभिजिन्मुहूर्ते भविष्यति नूनमस्माकमुत्क्रमणम्। ततः प्रागागन्तव्यमिह पुनः श्रीमता' इत्यनुगृह्य, एवमाज्ञाक्षरविन्यासधन्यं श्रीताळच्छदश्रीमुखं च प्रदाय प्राहिणोत्। धन्योऽस्मीति तत्स्वीकृत्य श्रीरङ्गधाम प्रति नववृते यामुनार्यः।

अथ भगवतो रङ्गनाथस्य मार्गशीर्षमास्यध्ययनोत्सवस्य संपद्यमानस्य दशमोत्सवदिने दिव्यप्रबंधगानगोष्ठ्यामासीन आसीद्यामुनाचार्यः। सहस्रगीतिसंकीर्तननिरतो विज्ञप्रिकरोदिव्यगायकस्तु (अरैयरुसमाख्यः) श्रीमदनन्तशयनक्षेत्रविषयकम् ॐ केडुमिडरायवेल्लाम् ॐ इत्युपक्रमशालि दशकं गायन् ॐ कडुविनैकळैयलाहुं इतीमामष्टमीं गाथामुत्कीर्तयन ॐ अनन्तशयनस्थले फणिशयस्य पादौ हरेः प्रयात ननु सेवितुं मयि निबद्ध

भावा जनाः! *इत्येवमर्थकमुत्तरार्धं साकूतमाम्रेडयन विशिष्य यामुनार्यैकाभिमुखश्च सन् समकीर्तयत् । तदात्वे यामुनार्य एवमभिप्रेयाय-- अहो भाग्यमहो भाग्यम् ! श्रीशठकोपमुनीन्द्र एव परमकृपया मामाज्ञापयत्येवम् । तत्संबन्धस्य रक्षणीयत्वे सति सद्यः प्रस्थाय श्रीमदनन्तशयनक्षेत्रमासाद्य तत्र भगवत्पादारविन्दसेवा मया कर्तव्येति । अथ मनागपि विलम्बमसहमान स्समनन्तरक्षण एव ततस्समुत्थाय क्षेत्रवरं तमनुप्राप्य भगवन्तमनन्तपद्मनाभमासेवमानो गमयामास वासरान् परमानन्दसंदोहमयान् । एवंविधे चानन्दानुभवे, पुरा कुरुकेशदेशिकेन योगरहस्योपदेशार्थ मादिष्टः कालविशेषो विस्मृत इवाभूत् । हठात्कदाचन तत्स्मरणसंभवेन तत्प्रदत्तचरमुपदेशार्हकालविशेषनिर्देशभासुरं श्रीमुखमवलोक्य भृशं व्यथितो बभूव—यस्मिन्दिने तदवालोकि तदेव दिन मुपदेशार्हदिनत्वेन निर्दिष्टमासीदिति हाहन्त ! पुष्पकविमानप्राप्त्युपायोऽपि नास्ति खल्विति भूयो भूयोऽप्यनुशोचन् बलवती भवितव्यतेति च व्यवस्यन् क्रमशः श्रीरङ्गदिव्यनगरीमासाद्य तत्र यथापुरं दर्शननिर्वाहमातन्वन् विरराज ।। अथैतत्प्रभावशेषं भगवद्रामानुजाचार्यवैभवे सेवध्वम् ।।

इति यामुनाचार्य वैभवम् ।।

इति श्रीकांची प्रतिवादिभयङ्कर-
अण्णङ्गराचार्यसंकलिते पूर्वाचार्य
वैभवसंग्रहे प्रथमः परिच्छेद
स्समाप्तः ।।

॥ श्रीरस्तु ॥

श्रीपराङ्कुशपरकालयतिवरेभ्यो नमः । अस्मद्गुरुपरम्पराभ्यो नमः ॥

(सहस्रश्लोकगाथात्मकदिव्यप्रबन्धेषु अत्यावश्यकसारतमदिव्यप्रबन्धरूपम्

॥ नित्यानुसन्धानम् ॥

तत्र प्रथमः प्रबन्धः—तिरुप्पल्लाण्डु.

तत्प्रणेतृश्रीभट्टनाथसूरिविषयकाणि स्तुतिपद्यानि ॥

गुरुमुखमनधीत्य प्राह वेदानशेषान् नरपतिपरिक्लृप्तं शुल्कमादातुकामः ।
श्वशुरममरवन्द्यं रङ्गनाथस्य साक्षात् द्विजकुलतिलकं तं विष्णुचित्तं नमामि ॥

(गाथा.) मिन्नार्तडमदिळ्शूळ् विल्लिपुत्तूरेन्रोरुकाल्, शोन्नार् कळर्कमलम् शूडिनोम्—मुन्नाळ्
किळियरुत्तानेन्रुरैत्तोम् कीळ्मयिनिल् शेरुम्, वळियरुत्तोम् नेञ्जमे वन्दु.

पाण्डियन् कोण्डाडप्पट्टर्पिरान् वन्दानेन्रु, ईण्डिय शङ्गमेडुत्तूद—वेण्डिय
वेदङ्गळोदि विरैन्दु किळियरुत्तान्, पादङ्गळ् याम्बुडैय पत्तु ॥

भट्टनाथ (श्रीविष्णुचित्त) सूरिवैभवम् ॥

मिथुने मासि स्वात्यां भुव्यवतीर्णस्य भट्टनाथस्य । सूरेर्वैभवमतुलं संप्रति विज्ञापयामि सारतरम् ॥

पाण्ड्यमण्डले श्रीधन्विनव्यक्षेत्रे [श्रीविल्लिपुत्तूरु.] वैदिकविप्रवरेण्यसंततौ मिथुनमासि स्वातीनक्षत्रे शुभे कोऽपि महापुरुषः प्रादुरभूद्वटपत्रशायिभगवत्कटाक्षविशेषेण, यः खलु विष्णुचित्तनाम्ना प्रसिद्धिमुपाययौ। यथा तु तुलसी निसर्गत एव विलक्षणसौरभसंभृता चकास्ति, तथा सोऽयमपि महान् स्वभावत एव भगवद्भक्तिभूमभूषितस्तत्कैङ्कर्यैक-सक्तचित्तो ववृधे ।

एवमेष वर्धमानो मान्यमहोदयः कीदृशेन कैङ्कर्येण कृतेन भगवान् प्रसीदेदिति मनसि पर्यालोचयन्नवर्तत । तस्मिन् क्षेत्रे कश्चन प्राज्ञः पौराणिकः श्रीविष्णुपुराणप्रवचनेन भूयसस्सज्जनानावर्जयन् विरराज । तदीयगोष्ठ्यामय-मपि महान् कदाचिदन्वितस्सन् भगवत्कथाश्रवणकुतूहली निषीदतिस्म । तदात्वे तु स पौराणिकः * प्रसादपरमौ नाथौ मम गेहमुपागतौ । धन्योऽहमर्चयिष्यामीत्याह माल्योपजीवनः * इत्येतत्पद्यरत्नं व्याचक्षाणः कंसजिघांसया मधुरां पुरीं समाजग्मुषो नन्दसूनोः मालाकारभवनं स्वयमभ्येत्य कुसुममालिकां याचमानस्य कथां कर्णामृतमयीं कथ-

यामास । तदाकर्णनजहर्षप्रकर्षप्रफुल्लचित्तो विष्णुचित्तो नित्यं भगवतः पुष्पमालासमर्पणमेव तत्प्रसादनिदानं महत्तरं कैङ्कर्यमिति दृढमध्यवस्यन् मनोहरमुद्यानवनमुपकल्प्य तस्मिंश्च नानाविधानि सुरभिकुसुमानि संवर्ध्य तत्क्षेत्राधिपतये वटपत्रशायिभगवते नित्यमर्पयन्नाननन्द । नक्तंदिवमपि तदुद्यानपोषणमेवास्य नित्यकर्म समभूत् । एवमेवासौ ब्रह्मानन्दमयं सकलमपि समयं गमयन्नास्ते ।

पाण्ड्यकुलजन्मा वल्लभदेवनामा समतीतसीमभूमा भूपतिः कोऽपि दक्षिणमधुरापुर्यामधिराज्यमातस्थिवान् नगरशोधनाय नित्यं नक्तं निगूढेन वपुषा वीथीषु परिभ्रमन् जातुचित् कात्रन कोणे शयानं कमपि पथिकमुत्थाप्य 'कस्त्वं भोः! कुतस्त्यः कुत्रत्यः' इत्यादि पर्यपृच्छन् । स च प्रत्यभाषत—ब्राह्मणोऽहम्, गङ्गायात्रां परिसमाप्य प्रतिनिवर्तमानः श्रान्तिशान्तये शायितवानत्रेति । तदाकर्ण्य राजा प्रोवाच—'ब्राह्मणः खल्वसि; ब्राह्मणा ननु नीतिज्ञाः; यदि जानाति भवान् ब्रवीतु कामपि नीतिम्' इति । आदिष्टश्चैवमसौ द्विजातिरब्रवीत्—

वर्षार्थमष्टौ प्रयतेत मासान् निशार्थमर्धं दिवसं यतेत ।
वार्धक्यहेतोर्वयसा नवेन परत्रहेतोरिह जन्मना च ॥" इत्येतत्पद्यरत्नम् ।

[वर्षाकालात्मकमासचतुष्टयोपयोज्यवस्तुजातसंभरणार्थमष्टासु मासेषु यत्नं कुर्यात्; रात्रिकालोपयोज्यवस्तूनि संपादयेदहनि; वार्धकोपयोज्यमर्थजातं यौवने संनाहयेत्; पारलौकिकाय श्रेयसे कृत्स्नेऽपि जन्मन्यस्मिन् प्रयस्येन्नर इति तावदस्य श्लोकस्य तात्पर्यम् ।]

व्युत्पन्नो विवेकी च स चक्रवर्ती श्रुतस्यास्य श्लोकस्यार्थं मुहुर्मनसि चिन्तयन् "ऐहिकभोगेषु नास्ति काचिदस्माकं न्यूनता, पारत्रिकाय श्रेयसे तु नाद्य यावदस्माभिः प्रयतितम्, तेनैव हि प्रयत्नेनावश्यं भवितव्यम्; कथमसौ कीदृशो भवितुमर्हति ?" इत्येवंविधां चिन्तामन्तरुदञ्चितामनुक्षणमभिवर्धमानां श्रीपूर्णनाम्नः [शेल्वनम्बि] पुरोधसस्सविधे परेद्यवि न्यवेदयत् । विवेकिनां भगवद्भक्तानामग्रेसरस्स पुरोहितः प्राह—'प्रभुवर! परे पुंसि भक्तिविवर्धनमेव पारत्रिकाय श्रेयसे प्रकल्पेत भूयस' इति । तन्निशम्य राजा चतुर्विधपुरुषार्थविश्राणनविचक्षणं परं तत्त्वं निर्धारयितुं कस्स्विदभ्युपाय इत्यन्वयुङ्क्त । स च पुरोधाः प्रोचे—नानादेशीयानधिगतभूरिशास्त्रमर्मसर्वस्वान् विद्वद्वरिष्ठान् समावाह्य तन्मुखेन निर्धारणीयोऽयमंश इति ।

युज्यत इत्यभिनन्दन्नवनीपतिरथ वित्तमपरिमितमेकस्यां सञ्चिकायामाबद्ध्य विद्याशुल्कतयोपकल्प्य सभामण्डपे कचिदुत्तुङ्गस्थाने प्रतिष्ठाप्य सर्वतः प्रथयामास "अत्रागत्य वैदिकप्रमाणबृन्दोपन्यसनपूर्वकं यथायथं परं ब्रह्म निर्धारयतामुत्सङ्गे विद्याशुल्कग्रन्थिरसौ स्वयमुपनंस्यति तावत्" इति । प्रथामिमामवजग्मिवांसः पण्डितपरिबृढा भूयांसो विशेषतो नानादिगन्तत उपेत्य वादकेलिसन्नद्धास्संघीबभूवुः ।

तदात्वे श्रीधन्विनव्यनगरक्षेत्राधिनाथो वटपत्रशायी भगवान् श्रीविष्णुचित्तसूरिमुखतो वेदान्तसिद्धं परं तत्त्वं प्रख्याप्य जगतीमुज्जीवयेयमित्युत्कण्ठामुत्कटामुद्वहन् तस्यैव सूरेस्स्वप्ने दृष्टिपथमुपयात इत्थमनुजग्राह—"स्वामिन्! अत्रभवानद्यैव मधुरापुरीमुपगम्य पाण्ड्यभूपतिपरिकल्पितायां पण्डितपरिषदि श्रीमन्नारायणपारम्यमप्रधृष्यं प्रतिष्ठाप्य

प्रभुणा तेन परिक्लृप्तं विद्याशुल्कं च स्ववशीकृत्य समुपायातु " इति । स च विष्णुचित्त एवमुत्तरमुदैरित 'भगवन्! शास्त्रविज्ञानलवलेशविधुरोऽहमौयानिकः कथं नाम विद्वद्वरिष्ठैकसुकरं कृत्यं कर्तुं प्रभवेयम्? खनित्रादिसाध्ये प्रबलेऽपि कर्मणि नियुक्तोऽहं नियतं तन्निर्वर्तयितुं निपुणस्स्याम्; स्वाधिकारवैदेशिके कर्मणि कथं नु मां नियोजयति श्रीमान्?" इति। भगवांस्तु "नैष विचारो युक्तो भवतः; आज्ञामात्रपरतन्त्रो गन्तुमर्हति भवान्; कार्यनिर्वाहस्तु ममैव भरः" इत्यभिधाय सद्यस्तिरोहितः।

अथ शयनादुत्थितो विष्णुचित्तो विस्मयविवशो भगवदनुकम्पामधिकृत्य धन्यवादमाम्रेडयन् यथाभगवदाज्ञमाचरितुमवधार्य प्रस्थितः पाण्ड्यराजपण्डितपरिषदं प्रययौ। उपागतमेनमुद्वीक्ष्य सपुरोहितस्सम्राट् * रूपमेवास्यैतन्महिमानं व्याचष्टे* इत्यनुसंदधानो दिव्यतेजःपुञ्जभूम्ना वैभवविशेषमभ्यूह्य, अभ्युत्थानप्रणामाद्युच्चावचोपचारप्रकाशनेन महत्तरं गौरवमाविष्कुर्वन् सभामण्डपमध्ये महति सिंहासने तमिममुपावीविशत्। एवं नाम प्रकटितां बहुमाननामवलोक्य साभ्यसूया अन्ये सर्वेऽपि विद्वद्वरेण्या "अपरिमितशास्त्रवैदुष्यविभूषितानस्मान् अवज्ञापात्रभावं प्रापय्य यथाजातस्य कस्यचिदेवं नाम सभाजनं सर्वथाऽप्यस्थाने" इत्यधिचिक्षिपुः। तान्यधिक्षेपवचनानि मनागपि कर्णकुहरमप्रवेशयन्तौ पुरोहितप्रभुवरौ सिंहासनोपरि देदीप्यमानदिव्यतेजसं विष्णुचित्तमुद्दिश्य 'स्वामिन्! परमया करुणया परतत्त्वनिर्णयमातनोतु तत्रभवान् प्रमाणोपन्यसनपूर्वकम्' इति सविनयादरं संप्रार्थयेताम्॥

प्रार्थितश्चैवमेष महात्मा स्वप्नसंदृष्टस्य सर्वेश्वरस्य कमलापतेः करुणानिधेरनवग्रहमनुग्रहमेकमेव प्रबलमवलम्बमाकलयन् तत्पादारविन्दयुगलपरिचिन्तनपावनमानसस्सन् करतलामलकीकृतसर्वशास्त्रार्थस्सर्वज्ञसार्वभौमो भवन् श्रुतिस्मृतीतिहासपुराणाद्यशेषप्रमाणबृन्दादमितानि वचनान्युपादाय तदर्थांश्च स्वयमेव आक्षेपसमाधानैस्सह सयुक्तिकं संप्रदर्श्य परमतप्रक्रियाश्च समूलमुन्मूल्य, श्रीवैष्णवदर्शनस्यैव प्रामाणिकतां श्रीमन्नारायणस्यैव परदैवतां तच्छरणागतेरेव परमहिततां च सुविशदमतिचारुतरमप्रधृष्यमुपन्यस्य प्रतिष्ठापयामास, निमज्जयामास च निरवधिकविस्मयसंतोषसागरे निखिलानपि प्रेक्षकजनान्, नमयामास च कृताधिक्षेपविद्वज्जनशिरांस्यपि॥

अथ वल्लभदेवः प्रभुवरः सपुरोहितो विष्णुचित्तसूरेर्विज्ञानवैभवमवाङ्मनसगोचरमतिमात्रं प्रशस्य तत्पादारविन्दपरिसरे साष्टाङ्गं प्रणिपतन् प्रैक्षत च तस्यैव सूरेरुत्सङ्गे स्वयमुपनतं तं विद्याशुल्कग्रन्थिम्, यः खल्वात्मना स्थूणाशिरसि पुरा स्थापित आसीत्। सूरिवरोऽपि भगवत्कृपातिशयप्रकाशकमनन्यलभ्यमेनं द्रव्यग्रन्थिमात्मसादकरोत्। विद्वांसोऽप्यथ सर्वे विष्णुचित्तपादारविन्दपांसुपवित्रीकृतशिरस्काः शिष्यभावं प्रकाशयन्त उच्चैरभिष्टूय कृतकृत्या अभूवन्। महामहिमशालिनोऽस्य सूरिवरस्य वीथीषु विजययात्रोत्सवं सुमहता समारोहेण संविधातुकामा महाराजप्रभृतयस्सर्वेऽपि तमिममभ्यर्थ्य हस्तिमस्तकमधिरोप्य,

जयति जयति विद्वान् भट्टनाथो महात्मा जयति जयति मान्यो विष्णुचित्तो महीयान्।
जयति जयति धन्यो दिव्यसूरिर्गरीयान् जयति जयति तत्त्वस्थापनाचार्यवर्यः॥

जयति जयति लक्ष्मीनाथकारुण्यपात्रं जयति जयति विद्वन्मस्तकन्यस्तपादः।
जयति जयति सूरिस्सर्ववित्सार्वभौमो जयति जयति तत्त्वज्ञानिनामग्रगण्यः॥

इत्येवमेवं विजयघोषणा विरचयन्तः प्रादीवृतत्प्रमेयमहोत्सवम् । ततःप्रभृति भट्टनाथ इति विरुदमस्य जगति विशेषतः पप्रथे । श्रीचिह्नकाहलीशङ्खभेरीनिनदातिशयसनाथं जैत्रयात्रोत्सवमनुपममनुभवति सति भट्टनाथे सूरिप्रवरे, तन्महस्य महोत्सवं दिदृक्षू मातरपितराविव दिव्यदम्पती श्रीवैकुण्ठदिव्यधाम्नः पतगराजमारुह्य समुपेत्य परमाद्भुत दर्शनममुतो दिदिशतुः । दिव्येन चक्षुषा सानन्दमीक्षमाणो दिव्यसूरिवरेण्यो विष्णुचित्तो मनागप्यवलेपमनुद्वहन् परममक्तिसीमनि स्थितो भगवतो ज्ञानशक्त्यादिगुणगणान् विस्मृत्य सौन्दर्यसौकुमार्यलावण्यादीनेव गुणान् भृशमनुसन्दधानः 'हा हन्त हन्त ! अकालकाल्ये दिव्ये धाम्नि परं विराजितुमर्हो भगवान् एवं नाम कालसाम्राज्यास्पदेऽत्र प्रकृतिमण्डले दृष्टिपथमुपयातः ! आः ! किमप्यनवद्यमस्य भवेदितमु !' इति प्रेमभूम्ना भृशमतिशङ्कमानो विह्वलविक्लबहृदयस्तद्दिव्यमङ्गलविग्रहस्याखिलहेयप्रत्यनीककल्याणैकतानस्यापि नित्यश्रियं नित्यमङ्गलमाशंसमानस्तस्यैव हस्तिनः स्कन्धे निषण्णस्सपदि * पलाण्डु पलाण्डु * [जय विजयीभव] इत्युपक्रम्य मङ्गलान्याशास्त । भगवांश्च कृतकृत्यः परमसंतुष्टो निजं धाम विजगाहे ॥

अथ च भट्टनाथो मुनिवर आत्मीयपादारविन्दप्रणिपतितं पाण्ड्यकुलपतिं नरपतिमतिशिशिरकटाक्षणेनानुगृह्य भागवतगोष्ठीगरिमाकलय्य निजावसथदिव्यदेशमासाद्य राजपरिषदि समुपलब्धमखिलमपि शुल्कद्रव्यं श्रीवटपत्रशायिभगवन्मन्दिरगोपुरनिर्माणकैङ्कर्ये विनियुज्य यथापुरं कुसुमोपहरणकैङ्कर्यविरतोऽध्यात्मशास्त्रप्रवचनेन शिष्यमण्डलीस्समुज्जीवयन् दिगन्तविसृत्वरविपुलविमलयशाः प्रचकाशे ॥

अनेनानुगृहीतं दिव्यप्रबन्धद्वितयं सुप्रसिद्धमहिमशालि प्रथते । १. तिरुप्पलाण्डुनामा मङ्गलाशासनदिव्यप्रबन्धो द्वादशगाथात्मकः । २. पेरियाल्वार् तिरुमोलि [श्रीविष्णुचित्तसूक्त] नामा दिव्यप्रबन्ध एकषष्ट्यधिकचतुश्शत (४६१) गाथात्मकः । तदिदं दिव्यप्रबन्धद्वितयं प्राथमिकसहस्रे प्रथमतो न्यवेशि पूर्वाचार्यैः । श्रीकृष्णावतारगुणचेष्टितानुभवोऽस्य निष्प्रतिद्वन्द्वः परमविलक्षणः प्रथते । विष्णुचित्तो भट्टनाथ इति च नामनी बिभ्राणोऽप्यसौ महादिव्यसूरिः [पेरियाल्वार्] इत्येव सुप्रसिद्धं व्यपदेशमश्नुते । कारणं चात्रैवमनुगृह्णन्ति श्रीवरवरमुनीन्द्रा उपदेशरत्नमालायाम्— भगवन्मङ्गलाशासनविषये दिव्यसूर्यन्तरापेक्षयापि भृशमतिशयितमभिनिवेशमावहद्यदसौ तत एव महानिति विरुदमुपलेभे— इति ॥ वेदान्ताचार्यास्तु गोदास्तुतावामनन्ति—स्वदुहितृचिकुरधृतपुष्पमालिकां भगवत उपहरन्नसौ महान् व्यपदिदिश इति । सा च कथा गोदादेवीवैभवप्रकरणेऽनुसन्धेया ॥

इति श्रीभट्टनाथार्यवैभवं हृदि बिभ्रताम् । वेदवेदान्तसर्वस्वं हस्तामलकतामियात् ॥

इति श्रीभट्टनाथसूरिवैभवं समाप्तम् ॥

॥ तिरुप्पल्लाण्डुदिव्यप्रबन्धभूमिका ॥

सोऽयं दिव्यप्रबन्धः श्रीविष्णुचित्तापरनामधेय श्रीभट्टनाथ योगीन्द्रप्रणीते दिव्यप्रबन्धद्वितये प्राथमिकः । यद्यप्यसौ योगीन्द्रो दिव्यसूर्यावतारपरम्परायां सप्तमः, अथाप्यदसीयोऽयं प्रबन्ध एव द्राविडाम्नायरूपसकलदिव्य-

प्रबन्धेष्वपि प्राथमिकं स्थानं प्राप्नोति । संस्कृतवेदोपक्रमे यथा नियतं प्रणवानुसन्धानं तथा द्राविडवेदोपक्रमे एतस्य दिव्यप्रबन्धस्य पारायणं नियतमिति संप्रदायः । मङ्गलाशासनात्मकत्वादेतस्य प्रबन्धस्य ॥

'पल्लाण्डु' इति मङ्गलाशासनपर्यायः । (तिरु) इति श्रीशब्दपर्यायः । तथा च (तिरुप्पल्लाण्डु) इत्यस्य श्रीमङ्गलाशासनप्रबन्ध इत्यर्थस्सिद्धः । श्रीभागवतम्, श्रीभाष्यमित्यादाविव श्रीशब्दोऽत्र माङ्गलिकः, न तु लक्ष्मीवाचकः । शरदश्शतं विजयीभवेति भगवन्तमुद्दिश्य यन्मङ्गलाशासनं कृतं भट्टनाथमुनिवरेण, तत्प्रतिपादको दिव्यप्रबन्ध इति फलितम् । किमर्थं कदा वा मङ्गलाशासनं कृतमित्येतत्तु मुनिवरस्यास्य वैभवे विशदम्; तत्तो वेदितव्यम् ॥

अवाप्तसमस्तकामत्वेन सर्वरक्षकत्वेन च प्रसिद्धस्य भगवतस्सकाशात् स्वस्य मङ्गलप्रार्थनं खलु युक्तम्; तादृशीं पद्धतिं विहाय, मङ्गलनिधेरेव भगवतो मङ्गलाशासनं कथं कृतमिति केचिदाशङ्केरन् । अत्रैवं समादधते पूर्वाचार्याः । भक्तानां सज्जनानां ज्ञानदशा प्रेमदशेति दशाद्वितयं वर्तते । ज्ञानदशायां रक्ष्यरक्षकभावः व्यवस्थितोऽवतिष्ठते । 'सर्वरक्षको भगवान्; वयं भगवता रक्ष्याः; तत्सकाशादस्माभिर्मङ्गलानि प्राप्तव्यानि' इत्यनुसन्धानं तन्मूलकप्रार्थनादिकं च ज्ञानदशायां प्रवर्तते । प्रेमदशायां तु विपर्यासेन भवति---रक्ष्यरक्षकभावानुसन्धानं विरमिष्यति । सर्वेश्वरस्य ज्ञानशक्त्यादिगुणगणान् विस्मृत्य तदीयसौन्दर्यलावण्यसौकुमार्यादिकमसकृदनुसन्धाय द्रवीभवन्मनसां प्रेमपरवशानां भगवति रक्षकत्वाध्यवसायः प्रच्युतो भवति । भगवन्तं रक्षितुं प्रयतन्ते ते । अखिलहेयप्रत्यनीककल्याणैकतानेऽपि तस्मिन् भगवति कालदेशादिवैगुण्यवशात् हा हन्त किमप्यवद्यं संभवेत्किमु ! इति शङ्कातङ्काङ्कुरो मनसि भवति प्रीतिरूपापन्नज्ञाननिधीनां महताम् । तयैवातिशङ्कया मङ्गलाशासनप्रवृत्तिरुन्मिषति ॥

दण्डकारण्ये श्रीरामचन्द्रं सेवितवतां महर्षीणां तस्मिन् परमपुरुषत्वप्रतिपत्तिरासीदेवानपाया । तथाऽपि ते प्रेमपारवश्यान्मङ्गलाशासने प्रावर्तन्तेति प्राह प्राचेतसः---* ते तं सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणः । मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः * इत्यनेन श्लोकरत्नेन ॥

आस्तां तावत्प्राकृतमण्डलवृत्तान्तः । अज्ञानान्यथाज्ञानाद्यवभगन्धमसहमानायां नित्यविभूत्यां प्रकृष्टविज्ञानबलैकधामशेषशेषाशनगरुडप्रमुखा नित्यसूरयोऽपि व्यामुग्धास्सन्तो भगवद्रक्षणदीक्षिता भवन्तीति प्रत्यग्दृशा पश्यन्तो विपश्चितो व्याहरन्ति । तथा च श्रीगुणरत्नकोशे भट्टपादाः—* स्नेहात् अस्थानरक्षाव्यसनिभिरभयं शार्ङ्गचक्रासिमुख्यैरित्यादिकमभिदधिरे । एवं च भगवतो मङ्गलाशासनं स्वरूपानुबन्धीति सिद्धम् ॥

एवंविधमङ्गलाशासनरुचिर्यद्यपि श्रीपराङ्कुशपरकालादीनामन्येषामपि दिव्यसूरीणामस्ति, तथाऽपि श्रीभट्टनाथसूरेरस्यैव सेयमतिशयिनीति सुगममैदम्पर्येण पृथक्प्रबन्धप्रणयनात् । महायोगीति संज्ञाऽप्यस्य एतन्निबन्धनैव हि ॥

अस्मिन् दिव्यप्रबन्धे द्वादश गाथास्सन्ति । आद्यगाथाद्वयेन सपरिवारस्य भगवतो मङ्गलान्याशास्ते स्वयं मुनिवरः । अथ तृतीयचतुर्थपञ्चमगाथाभिः क्रमेण भगवत्प्रातिकामुकान् कैवल्यार्थिन ऐश्वर्यार्थिनश्च भगवन्मङ्गलाशासनार्थमाह्वयति । आहूतानां तेषां त्रिविधानामधिकारिणां वाचा मङ्गलाशासनं निबध्नाति षष्ठसप्तमाष्टमगाथाभिः क्रमशः । तैस्संमिलितस्य स्वस्य वाचा मङ्गलाशासनं निबध्नाति नवमदशमैकादशगाथाभिः । अथ द्वादशी गाथा फलश्रुतिः—इति विवेकः ॥

इत्यवतारिका समाप्ता ॥

॥ अथ मङ्गलाशासनदिव्यप्रबन्धप्रारम्भः ॥

श्रीविष्णुचित्तमुनीन्द्रैरनुगृहीता तिरुप्पल्लाण्डु—मङ्गलाशासनकृतिः ॥

पल्लाण्डु पल्लाण्डु पल्लायिरत्ताण्डु - पल कोडि नूरायिरम् ।
मल्लाण्ड तिण्डोळ् मणिवण्णा ! उन् शेवडि शेव्वि तिरुक्काप्पु ॥ १ ॥

பல்லாண்டு பல்லாண்டு பல்லாயிரத்தாண்டு * பலகோடி நூறாயிரம்
மல்லாண்ட திண்டோள் மணிவண்ணா ! * உன் சேவடி செவ்வி திருக்காப்பு.

[द्राविडगाथायाः संस्कृतविवर्तरूपा छाया ।]

जय विजयीभव जय विजयीभव, जयजय शरदश्शतशतमयुतम् ।
जयजय मल्लनिहन्तृभुजोज्ज्वल ! मणिवर्ण ! तवांघ्रिरुचिर्जयतात् ॥ १ ॥

* * * चाणूरमुष्टिकादिमल्लवधसमर्थबलिष्ठभुजशालिन् ! इन्द्रनीलमणिप्रभ ! जय विजयीभव शरदश्शतम् । भवदीयपादारविन्दसौन्दर्यं च जयतु जयतु सुचिरम् ॥ इति मूलगाथार्थः ॥

(विशेषविवरणम् ।) भयशङ्कया भट्टनाथो मङ्गलाशासने प्रवृत्त इति जानन् भगवान् 'हा हन्त कुत एवमसावस्थाने व्यामुह्यति ; अप्रतिमभुजबलशालिनोऽपि शत्रून् अनायासेन निरसितुं क्षमं देहबलमस्माकमस्तीति न जानातीव सूरिरसौ ; तादृशं बलं यदि वयमस्मै प्रदर्शयेम, अथासौ प्रशान्तभयो मङ्गलाशासनादुपरमेत्' इति मन्यमानः—पुरा कृष्णावतारे स्वहननार्थं कंसेन प्रेरितान् चाणूरमुष्टिकादिमल्लवर्गान् येन भुजबलेन निजघान तदेवाधुना प्रादर्शयदस्मै । भयनिवृत्तये प्रदर्शितं तत् हन्त भयविवृद्धये प्रकल्पतेस्म विष्णुचित्तस्य । यदि कोऽपि पुमान् महावीरो महाशूरश्च स्यात् तस्य जननी अवश्यमेव खलु भयविह्वला स्यात्—'वीरः शूरश्च सोऽयं निर्भयं युद्धसंनद्धो भवेद्यदि तर्हि कालदेशादिदौर्गुण्यवशात् किमप्यवद्यमुदियात्किमु !' इति । तथैवायं सूरिरपि मल्लहननकुशलभुजबलमधिकृत्य भीतभीतः पुनरपि मङ्गलान्याशास्ते । पादारविन्दे उद्दिश्यात्र क्रियमाणं मङ्गलाशासनं कृत्स्नदिव्यमङ्गलविग्रहमङ्गलाशासनपर्यायभूतं वेदितव्यम् । स्तनन्धयप्रजाया मातुः स्तन इव भक्तवर्गस्य भगवत्पादारविन्दे परमुद्देश्यताबुद्धिर्नैसर्गिकी । (१)

अडियोमोडुम् निन्नोडुम् पिरिविन्रि यायिरम्पल्लाण्डु ❁
वडिवाय् निन्वलमार्पिनिल् वाऴ्किन्र मङ्गैयुम् पल्लाण्डु ❁
वडिवार् शोदि वलत्तुरैयुम् शुडराऴियुम् पल्लाण्डु ❁
पडैपोर् पुक्कु मुऴङ्गुम् अप्पाञ्जशन्नियमुम् पल्लाण्डे ॥ २ ॥

அடியோமோடும்நின்னோடும் பிரிவின்றியாயிரம்பல்லாண்டு *
வடிவாய் நின்வலமார்பினில் வாழ்கின்றமங்கையும்பல்லாண்டு *
வடிவார்சோதிவலத்துறையும் சுடராழியும்பல்லாண்டு *
படைபோர்புக்குமுழங்கும் அப்பாஞ்சசன்னியமும்பல்லாண்டே (2)

[छाया ।] स्वामिन् ! दासजनैस्सह स्थितिरियं जेजेतु ते शाश्वती
वक्षःपीठविभूषिणी विजयतां पद्मा च ते प्रेयसी ।
जीयाद्दक्षिणपाणिमण्डनमणिः ज्योतिर्मयश्चक्रराट्
जीयाद्युद्धमहीनिसृत्वररवस्ते पाञ्चजन्योऽपि सः ॥ २ ॥

भगवन् ! दासभूतानामस्माकं भवतश्च नित्यसंश्लेषो नित्यश्रियं नित्यमङ्गलमश्नुताम् । भवतोऽप्यतिशयावहा भवत्प्रकारभूता भवदीयवक्षस्स्थलनित्यनिवासिनी श्रीमहालक्ष्मीश्च नित्यमङ्गलशालिनी भूयात् । भवदीयदिव्यमङ्गल विग्रहव्यापिज्योतिःपुञ्जो दक्षिणपाणिस्थस्तेजिष्ठो हेतिराजोऽपि चिरं विजयताम् । सेनासनाथयुद्धरङ्गे प्रविश्य जयघोषणामातन्वानः श्रीपाञ्चजन्योऽपि नित्यमङ्गलभाग्भवतु । इति गाथार्थः ॥

(वि.) भगवत एव समृद्धिमाशंसमान एष सूरिवरः कथं प्रथमपादे स्वस्यापि समृद्धिं कामयत इति चेत्; भगवतो नित्यं मङ्गलाशासनार्थं स्वस्य सद्भावश्चावश्यकः खलु । स्वात्मनोऽभावे मङ्गलाशासनविच्छेदेन भगवतः किमप्यवद्यमुत्पद्येतेति भीतिरस्य स्वाभाविकी । अतश्चात्र स्वस्थैर्यप्रार्थनमपि भगवन्मङ्गलाशासन शेषभूतमेवेति ध्येयम् । द्वितीयचरणेन श्रीमहालक्ष्म्या मङ्गलाशासनं क्रियते । लोके पुष्पं यथा सौरभेणोत्कृष्यते, यथा च रत्नं प्रभया, तथा सर्वेश्वरोऽपि भगवान् लक्ष्मीसंबन्धवशादेव स्वयं समुत्कर्षं विन्दतीति सांप्रदायिकी प्रथा । अनुजगृहुश्च भट्टपादाः श्रीगुणरत्नकोशे—* तव स्पर्शादीशं स्पृशति कमले मङ्गलपदं तवेदं नोपाधेरुपनिपतितं श्रीरसि यतः । प्रसूनं पुष्यन्तीमपि परिमलर्द्धिं जिगदिषुः न चैवन्त्वादेवं स्वदत इति कश्चित्कथयते ॥ इति, * अपाङ्गा भूयांसो यदुपरि परं ब्रह्म तदभूत् इति च । इममर्थमिह स्फोरयति [द्वितीयपादस्थ] लक्ष्मीविशेषणम् ॥

अथ तृतीयचतुर्थचरणाभ्यां सुदर्शनपाञ्चजन्ययोर्मङ्गलाशासनं विरच्यते । आयुधकोटिप्रविष्टयोरपि तयोराभरण-कोटावेवानुसन्धानं भक्तप्रवराणां हृदि समुन्मिषति । अत एव, एताभ्यां दिव्याभरणाभ्यां विलसन्त्यास्सुषमाया अनपायो भूयादिति मङ्गलमाशास्यते । (२)

वाळाळपट्टु निन्ब्रीरुळ्ळीरेल् वन्दु मण्णुम् मणमुम् कोळ्मिन् ❀
कूळाळपट्टु निन्ब्रीर्हळै येङ्गळ् कुळुविनिल् पुहुदलोट्टोम् ❀
एळाट्कालुम् पळिप्पिलोम् नाङ्गळ् इराक्कदर्वाळ् * इलङ्गै
पाळाळाह प्पडैपोरुदानुक्कु प्पल्लाण्डु कूरुदुमे ॥ ३ ॥

வாழாட்பட்டுநின்றீருள்ளீரேல் வந்துமண்ணும்மணமுங்கொண்மின் *
கூழாட்பட்டுநின்றீர்களை எங்கள்குழுவினில்புகுதலொட்டோம் *
ஏழாட்காலும்பழிப்பிலோம்நாங்கள் இராக்கதர்வாழ் * இலங்கை
பாழாளாகப்படைபொருதானுக்குப் பல்லாண்டுகூறுதுமே. (3)

[छाया] यद्युज्जीवनकाङ्क्षिणो भवथ तर्ह्यागम्यतां सादरं
नैवान्नार्थिजनः कदाऽपि भजते गोष्ठ्यां प्रवेशं तु नः ।
अस्माकं निरवद्यता सुविदिता ह्यासप्तसंतानतः
लङ्काध्वंसविधायिनो रघुपतेराशास्महे मङ्गलम् ॥ ३ ॥

उज्जीवनहेतुभूते भगवद्दास्ये निष्ठागरिष्ठा यदि भो वर्तध्वे, तर्हि भवन्तोऽत्र समागत्य अस्माभिस्सह संमिलिता भूत्वा यथायोग्यं कायिकं कैङ्कर्यं कुरुत । मानसिकं चाभिमानं वहत । केवलं कुक्षिभरणार्थमन्यशेषभूतान् जनानस्मदीयगोष्ठ्यां न वयमङ्गीकरिष्यामः । (निशमयत चास्मदीयं विशेषम् ।) वयं तावत् सप्तभिस्संततिभिरनवद्यास्स्मः । रक्षोगणावसथभूतां लङ्कां शून्यां कर्तुं वानरसेनया युद्धं प्रवर्तितवतो रामभद्रस्य मङ्गलाशासनमेव चास्माकं नित्यचर्या ॥ इति गाथार्थः ।

(वि.) दिव्यसूरिरसौ स्वयमेकाकी सन् मङ्गलाशासनं कृत्वा कथं नु तृप्तो भवेत् । * एकः स्वादु न भुञ्जीतेति चानुसन्दधानः अन्यानपि भूयसो जनान् भगवन्मङ्गलाशासने सहायभूतान् वरीतुमैच्छत् । जगति कतिविधा अधिकारिणस्सन्तीति परामृशतिस्म । ऐश्वर्यार्थिनः, आत्मानुभवरूपकैवल्यार्थिनः, भगवदनुभवार्थिन इति एवंत्रिधा अधिकारिणस्सन्तीति समैक्षत । एष्वधिकारिषु ऐश्वर्यकामाः कैवल्यार्थिनश्च यद्यपि प्रयोजनान्तरपरा एव, तथाऽपि क्षुद्रप्रयोजनार्थमपि वा भगवन्तमाश्रयन्ते ते, भगवन्तं स्तुत्वा प्रार्थयन्ते च—इति कोऽपि विशेषस्तेष्वस्ति खलु । अतस्तानपि कथञ्चिदुपदेशेन विनेतुमैच्छदसौ सूरिः । भगवत्प्राप्तिकामानुत्तमाधिकारिण इव तानपि क्षुद्राधिकारिणो मङ्गलाशासनसाहाय्यार्थमाकारयितुमिच्छन्नसौ प्रथमतो भगवच्चरणार्थिनो ज्ञानिन आह्वयति । वस्तुतस्सर्वोत्कर्षशालिनां स्वसजातीयानां तेषामाह्वानमग्रिमं युक्तमेव खलु ।

भगवद्विषयव्यतिरिक्तेषु प्रापञ्चिकविषयेषु क्रियमाणा शेषवृत्तिः स्वरूपानुरूपा न भवति । अत एव क्लेशरूपा च भवति । क्लेशं सोढ्वा करणेऽपि अत्यल्पफलप्राप्तये परं सा कल्पते । भगवद्विषयकं कैङ्कर्यं तु स्वरूपानुरूपम् अत एव सुकरम् अविलम्बेन भगवन्मुखोल्लासहेतुभूतं शाश्वतिकफलप्रदं च प्रथत इति तादृशे भगवद्दास्ये निष्णातान् "उज्जीवनहेतुभूतभगवद्दास्यनिष्ठागरिष्ठ" पदेन व्यपदिशतीति यत् तदिदमतिचारु । एतादृशोऽधिकारिणोऽत्यन्तं दुर्लभा इति सूचयति यद्यालिङ्गनम् । "यदि भो वर्तध्वे" इति स्वल्वमिहितम् ।

भगवदर्चावतारस्थलेषु दिव्यदेशेषु सकलविधकैङ्कर्याचरणस्य स्वरूपप्राप्तत्वेन मुमुक्षून्प्रति "यथायोग्यं कायिककैङ्कर्यं कुरुते"ति कथितम् । परश्रामकतया बहिः कैङ्कर्यानुष्ठानामिनयतः किं सेत्स्यति ? हार्दाभिमानवहनस्यैवावश्यकत्वेन "मानसिकं चाभिमानं वहते"ति कथितम् ।

मुमुक्षूणां समाजे बुभुक्षवोऽपि मिश्रास्सन्तो मोहयन्ति जगदिति प्रत्यक्षलक्ष्यमिदम् ; तादृशानुदरंभरिजनानवलोकितवान् विष्णुचित्तसूरिस्तान् प्रतिषेधति "केवलं कुक्षिभरणार्थमन्यशेषभूतान् जनानस्मदीयगोष्ठ्यां न वयमङ्गीकरिष्याम" इति । युष्माकमस्मद्गोष्ठीप्रवेशतो न कोऽपि लाभस्सेत्स्यतीति भावः । नीचसेविनो जना नीचानेवानुधावन्तु ; मा स्म पुनरत्रागच्छन्निति तावददसीयोऽभिसन्धिः । ननु परमकारुणिकोऽयं सूरिवरेण्यस्तादृशानपि दुष्टानाहूय शिक्षयित्वा स्वीकृत्य पवित्रीकर्तुं ह्यर्हति ; किमर्थं तान् प्रतिषेधतीति चेत्, एतादृशेन गर्हणेन मुमुक्षूणामतिशयितवैभवख्यापनमेव फलति । बुभुक्षूणां सर्वथा धिक्कारो नेत्राभिमतस्सूरिवरस्यास्य । तादृशा अपि वराका एतद्दिव्यप्रबन्धानुसन्धानेन पविता भवन्त्विति हि सोऽयमभिसंधत्ते । अन्ततः फलश्रुतिगाथया तद्व्यक्तमेव । अतोऽस्य परमकारुणिकताया न काऽपि क्षतिः । एवंविधगर्हणोक्त्या बुभुक्षवोऽपि व्रीडिता मुमुक्षुभावं भजन्तामित्येतावानभिसन्धिरिह ग्राह्यः ।

"अस्मदीयगोष्ठ्यां न वयमङ्गीकरिष्याम" इति कथितवानसौ स्वकीयगोष्ठ्या अभ्यर्हितत्वे हेतुं निरूपयति—गाथाया उत्तरार्धेन । [वयं तावत् सप्तभिस्संततिभिरनवद्याः स्मः] उपायान्तरपरत्वमुपेयान्तरपरत्वमित्यादिरूपाण्यवद्यानि लेशतोऽपि नास्मासु लब्धावकाशानीत्यर्थः । अथ स्वकीयवृत्तिवैलक्षण्यमपि प्रतिपाद्यते—रामभद्रस्य मङ्गलाशासनमेव चास्माकं नित्यचर्येति । रावणवधानन्तरं विजयश्रियमधिकृत्य मङ्गलाशासनमवश्यकर्तव्यमपि तदात्वे न केऽपि चक्रुः ; तां न्यूनतां परिहर्तुं वयमिदानीं मङ्गलान्याशास्महे तदेवापदानमधिकृत्य । अत एवंविधवृत्तिवैलक्षण्यशालिनामस्माकमभ्यर्हितायां गोष्ठ्यामनीदृशा उदरंभरयो न प्रवेष्टुमर्हन्ति । ये तावदुज्जिजीविषवः ते काममागत्य सानन्दं प्रविशन्तु—इत्युक्तं भवति । (३)

एडुनिलत्तिलिडुवदन्मुन्नम् वन्दु एङ्गळ् कुळाम् पुहुन्दु *
कूडुमनमुडैयीर्हळ् वरम्बोळिवन्दोल्लैक्कूडुमिनो *
नाडुनगरमुम् नन्गरिय नमो नारायणाय वेन्रु *
पाडुमनमुडैप्पत्तरुळ्ळीर् वन्दु पल्लाण्डु कूरुमिने ॥ ४ ॥

ஏடுநிலத்திலிடுவதன்முன்னம்வந்துஎங்கள்குழாம்புகுந்து *
கூடுமனமுடையீர்கள் வரம்பொழிவந்தொல்லைக்கூடுமினோ *
நாடுநகரமும்நன்கறிய நமோநாராயணாயவென்று *
பாடுமனமுடைப்பத்தருள்ளீர் வந்துபல்லாண்டுகூறுமினே. (4)

[छाया] कैवल्याह्वयमुक्तिदेशगमनात्प्रागस्मदीयैस्समं
संश्लेष्टुं यदि काङ्क्षिणः स्वनियमं संत्यज्य भोस्त्वर्यताम् ।
श्रीनारायणमन्त्रराजमवनौ सर्वत्र गातुं रुचिः
यद्यास्ते भवतां, समेत्य भगवद्भद्रावलीं गायत ॥ ४ ॥

कैवल्यानुभवकांक्षया क्रियमाणोपासना भो जनाः ! यूयं कैवल्यकामनामपहाय समागत्य, अनन्यप्रयोजनानामस्माकं गोष्ठ्यां प्रविश्य यदि पुनरुज्जिजीविषथ तर्हि हेयतमकैवल्यस्थानप्राप्तितः प्रागेव आत्मानुभवमात्रकामनारूपामात्मीयां दुर्व्यवस्थामपाकृत्य परिपूर्णभगवदनुभवकामनामावाह्य सरभसमागत्य समाजमस्मदीयं प्रविशत । अथ प्राज्ञपामरविभागविरहेण सर्वेऽपि यथा युष्माकमुत्कर्षमवगच्छेयुस्तथा श्रीमदष्टाक्षरमहामन्त्रसंकीर्तनप्रवणभक्तगोष्ठीनिविष्टा भूत्वा भगवन्मङ्गलाशासनमनुतिष्ठत । इति गाथार्थः ॥

(वि.) अथास्यां गाथायां प्रकृतिवियुक्तात्मानुभवकामुकानां कैवल्यार्थिनां भगवन्मङ्गलाशासनार्थमाह्वानं निबध्यते । अधस्तनगाथायामुदरंभरयो यथा धिक्कृतास्तथैवैतेषामपि केवलानां धिक्कारो यद्यप्यावश्यकः, तथाऽपि कैवल्यरूपस्वप्रयोजनसिद्धयेऽप्यमी भगवन्तमेव खलु भजन्ते इति संतोषभूम्ना समाह्वयतीमान् क्रमश उपदेशैस्संशोधयितुकामस्सूरिवरोऽसौ ।

मूले, क्षुद्रस्थानप्रापणात्पूर्वमागच्छतेत्येव वर्तते, न तु कवल्यवाचकशब्दप्रयोगोऽस्ति यद्यपि, तथाऽपि प्रकरणबलात् कैवल्यविवक्षयैव "क्षुद्रस्थान" पदप्रयोगः कृतोऽस्तीति सुगमम् । * भोगा इमे विधिशिवादिपदं च किं च स्वात्मानुभूतिरिति या किल मुक्तिरुक्ता । सर्वं तदूषजलजोषमहं जुषेय हस्त्यद्रिनाथ ! तव दास्यमहा रसज्ञः * [वरदराजस्तवे ८०] इति श्रीकूरनाथगुरुवरोक्तरीत्या स्वात्मानुभूतिरूपमोक्षप्राप्तौ जातायाम् अथ पुनरावृत्तिविहीनात्तस्मात् स्थानान्निर्गमनं सर्वथा दुश्शकमेव खलु । निरतिशयभगवदनुभवप्रच्युतिर्यावदात्मभाविनी खलु भवित्री । अतस्तादृशदुर्गतिप्राप्तेः प्रागेव सत्वरमागच्छतेत्याह्वानमिदं युक्तरूपमावश्यकं च । विफलो हि गते जले सेतुबन्धोद्यमः ।

"आत्मानुभवमात्रमस्माकं पर्याप्तम्; भगवदनुभव आस्तां नाम दूरे" इति या खलु दुर्व्यवस्था निबद्धाऽमीभिः, सा प्रथमतो हातव्येति कथ्यते "आत्मीयां दुर्व्यवस्थामपाकृत्ये" त्यनेन । "ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्". [गीतायाम्] इत्युक्तरीत्या कैवल्यनिष्ठाः स्वाभीष्टसिद्धये प्रणवमात्रोच्चारणनिरता भवन्ति ; इतःपरं तु स्वाधिकारानुरूप्येण कृत्स्नस्यापि श्रीमदष्टाक्षरमहामन्त्रस्योद्घोषणममीषामावश्यकमासीत् ; अत एवोच्यते "श्रीमदष्टाक्षरमहामन्त्रसंकीर्तनप्रवणभक्तगोष्ठीनिविष्टा भूत्वे" ति । एवंविधविलक्षणवाचिकव्यवहारेणैव प्राज्ञाः परे च ज्ञास्यन्त्यमीषामभिनवमतिशयमिति सुष्ठूक्तम् ॥ (४)

अण्डक्कुलत्तुक्कदिपतियाहि अशुररिराक्कदरै ❀
इण्डैक्कुलत्तै येडुत्तुक्कलैन्द इरुडीकेशन्तनक्कु ❀
तोण्डक्कुलत्तिलुळ्ळीर् वन्दडितोळुदु आयिरनामम् शोल्लि ❀
पण्डैक्कुलत्तैत्तविर्न्दु पल्लाण्डु पल्लायिरत्ताण्डेन्मिने ॥ ५ ॥

அண்டக்குலத்துக் கதிபதியாகி அசுரரிராக்கதரை *
இண்டைக்குலத்தையெடுத்துக்களைந்த இருடீகேசன்தனக்கு *
தொண்டக்குலத்திலுள்ளீர்வந்தடி தொழுது ஆயிரநாமஞ்சொல்லி *
பண்டைக்குலத்தைத்தவிர்ந்து பல்லாண்டுபல்லாயிரத்தாண்டென்மினே.

[छाया] अण्डौघाधिपतिं नमाम इति वा दैतेयरक्षोगण-
प्रध्वंसैकपटुं नमाम इति वा संकीर्तयन्तोऽत्र भोः ।
अन्नार्थार्थिजनाः! सहस्रमपि तन्नामानि संकीर्त्य त-
त्पादाब्जे प्रणिपत्य गायत शुभं प्रच्याव्य पूर्वं कुलम् ॥ ५ ॥

“ परस्सहस्राणामण्डराशीनामधिपतये ते नमः ” “ असुरराक्षसदुर्वर्गनिहनननिपुणाय हृषीकेशाय ते नमः ” इत्यनुसन्धाननिरता भो भो ऐश्वर्यार्थिनः ! यूयं भगवदनुभववैमुख्यरूपां पुरातनीं स्थितिमपहाय, अस्माभिस्सह मिलित्वा भगवत्पादारविन्दे प्रणम्य सहस्रं दिव्यनामानि संकीर्त्य सदा मङ्गलाशासनपरा भवत । इति गाथार्थः ।

(वि.) अस्यां गाथायामैश्वर्यार्थिनामाह्वानं निबध्यते, ऐश्वर्यार्थिनो हि द्विविधा भवन्ति—भ्रष्टैश्वर्यकामा अपूर्वैश्वर्यकामा इति । “ चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ! । आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ! ” इत्यस्मिन् गीताश्लोके आर्तपदेनाभिहितो भ्रष्टैश्वर्यकामः, अर्थार्थिपदेनाभिहितः अपूर्वैश्वर्यकामः । तथा च गीताभाष्यम्—“ आर्तः—प्रतिष्ठाहीनः भ्रष्टैश्वर्यः पुनस्तत्प्राप्तिकामः । अर्थार्थी—अप्राप्तैश्वर्यतया ऐश्वर्यकामः । तयोर्मुखभेदमात्रम् । ऐश्वर्यविषयतया ऐक्यादेक एवाधिकारः । ” इति । एवं नाम द्विविधानामप्यैश्वर्यार्थिनामत्राह्वानं स्पष्टमुपलभ्यते । कथमिति चेत् ; ‘ अण्डाधिपतये नमः ’ इत्येव सततमनुसन्धातारः, ‘ असुरराक्षसशत्रवे नमः ’ इत्येव सततमनुसन्धातारश्च गाथायामस्यामाहूयन्त इति मूले शब्दसंनिवेशत एव सुगमं भवति । ऐश्वर्यस्य चरमावधिभूतमण्डाधिपत्यं ये कामयन्ते ते स्वकीयतादृशकामनां व्यञ्जयितुम् ‘ अण्डाधिपतये नमः, अण्डाधिपतये नमः ’ इत्येव नक्तंदिवमनुध्यायन्ति । अण्डाधिपतिर्भगवान् स्वसाम्यापत्तिमनुगृह्णातु मयीति तत्तात्पर्यम् । प्रागेव स्थितमैश्वर्यं दानवयातुधानादिभिरपहृतं पुनरपि ये लिप्सन्ते ते स्वकीयतादृशकामनां व्यञ्जयितुम् ‘ असुरराक्षसशत्रवे नमः, असुरराक्षसशत्रवे नमः ’ इति दिवारात्रमावर्तयन्ति । असुरराक्षसनिहननपूर्वकमस्मदीयं प्राक्तनमैश्वर्यमुपलम्भयतु भगवानिति तत्तात्पर्यम् । तथा च सुस्पष्टमभूत् अपूर्वैश्वर्यकामा भ्रष्टैश्वर्यकामाश्च गाथायामस्यामाहूयन्त इति ।

एतानाहूय सूरिरसावुपदिशति—हा हन्त भवन्तः स्वयंप्रयोजनतया नाम्नां सहस्रमनुसन्धातुमर्हन्ति ; तदेव हि परमानन्दकन्दम् ; तादृशमनुसन्धानमपहाय ‘ अण्डाधिपतिः, असुरराक्षसशत्रुः ’ इति नामद्वयमात्रकीर्तनं क्षुद्रप्रयोजनकामनयैव खलु भवति वः । नैतद्युज्यते । इतःपरमनन्यप्रयोजना भूत्वा सहस्रमपि नामानि संकीर्त्य गोष्ठ्यामस्मदीयायामन्वयमवाप्य मङ्गलाशासनप्रवणा भवतेति ।

एन्दैतन्दै तन्दैतन्दै तम्मूत्तप्पन् एळ्पडिकाल् तोडङ्गि ❀
वन्दु वाळिवळियाट्चेय्हिन्रोम् ❀ तिरुवोणतिरुविळविल्
अन्दियम्पोदिलरियुरुवाहि अरियैयळित्तवनै ❀
पन्दनैतीरप्पल्लाण्डु पल्लायिरत्ताण्डेन्रु पाडुदुमे ॥ ६ ॥

எந்தைதந்தைதந்தை தந்தைதம்மூத்தப்பன் ஏழ்படிகால்தொடங்கி *
வந்துவழிவழியாட்செய்கின்றோம் * திருவோணத்திருவிழவில்
அந்தியம்போதிலரியுருவாகி அரியையழித்தவனை *
பந்தனைதீரப்பல்லாண்டு பல்லாயிரத்தாண்டென்றுபாடுதுமே. (6)

[छाया] मत्तातोऽथ पितामहोऽस्य जनकस्तत्तातततत्तातत-
तातां इत्यधिसप्तपर्वनियताः कैङ्कर्यसंपत्कराः ।
श्रोणायां दिवसावसानसमये भूत्वा नृसिंहात्मना
शत्रुं क्षिप्तवते ह्यवग्रहतये भद्रावलीं ब्रूमहे ॥ ६ ॥

अनन्यप्रयोजना वयम् अस्मत्ताततत्ताततत्तातततिपतामहपारम्पर्येण यथाक्रमं यथाकालं कैङ्कर्याण्यनुतिष्ठामो भगवतः दिव्ये श्रोणानक्षत्रे सायंसन्ध्यायां नृसिंहरूपमास्थाय भक्तवैरिणं हिरण्यकशिपुं ध्वस्तवते भगवते तादात्विक-दृष्टिदोषाद्यवद्यपरिहाराय मङ्गलान्याशास्महे । इति गाथार्थः ।

(वि.) अधस्तात् (३, ४, ९) गाथात्रयेणाहूतानां मुमुक्षूणां केवलानामैश्वर्यार्थिनां च श्रीविष्णुचित्त-सूरिगोष्ठीसमन्वयः क्रमश इतो गाथात्रयेण तत्तद्वाचा निबध्यते । अस्यां गाथायां मुमुक्षूणामागमनं स्वाधिकारकीर्तनं च तेषां गिरा निबद्धम् । एतेषामाह्वानकाले [तृतीयगाथायां] "वयं तावत् सप्तभिस्संततिभिरनवद्यास्स्मः" इति खल्वाह विष्णुचित्तसूरिः । एतादृशोऽतिशयः अस्माकमप्यनपाय इति ते मुमुक्षव आचक्षाणास्समागत्य प्रविशन्ति । भो विष्णुचित्तसूरे ! भवतो यादृशी महिमा यादृशी वृत्तिश्चास्ति तादृशो महिमा तादृशी वृत्तिश्चास्माकमप्यस्ति ; अतो वयं भवदीयगोष्ठीसमन्वययोग्या एव स्मः ; अस्मानङ्गीकरोतु कृपया तत्रभवानित्युक्तं भवति । स्वात्मनाऽऽहूताः केचन मुमुक्षवस्समागच्छन्तीति, त एवं कथयन्तीति च रच्यमानमिदं निबन्धनं विलक्षणोऽनुभवप्रकारः । भक्तवरा-स्तावदुच्चावचैः प्रकारैः स्वकीयं कालं क्षिपन्ति । तेषु कालक्षेपप्रकारेष्वयमन्यतमः । स्वकीयानाशाप्रवाहानेवं प्रकाश-यत्यसौ सूरिवर इति ध्येयम् ।

भक्तस्य दानवशिशोः परिपालनाय भद्रां नृसिंहकुहनामभिजामुषो भगवतस्तदात्वे मङ्गलाशासनं न केनापि कृतमिति न्यूनतापरिहाराय वयमिदानीं तस्यैव मङ्गलमाशास्मह इत्याचक्षतेऽमी । श्रीनृसिंहो भगवान् स्वातीनक्षत्रे प्रादुर्भूत इति खल्वैतिहासिकाः पौराणिकाश्च कथयन्ति ; अत्र तु श्रोणानक्षत्रे तत्प्रादुर्भावकथनं कथं नु युज्यत इति शङ्का भवितुमर्हति । अत्रैवं परिहरन्ति महान्तः ; * श्रोणा नक्षत्रं विष्णुर्देवता * इति भगवती श्रुतिराम्ना-

सीत् । श्रीरामस्य श्रीकृष्णस्य श्रीनृसिंहस्य वा प्रादुर्भावनक्षत्रं यत्किमपि वा भवतु ; तस्मिन् श्रोणानक्षत्रांशभावानुसन्धानमवर्जनीय मिति ।

(६)

तीयिर्पोलिहिन्ऱशेञ्जुडराऴि तिहऴ् तिरुच्चक्करत्तिन्
कोयिर्पोऱियाले योत्तुण्डु निन्ऱु कुडिकुडियाट्चेय्हिन्ऱोम्
मायप्पोरुपडैवाणनै आयिरन्दोळुम् पोऴिकुरुदि
पाय, शुऴत्तियवाऴिवल्लानुक्कु पल्लाण्डुकूरुदुमे ॥ ७ ॥

தீயிற்பொலிகின்றசெஞ்சுடராழி திகழ்திருச்சக்கரத்தின் *
கோயிற்பொறியாலேயொற்றுண்டுநின்று குடிகுடியாட் செய்கின்றோம் *
மாயப்பொருபடைவாணனை ஆயிரந்தோளும்பொழிகுருதி
பாய * சுழற்றியவாழிவல்லானுக்குப் பல்லாண்டுகூறுதுமே. (7)

[छाया] अत्यर्कानलदीपदीप्तिमहितश्रीचक्रलक्ष्माङ्किताः
संतानक्रमशो वयं भगवतः कैङ्कर्यमादध्महे ।
मायासङ्गरदक्षबाणभुजसाहस्रं स्रवच्छोणितं
कर्तुं हेतिपतिं नियोजितवते ह्याशास्महे मङ्गलम् ॥ ७ ॥

चन्द्रसूर्याद्यशेषतेजःपदार्थापेक्षयाऽपि भूम्ना प्रकाशमानस्य रक्तज्वालावलीविभूषितस्य वृत्ताकारस्य च श्रीसुदर्शनस्याङ्कनेन चिह्नितभुजा वयम् अनादिसंतत्या भगवत्परिचर्यामाचरयामः । किञ्च, कृत्रिमयुद्धविशारदसेनासनाथस्य बाणासुरस्य भुजसहस्रादपि यथा रक्तस्रावो भवेत्तथा स्वकीयं सुदर्शनं दिव्यायुधं परिभ्राम्य प्रयुक्तवते भगवते मङ्गलान्याशास्महे ॥ इति गाथार्थः ॥

(वि.) अधस्ताच्चतुर्थगाथायां कैवल्यार्थिन आहूताः खलु । ते सानुरागं समागत्य स्वान्वयं विज्ञापयन्तीति तेषां वाचा सेयं गाथा निबध्यते । एतेषामाह्वानकाले "प्राज्ञपामरविभागविरहेण सर्वेऽपि यथा युष्माकमुत्कर्षमवगच्छेयुस्तथा समागच्छत" इति खल्वभिहितं श्रीविष्णुचित्तसूरिणा । सैषा च वागमीभिस्सम्यगेव परिपालयत स्म । श्रीवैष्णवानामसाधारणलक्षणत्वेन प्रथितं यच्चक्राङ्कनम्, तद्धारणे सति सर्वेऽप्यस्मदीयमुत्कर्षं सम्यगेव जानीयुरिति प्रतिपद्यमाना अथ चक्राङ्कितभुजा भूत्वा समागच्छन्ति ; इममतिशयं स्ववाचा च कथयन्ति । चक्राङ्कनकथनं शङ्खाङ्कनस्याप्युपलक्षणं बोध्यम् । श्रीसुदर्शनस्य विक्रमो यस्मिन्नपदाने विजजृम्भे तदपदानमधिकृत्य मङ्गलाशासनं युक्तमिति मन्यमानास्तदप्याचरयन्ति ।

बाणासुरभङ्गकथा चैवम् ;—बलिचक्रवर्तिनस्संततौ जातो बाणासुरः कदाचिन्महादेवस्य नटराजस्य नटनमवलोक्य हृष्टः स्वकीयहस्तद्वयेनापि तदनुरूपतया मृदङ्गमार्जनामाकलयति स्म । ततस्सन्तोषविवशान्तरङ्गः पार्वतीपतिस्तस्य सहस्रबाहुतामनुजग्राह । अग्निमयप्राकारपरिवेष्टितनगरशालितां प्राज्यपराक्रमसंपदं विपुलमैश्वर्यं च वितीर्य

स्वयं च स्वकीयपरिवारसमन्वितस्सन् दुर्गद्वारे परिरक्षकपदवीमधितिष्ठन्नवर्तत । अस्य च दानवस्य दुहिता उषानाम्नी कदाचिन्निशीथे केनचिदतिसुन्दरेण पुरुषेण सह स्वस्य संघटितं स्वाप्नं संश्लेषं स्वप्राणसख्यै चित्रलेखायै निवेद्य, श्रीकृष्णस्य पौत्रः प्रद्युम्नस्य पुत्रोऽनिरुद्ध एव स पुमानिति तया सख्या सदुपायज्ञया कथितं विज्ञाय, महताऽपि वा प्रयासेन सोऽत्रानेतव्य इति तामेव प्रार्थयत । सा चैवं बलवदभ्यर्थिता स्वाभ्यस्तयोगविद्यामहिम्ना द्वारकापुरीमधिगत्य तत्र स्थितमनिरुद्धं बलादानीय न्यवीविशदुषाया अवरोधे। सा च तेन सह रममाणाऽवर्तत । तमिममुदन्तमवगच्छन् बाणासुरः कोपकषायिताक्षोऽनिरुद्धं नागास्त्रबद्धमचकलत् । एतादृश्यामत्रत्यायां स्थित्याम्, अथ द्वारकायामनिरुद्धमपश्यन्तश्चिरमन्विष्याप्यलभमाना यादवा वैक्लव्याकुलीविवशहृदया नारदेन महर्षिणा वृत्ततत्त्वं विज्ञाय भगवन्तं कृष्णं प्रार्थयन्ते स्म । वासुदेवश्च सद्यो गरुडारूढः प्रस्थाय बाणासुरराजधानीं शोणितपुरीमधिगच्छन् तदात्वे योद्धुमभिद्रुतान् परमशिवस्य प्रमथगणान् निहत्य * नन्दिन्यानन्दशून्ये गलति गणपतौ व्याकुले बाहुलेये चण्डे चाकित्यकुण्ठे प्रमथपरिषदि प्रास्तवत्यां प्रमाथम् । उच्छिन्द्याजौ बलिष्ठं बलिजभुजवनं यो ददावाद्रिभिक्षोः भिक्षां तत्प्राणरूपां स भवदकुशलं कृष्णहेतिः क्षिणोतु ॥ * इति श्रीसुदर्शनशतकोक्तरीत्या रुद्रपरिवारदेवतास्सर्वा अपि कान्दिशीकतां प्रापय्य, देवतान्तरभजनप्रवणानामिदमेव हस्तगतं फलमिति प्रथयितुकाम इव सुदर्शनेन बाणस्य भुजानुच्छिद्य, अथ प्रणतस्य रुद्रस्य प्रार्थनया त्रिचतुरबाहुमात्रावशेषमविनष्टप्राणं च तं विधाय विजयश्रिया व्यराजतेति ॥ (७)

नेय्यिडै नल्लदोर् शोरुम् नियदमुमत्ताणिच्चेवहमुम्
कैयडैक्कायुम् कऴुत्तुक्कुप्पूणोडु कादुक्कुक्कुण्डलमुम्
मेय्यिडनल्लदोर् शान्दमुम् तन्दु एन्नैवेळ्ळुयिराक्कवल्ल
पैयुडै नाहप्पहैक्कोडियानुक्कु प्पल्लाण्डु कूरुवने ॥ ८ ॥

நெய்யிடைநல்லதோர்சோறும் நியதமுமத்தாணிச்சேவகமும் *
கையடைக்காயும்கழுத்துக்குப்பூணொடு காதுக்குக்குண்டலமும் *
மெய்யிடநல்லதோர்சாந்தமுந்தந்து என்னைவெள்ளுயிராக்கவல்ல *
பையுடைநாகப்பகைக்கொடியானுக்குப் பல்லாண்டுகூறுவனே. (8)

[छाया] स्वाद्वन्नं घृतमेदुरं च नियतं कैङ्कर्यनिष्ठां तथा
ताम्बूलक्रमुकाभिवृद्धिमथ मे ग्रैवेयकं कुण्डलम् ।
पाटीरं रुचिरं प्रदाय कृपया शुद्धात्मकं मामिह
क्षिप्रं क्लृप्तवतश्शुभानि कथये सर्पारिकेतोर्हरेः ॥ ८ ॥

आज्यसमप्रमाणं परमभोग्यं विलक्षणमन्नं निरन्तरसेवावृत्तिं ताम्बूलसंपदं ग्रैवेयकमकरकुण्डलादिभूषणसंपत्तिं गात्रालङ्कारार्हमतिमात्रश्लाघ्यं चन्दनं च मदपेक्षानुगुणतया मह्यं प्रदाय, नित्यसंसारिणं दुर्गतं मां शुद्धसात्त्विकं कृतवते फणिराजतल्पाय फणिवैरिकेतवे भगवते मङ्गलान्याशासे । इति गाथार्थः ।

(वि.) अधस्तात्पञ्चम्यां गाथायामैश्वर्यार्थिनः खल्वाहूताः । ते भगवत्सकाशे कांश्चन संपद्विशेषान् लब्ध्वाऽथ शिक्षितमनसो भगवन्मङ्गलाशासनैकप्रवणास्समागता भवन्तीति निबध्यते गाथयाऽनया ।

लोके पुंसामपेक्षिताः पदार्थास्त्रिविधाः धारक - पोषक - भोग्यनाम्ना । अन्नं धारकम् । दधिघृतदुग्धादिकं पोषकम् । चन्दनपुष्पताम्बूलादिकं भोग्यम् । एवंविधाः पदार्था यदि केनचित्पुंसा लभ्यन्ते तर्हि तेन परमतृप्तेन भवितव्यम् । अपरिमिताण्डाधिपत्यकांक्षणं तु वृथा प्रयासमात्रम् । भगवद्विभूतेः स्वकीयत्वापादनपातकं च ततः । तथा च स्वरूपज्ञानविरहेण यद्यप्यस्माभिरण्डाधिपत्यमभिकाङ्क्षितं भगवत्सकाशे, तथाऽपि स परमः पुमान् स्वकीय-परमकारुणिकत्वभूम्ना अस्मत्समुज्जीवनैकसंभृतोत्कण्ठस्सन् औचित्यानुसारेणास्माकं यावदपेक्षितं तावदेव धारकपोषक-भोग्यवस्तुजातं वितीर्य 'इतःपरमपि वा भूयासुरमी सद्बुद्धिशालिन' इति मधुरललितकटाक्षवीक्षापातमस्मास्वा-रचय्य, 'ऐश्वर्यं त्याज्यम्, भगवत्कैङ्कर्यमेव परमः पुरुषार्थः' इति द्रढीयांसमध्यवसायमुत्पाद्य शुद्धस्वरूपानस्मा-नकार्षीत्, तादृशाय भगवते मङ्गलान्याशास्महे वयम्—इति ऐश्वर्यार्थिनः कथयन्तीति तेषां वाचा निबध्यतेस्म गाथैषा ।

ओदनदानं ताम्बूलदानं भूषणचन्दनदानं च भगवता कृतमिति तावदत्राभिधीयते । ओदनस्य धारकत्वात्, ताम्बूलस्य पोषकत्वात् भूषणचन्दनादेर्भोग्यत्वाच्च धारकपोषकभोग्यवस्तुप्रदानमुक्तं भवति । ननु मध्ये "अत्ताणि-च्चेवकमुम्" इति कैङ्कर्यनिष्ठाप्रदानमपि यदुक्तमिह तत्कथं घटते ? ऐश्वर्यार्थिनः खलु गाथा सेयम्; स तु धारकपोषकभोग्यवस्तुमात्रापेक्षी खलु; कैङ्कर्यापेक्षाविरहितोऽयं कथमेवं कथयतीति चेत्; सत्यम्, अनन्यप्रयोजना-धिकारिण एव कैङ्कर्यकामना स्यात्; प्रयोजनान्तरपरस्यैश्वर्यार्थिनः कैङ्कर्यकामना नासीदेव; तथाऽपि भगवत्कृपया शिक्षितमनस्कस्य अनन्यप्रयोजनाधिकारित्वेनाधुना समागतस्य च पुंसः किल गाथा सेयम्; अस्यामेवं कथनमुप-पद्यते । "मदपेक्षितं जीवनमेव केवलं न प्रददौ भगवान्; अपि तु मदनपेक्षितां कैङ्कर्यनिष्ठामपि प्रदाय मामुज्जीवयामास हन्त।" इति हि सानन्दमभिधीयते । (८)

उडुत्तुक्कळैन्द निन् पीदकवाडै युडुत्तु क्कळत्तदुण्डु ❀
तोडुत्ततुळाय्मलर् शूडिक्कळैन्दन शूडुमित्तोण्डर्हळोम् ❀
विडुत्तदिशैक्करुमन्तिरुत्ति त्तिरुवोणत्तिरुविळविल् ❀
पडुत्तपैन्नाहणैप्पळ्ळिकोण्डानुक्कु प्पल्लाण्डु कूरुदुमे ॥ ९ ॥

உடுத்துக்களைந்தநின்பீதகவாடை உடுத்துக்கலத்ததுண்டு *
தொடுத்ததுழாய்மலர்சூடிக்களைந்தன சூடுமித்தொண்டர்களோம் *
விடுத்ததிசைக்கருமந்திருத்தித் திருவோணத்திருவிழவில் *
படுத்தபைந்நாகணைப்பள்ளிகொண்டானுக்குப் பல்லாண்டுகூறுதுமே. (9)

[छाया] धृत्वोत्सृष्टमनर्घपीतवसनं ते बिभ्रतश्च, त्वया
भुक्त्वोत्सृष्टमथोपभुज्य, तुलसीं शिष्टां दधाना वयम् ।

दामा दिक्षु यथानियोगमुचितं निर्वर्त्य कृत्यान्यथ
श्रोणायां फणितल्पगस्य भवतो भद्रावलीं ब्रूमहे ॥ ९ ॥

भो भगवन्! भवता परिहितमथ विसृष्टं च पीताम्बरं वयं परिदध्महे; त्वदीयभुक्तोज्झितशेषभोजिनश्च स्मः; त्वदवतंसितविसृष्ट तुलसी स्रग्धारणनिरताश्च वर्तामहे । यस्यां दिशि यत्कार्यं भवदर्थं कर्तव्यं स्यात्तदपि यथायथं निष्पाद्य, फणिपतिशयनीयशायिने भवते दिव्यश्रोणानक्षत्रे मङ्गलान्याशास्महे । इति गाथार्थः ॥

(वि.) तृतीयगाथायामाहूता अथ षष्ठगाथायां स्ववृत्तिप्रकाशनपूर्वकमागत्य सङ्गता अनन्यप्रयोजनाधिकारिणो भट्टनाथमुनीन्द्रसमेतास्सन्तो भगवन्मङ्गलाशासनमारचयन्तीति अनया प्रक्रियया निबध्यते गाथैषा ।

भगवन्, वयं स्वार्थम् अन्नवस्त्रपुष्पादिकं क्रीत्वा नानुभवामः । किन्तु भवदुपभुक्तशिष्टमेव सर्वं तदिदं स्वीकुर्मः । न केवलमेतावदेव । अन्यच्च शृणु; * कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत् । पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति * इत्युक्तरीत्या मारुतिनिर्विशेषं दिक्षु सर्वासु संपाद्यानि च कार्याणि भवदर्थं सुष्ठु संपादयेम । नैतावताऽपि तृप्यामः; भोगिभोगशयनीयशायिनो भवतो निस्समाभ्यधिकसौन्दर्यविभवेन क्रीता वयं तादृशसौन्दर्यभूम्ने नित्यश्रियं नित्यमङ्गलमाशास्महे च ॥ (९)

एन्नाळेम्बेरुमान् उन्तनक्कडियोमेन्ट्रेळुत्तुप्पट्ट
वन्नाळे ❀ अडियोङ्गळडिक्कुडिल् वीडुपेट्रुय्न्ददुकाण् *
शेन्नाळ्तोट्रि त्तिरुमदुरैयुळ् शिलैकुनित्तु * ऐन्दलैय
पैन्नाहत्तलैप्पाय्न्दवने उन्नैप्पल्लाण्डु कूरुदुमे ॥ १० ॥

எந்நாளெம்பெருமான் உன்தனக்கடியோமென்றெழுத்துப்பட்ட
அந்நாளே * அடியோங்களடிக்குடில் வீடுபெற்றுய்ந்ததுகாண் *
செந்நாள்தோற்றித்திருமதுரையுட் சிலைகுனித்து * ஐந்தலைய
பைந்நாகத்தலைப்பாய்ந்தவனே உன்னைப்பல்லாண்டுகூறுதுமே. (10)

[छाया] स्वामिन्नच्युत! किङ्करा वयमिति न्यस्ताक्षरा यत् क्षणे
जातास्स्मस्तव, सद्य एव समगात्संजीवनं सद्म नः ।
प्रादुर्भूय शुभे दिनेऽधिमधुरं निर्मूल्य चापाध्वरं
नृत्तं कालियमस्तके कृतवतस्ते ब्रूमहे मङ्गलम् ॥ १० ॥

अस्मत्स्वामिन्, वयं भवद्दासभूता इति यस्मिन् दिने निष्पन्नम् तस्मादेव दिनात्प्रभृति अस्मदनुबन्धि सर्वमपि वस्तुजातं दुरितबन्धविमुक्तिमवाप्य समुज्जीवति स्म । दिव्ये नक्षत्रे मुव्यवतीर्ण! मधुरापुर्यां (कंसस्यायुधशालां प्रविश्य तत्र पूजायां स्थितं तदीयं) चापं प्राप्तभङ्गं कृतवन् भगवन्! पञ्चशीर्षककालियनागमस्तके कलितताण्डव! भवन्मङ्गलाशासनैकनिरता वयम् । इति गाथार्थः ॥

(वि.) चतुर्थगाथायामाहूता अथ सप्तमगाथायामागत्य सङ्गताः कैवल्यार्थिनो भगवन्तं वीक्ष्य मङ्गलमाशासत इति निबध्यते गाथेयम् ॥

भगवन् ! वयमात्मानुभूतिरूपपुरुषार्थप्राप्तिसाधनतया भवद्भजने पुरा निरता अभूम । पुनरावृत्तिविरहितां कैवल्यमोक्षमवाप्य यथा वयं न नश्येम तथा सतीं मतिमुत्पादयितुमर्हं दिव्यकटाक्षं कृतवान् भवान् । अतश्च वयमधुना सुशिक्षिता भूत्वा भवन्मङ्गलाशासनप्रवणा अभूमेति सानन्दमभिदधति ते ।

अस्यां गाथायां प्रथमद्वितीयचरणयोरयं भावः ;— स्वापेक्षितकैवल्यप्राप्तिसाधनतया प्रणवानुसन्धानं यदाऽस्माभिः कृतम् , तदा तद्बलेनैव यादृच्छिकमुज्जीवनमस्माकं समघटत ; तच्चोज्जीवनं न केवलमात्ममात्रविश्रान्तम् , अपि तु संबन्धिसंबन्धिपर्यन्तमपि तत् प्रवहति स्मेति । वस्तुत एतादृशो हि भगवदनुग्रहभूमा ।

तृतीयचतुर्थचरणयोर्भगवतो नन्दनन्दनस्य दिव्यचरितद्वितयमनुसन्धीयते । मथुरायामवतीर्णो भगवान् वासुदेवः कंसभीत इव गोकुलं प्रविश्य तत्र निलीनोऽवतस्थे । तदात्वे नारदश्राविततद्वृत्तान्तः कंस एनं हन्तुमुच्चावचानुपायानकार्षीत् । * स दुर्दमानासुरसत्त्वभेदान् नेता समाहूय नृशंसचेताः । प्रस्थापयामास परैरधृष्यं नन्दास्पदं नाथविहारगुप्तम् ॥ * इति (यादवाभ्युदये) प्रोक्तरीत्या ये ये प्रस्थापिता असुरापशदास्ते ते सर्वेऽपि क्षणादेव भस्मसात्कृता अभूवन्नित्यवजगिवान् कंसः अथ तं नन्दनन्दनं धनुर्यागच्छलेन स्वकीयमावसथं प्रत्याकारयामास भक्ताक्रूरद्वारा । अथ गोकुलाद्बलरामेण सह मथुरामागतो नन्दसूनुस्तत्रायुधशालायां कंसधनुराराधनोत्सवः प्रचलतीत्यवगत्य सरभसं तत्र प्रविश्य साटोपं धनुस्तच्छिथिलयामासेति धनुर्भङ्गकथा वेदितव्या । कालियमर्दनं तु गोकुलवासकाले कलितं सुप्रसिद्धम् ॥ १० ॥

अल्वळक्कॊन्रुमिल्ला अणिकोट्टियर्कोन् ❀ अबिमानतुङ्गन्
शॆल्वनैप्पोल तिरुमाले नानुमुनक्कुप्पळवडियेन् ❀
नल्वहैयाल् नमोनारायणावॆन्रु नामम्पल परवि ❀
पल्वहैयालुम् पवित्तिरने उन्नैप्पल्लाण्डु कूरुवने ॥ ११ ॥

அல்வழக்கொன்றுமில்லா அணிகோட்டியர்கோன் * அபிமானதுங்கன்
செல்வனைப்போலத் திருமாலே நானுமுனக்குப்பழவடியேன் *
நல்வகையால்நமோநாராயணா வென்று நாமம்பலபரவி *
பல்வகையாலும்பவித்திரனே! உன்னைப்பல்லாண்டு கூறுவனே. (கக)

[छाया] दुर्नीतेरतिदूरगस्स हि यथा गोष्ठीशसंपत्प्रभुः
तद्वन्माधव ! सोऽहमप्यतिचिरादेवास्मि ते किङ्करः ।
श्रीनारायण ! ते नमोऽस्त्विवति गृणन् भूयांसि नामानि ते
क्रन्दन् सम्यगहो पवित्र ! भगवन् शंसामि ते मङ्गलम् ॥ ११ ॥

श्रियःपते ! अनीतिगन्धविरहितो गोष्ठीपुरनिवासरसिकसाधुजनाग्रगण्यः श्रीवैष्णवाभिमानतुङ्गः "शेल्व-नम्बि" नामा महानुभावो यथा तथैवाहमपि तव चिरन्तनो दासोऽभूवम् । सर्वथाऽपि परमपावन भगवन् ! उज्जीवनोपयोगितया श्रीमदष्टाक्षरमहामन्त्रानुसन्धानमारचय्य भवदीयानि बहूनि दिव्यनामानि संकीर्त्य च भवते मङ्गलान्याशासे । इति गाथार्थः ॥

(वि.) अधस्तात्पञ्चमगाथायामाहूता अथाष्टमगाथायां स्वशिक्षितत्वप्रकाशनपूर्वकमागत्य संगताश्च ये ऐश्वर्यार्थिनस्ते भगवन्तमवेक्ष्य मङ्गलाशासनं कुर्वन्तीति निबध्यते गाथैषा ।

देहात्मभ्रमः, स्वतन्त्रात्मभ्रमः, अन्यशेषत्वभ्रमः, स्वरक्षणे स्वाभिमुख्यौचित्यभ्रमः बान्धवाभासलोलत्वम्, विषयचापलमित्यादिकमनीतिशब्दाभिलप्यम् । एवंविधास्वनीतिषु लवलेशोऽपि नासीत् पाण्ड्यमण्डलाधिपतिवल्लभदेवराजपुरोहिते 'शेल्वनम्बि' नाम्नि परमभागवते । स यथा भवद्दासाग्रणीरासीत्तथा वयमपीति विद्धीति कथयन्त्यैश्वर्यार्थिगणः । एतावता कालेन प्रयोजनान्तरपराः स्थिता एते इदानीमेव भगवत्प्रवणा भूत्वा चिरन्तनदासभूतं व्यक्तिविशेषं स्वनिदर्शनतया निर्देष्टुं कथमर्हन्तीति शङ्का जायेत । औपाधिकाहङ्कारममकारप्रणाशे सति सर्वेषामप्यात्मनां स्वतस्सिद्धमेव दास्यं स्वयंव्यक्तं भवतीति युज्यत एवं कथनम् । चिरात्पङ्कदिग्धं रत्नं यदि प्रक्षालितपङ्कं भवति, तर्हि तस्मिन् न खलु नवीना काऽपि प्रभा जायते ; प्रमुषितायाः स्थितायाः पुरातनप्रभाया एव हि समुन्मेषः । तथैवात्रापीति ध्येयम् ।

शेल्वनम्बिनाम्नो महानुभावस्य पुरोधसस्समुद्बोधनबलादेव पाण्ड्यराजस्य परतत्त्वनिर्णयार्थप्रवृत्तिर्जाता, तत एव च भट्टनाथमुनीन्द्रस्यास्य भगवत्कटाक्षविशेषभाजनभावस्संजात इति स्मर्तव्यमिह । (मुनीन्द्रस्यास्य चरिते विशदमिदम् ।) **शेल्वनम्बि**--संपत्पूर्ण इत्यर्थः । श्रीवैष्णवाभिमानतुङ्ग इति तद्विशेषणं तदसाधारणवैभवव्यञ्जकम् । भगवद्भागवताराधनैकवैयग्रीविवश इति भावः ।

तृतीयचरणे "उज्जीवनोपयोगितया श्रीमदष्टाक्षरमहामन्त्रानुसन्धानमारचय्य" इति कथनेन, पूर्वकाले जीवनोपयोगितया केवलं भगवन्नामाद्यनुसन्धानं कृतम्, इदानीं तु न तथा इति व्यञ्जितं भवति । स्वकीयहृदयगतामशुद्धिं विनिवार्य परमशुद्धिं समुदपादयद्भगवानिति कृतज्ञतानुसंधानेन "सर्वथाऽपि परमपावन!" इति संबोध्यते ॥ ११ ॥

पल्लाण्डेन्रु पवित्तिरनैप्परमेट्टियै ❀ शार्ङ्गमेन्नुम्
विल्लाण्डान्तन्नै विल्लिपुत्तूर्विट्टुशित्तन् विरुम्बियशोल् ❀
नल्लाण्डेन्रु नविन्रुरैप्पार् नमोनारायणायवेन्रु, ❀
पल्लाण्डुम् परमात्मनै शूऴ्न्दिरुन्देत्तुवर् पल्लाण्डे ॥ १२ ॥

*பல்லாண்டென்றுபவித்திரனைப் பரமேட்டியை * சார்ங்கமென்னும்*
*வில்லாண்டான் தன்னை வில்லிபுத்தூர் விட்டுசித்தன் விரும்பியசொல் **
*நல்லாண்டென்று நவின்றுரைப்பார் நமோநாராயணாயவென்று **
பல்லாண்டும்பரமாத்மனைச் சூழ்ந்திருந்தேத்துவர் பல்லாண்டே.

[छाया] भद्राशासनवाग्भरेण परमस्थानेश्वरं पावनं
शार्ङ्गेशं प्रति धन्विनव्यनगरश्रीविष्णुचित्तोदितम्।
सत्कालोऽयमिति प्रफुल्लमनसश्शंसन्ति ये ते हरिं
श्रीनारायणमन्त्रतः परिगता नित्यं स्तुयुर्मङ्गलैः॥ १२॥

पवित्रं परमपदनिलयं शार्ङ्गाख्यधनुर्भरणदक्षिणं च भगवन्तमुद्दिश्य श्रीधन्विनव्यपुरावतीर्णविष्णुचित्तसूरिणा विज्ञापितमिमं प्रेममयं मङ्गलाशासनप्रबन्धं 'समीचीनः कालोऽस्माकं संघटित' इति हर्षप्रकर्षेण ये संकीर्तयन्ति, ते परमात्मानं श्रीमन्नारायणं * नमः पुरस्तादथ पृष्ठतस्ते * इत्यनेन क्रमेण सेवमानाः श्रीमदष्टाक्षरमहामन्त्रानुसन्धानपूर्वकं सततं मङ्गलाशासनपरा भवेयुः। इति गाथार्थः॥

(वि.) फलश्रुतिगाथा सेयम्। अधस्तात्तृतीयगाथायाम् "अन्नार्थिनो युष्मान् नास्मदीयगोष्ठीप्रविष्टान् सहेमहि" इति कथितवताऽनेन सूरिवरेण 'हन्त! केचिन्निराकृता' इति मनसि तापमासेदुषा तादृशानामप्यधिकारिणां यया कयाचन विधया समुज्जीवनं चिकीर्षता सोऽयं दिव्यप्रबन्धः प्रणीत इव। तिरस्कृतपूर्वास्तेऽपि काममेतद्दिव्यप्रबन्धानुसन्धानेन सफलजन्मानः समुत्तीर्णसंसारसागरा भूयासुरिति मुनिवरोऽयमभिसंधत्ते॥

श्रीभट्टनाथयोगीन्द्रचरणावेव शरणम्॥ श्रीरामानुजश्रीमद्वरवरमुनीन्द्राभ्यां नमो नमः॥

इति श्रीकाञ्चीप्रतिवादिभयङ्कर अण्णङ्गराचार्यविलिखितं मङ्गलाशासनदिव्यप्रबन्धविवरणं समाप्तम्॥

॥ श्रीवैष्णवसंप्रदायपुस्तकसूची ॥

१. श्रीमद्वेदान्तदेशिकग्रन्थमाला समग्रा (तस्याः प्रत्येकविभागाः ।)	....	३०	०	०
२. हयग्रीवस्तोत्रादिपादुकासहस्रान्तसकलस्तोत्रजालम्	....	२	८	०
३. अधिकरणसारावळी, शतदूषणी च ।	....	४	०	०
४. मीमांसापादुका, सेश्वरमीमांसा, न्यायपरिशुद्धिः, न्यायसिद्धाञ्जनं च ।	....	४	०	०
५. सर्वार्थसिद्धिसमेतः—तत्त्वमुक्ताकलापः ।	....	५	०	०
६. हंससंदेशः, सुभाषितनीवी, यादवाभ्युदयः, संकल्पसूर्योदयश्च ।	....	३	८	०
७. ईशावास्योपनिषद्भाष्यम्, चतुःश्लोकीभाष्यम्, स्तोत्रभाष्यम्, गद्यभाष्यं च ।	....	२	८	०
८. गीतार्थसंग्रहरक्षा, गीताभाष्यतात्पर्यचन्द्रिका च ।	....	६	०	०
९. तत्त्वटीका, निक्षेपरक्षा, सच्चरित्ररक्षा, पाञ्चरात्ररक्षा—इत्यादि ।	....	४	०	०
१०. सिद्धित्रयम्—भगवद्यामुनमुनीन्द्रप्रणीतम् ।	....	०	८	०
११. पूर्वाचार्यप्रणीत सकलस्तोत्रमालाः ।	....	२	०	०
१२. यतीन्द्रमतदीपिका	....	१	०	०

नवीनग्रन्थाः—प्र—अण्णङ्गराचार्यकृतयः ।

अद्भुतवार्ताप्रकाशः ।
क्षेत्रतीर्थयात्रादर्शः ।
मदिरेक्षणार्थतत्त्वम् ।
रक्षाविलोचनभावप्रकाशिका ।
तर्कशास्त्रसर्वस्वम् ।
ब्रह्मव्याप्तिपरिष्क्रिया ।

लक्ष्मीतत्त्वविनिर्णयः ।
इतिहासरत्नाकरः मदिरेक्षणार्थमाधुर्यमित्यादि ।
रहस्यरत्नमालिका ।
अद्यमेपद्यार्थशतदूषणी । भा. १.
श्रीरामायणदण्डकम्, नन्दनन्दनवैभवचूर्णिका ।
श्रीशैलेशाष्टकव्याख्यानम् ।

☞ इत्येते ग्रन्थाः प्रत्येकं कलाचतुष्टयमूल्यकाः ।

प्राप्तिस्थानम्—

P. B. ANNANGARACHARYAR,
Granthamala Office,
CONJEEVERAM.

॥ श्रीरस्तु ॥

श्रीपराङ्कुशपरकालयतिवरवरवरमुनिभ्यो नमः ।

श्रीवैष्णवसंप्रदायधुरन्धर-श्रीपराङ्कुशपरकालादिदिव्यसूरिप्रणीत-द्राविडवेद-

चतुस्सहस्राख्यदिव्यप्रबन्धसारसंग्रहश्लोकमालिकायां

श्रीकाञ्ची-प्रतिवादिभयङ्कर-अण्णङ्गराचार्य विरचितायां

स्वेनैव विरचितेन विवरणेन समेतायां

* ॥ प्रथमसहस्रतात्पर्यरत्नमाला ॥ *

तत्र च

श्रीभट्टनाथदिव्यसूरिप्रणीत मङ्गलाशासनप्रबन्धमुखसूक्तप्रबन्धसारसर्वस्वमिदम्

[तिरुप्पल्लाण्डु-पेरियाळ्वार्तिरुमोळितात्पर्यसारः]

श्रीवृन्दावनधामवास्तव्य-श्रीहरिदेवजीमन्दिराधीश-वेदान्तशिरोमणि-रामानुजाचार्याणां

तच्चरणाश्रित-सुदर्शनबाईनाम्न्याश्च द्रव्यसाहाय्येन

श्रीकाञ्चीग्रन्थमालाप्रकाशनपरिषदा संमुद्र्य

प्राकाश्यत सर्वजिन्नामसंवत्सरे ।

१९४७

॥ श्रीः ॥

दिव्यप्रबन्धानुसन्धानोपक्रमे अनुसन्धेयानि सर्वप्रबन्धसाधारणानि पञ्च पद्यानि ॥

(श्रीरङ्गनाथभगवत्प्रकाशितं श्रीवरवरमुनीन्द्रविषयकं स्तुतिपद्यम् ।)

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् । यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥

(श्रीकूरेशमिश्रप्रणीतं पूर्वाचार्यपरम्पराविषयकं स्तुतिपद्यम् ।)

लक्ष्मीनाथसमारम्भां नाथ यामुनमध्यमाम् । अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

(श्रीकूरेशमिश्रैरेव प्रणीतं भगवद्रामानुजस्तुतिपद्यम् ।)

यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः रामानुजस्य चरणौ शरणं प्रपद्ये ॥

(भगवद्यामुनमुनिप्रणीतं श्रीशठकोपमुनीन्द्रस्तुतिपद्यम् ।)

माता पिता युवतयस्तनया विभूतिस्सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥

(श्रीपराशरभट्टार्यप्रणीतं सकलदिव्यसूरिविषयकस्तुतिपद्यम् ।)

भूतं सरश्च महदाह्वयभट्टनाथश्रीभक्तिसारकुलशेखरयोगिवाहान् ।
भक्ताङ्घ्रिरेणुपरकालयतीन्द्रमिश्रान् श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम् ॥

श्रीविष्णुचित्तापरनामधेय-श्रीभट्टनाथसूरिवरदिव्यप्रबन्धानुसन्धानोपक्रमे
अनुसन्धेयं स्तुतिपद्यम् ।

गुरुमुखमनधीत्य प्राह वेदानशेषान् नरपतिपरिक्लृप्तं शुल्कमादातुकामः ।
श्वशुरममरवन्द्यं रङ्गनाथस्य साक्षात् द्विजकुलतिलकं तं विष्णुचित्तं नमामि ॥

(तादृशं द्राविडगाथाद्वयम् ।)

मिन्नार्तडमदिळ्शूळ् विल्लिपुत्तूरेन्रोरुकाल् शोन्नार्कळ्क्कमलम् शूडिनोम् — मुन्नाळ्
किळियरुत्तानेन्रुरैत्तोम् कीळ्मैयिनिच्चेरुम् वळियरुत्तोम् नेञ्जमे वन्दु ॥

पाण्डियन् कोण्डाड पट्टर्पिरान् वन्दानेन्रु ईण्डिय शङ्गमेडुत्तूद — वेण्डिय
वेदङ्गळोदि विरैन्दु किळियरुत्तान् पादङ्गळ् यामुडैय पत्तु ॥

इति पूर्वाङ्गस्तुतिपद्यमालिका समाप्ता ॥

श्रीः ॥

॥ श्रीशठकोप रामानुज वरवरमुनीन्द्रेभ्यो नमः ॥

श्रीपराङ्कुशपरकालादिदिव्यसूरिवरानुगृहीतद्राविडवेददिव्यप्रबन्ध-
तात्पर्यसारानुवादश्लोकमालिका प्रारभ्यते ॥

॥ प्रस्तावना ॥

लक्ष्मीनाथारम्भां शठरिपुयतिराजमध्यमामनघाम् ।
श्रीमद्वरवरमुनिराट्पर्यन्तां नौमि पूर्वगुरुपङ्क्तिम् ॥

श्रीकाञ्चीपरवादिभीकरगुरुश्रीवंशलब्धोदयो वेदान्तद्वयसिन्धुमग्नधिषणो नानाकलाकोविदः ।
श्रीमद्द्राविडवेदसूक्तिनिवहान् गीर्वाणवाणीमयैः पद्यैर्द्व्यतमैरनूद्य विबुधानानन्दयिष्यत्यहो ॥

श्रीवैष्णवसम्प्रदाये आळ्वारपदवाच्या दिव्यसूरयो दश । ते च—१. सरोयोगी, २. भूतयोगी, ३. महदाह्वययोगी, ४. भक्तिसारयोगी, ५. श्रीशठकोपमुनीन्द्रः, ६. कुलशेखरसूरिः, ७. भट्टनाथमुनिः; ८. भक्ताङ्घ्रिरेणुसूरिः, ९. मुनिवाहन (श्रीपाण)सूरिः, १०. परकालमहायोगीति संशब्द्यन्ते । श्रीशठकोप-मुनीन्द्रस्सर्वेषामेतेषामवयविभूतः, अन्ये पुनरेतस्यावयवभूता इति पूर्वाचार्यनिर्णयः । सर्वेऽप्येते दिव्यसूरिप्रवरा भक्तिबलात्कारेण भगवद्विषयकान् दिव्यप्रबन्धाननुगृहीतवन्तः । ते च द्राविडभाषामयाः । द्राविडवेदः, द्राविडाम्नायः, द्राविडोपनिषत्, द्राविडब्रह्मसंहिता इत्यादिनामविशेषैर्व्यपदिश्यन्त एते दिव्यप्रबन्धाः ॥

श्रीशठकोपमुनीन्द्राणामन्तेवासी मधुरकविसमाख्यो ब्राह्मणाग्रणीरासीत् । सोऽपि दिव्यसूरिगोष्ठी-परिगणितोऽभूत् । श्रीशठकोपमुनीन्द्रैकदैवतस्स भगवद्विषयिणीं गाथामेकामपि न निरमिमीत । अपि तु स्वाचार्यभूतशठकोपमुनीन्द्रविषयकमेव कमपि लघुतमं गुणैर्गुरुतमं दिव्यप्रबन्धमरचत् । सोऽपि द्राविडवेद-सङ्केतभाजनतां निन्ये पूर्वाचार्यैः ॥

सप्तमस्य श्रीभट्टनाथमुनेः श्रीमती गोदानाम्नी दुहिताऽऽसीत् । इयमयोनिजा मैथिलीव । भट्टनाथमुने-स्तुलसीकानने समुद्भूता तेन च पुत्रीत्वेन स्वीकृताऽभूत् जनकचक्रवर्तिना सीतेव । अस्याः प्रभावविशेषाः श्रीमद्वेङ्कटनाथगुरुवरप्रणीतगोदास्तुतिसुगमाः । तत्रेदमादिमं श्लोकरत्नम्— ❋ श्रीविष्णुचित्तकुलनन्दनकल्पवल्लीं श्रीरङ्गराजहरिचन्दनयोगदृश्याम् । साक्षात् क्षमां करुणया कमलामिवान्यां गोदामनन्यशरणः शरणं प्रपद्ये ॥❋ इति । भगवद्दिव्यमहिषीष्वन्यतमा सेयं गोदादेव्यपि स्वकान्तविषयकं परमभोग्यं परमविलक्षणं दिव्यप्रबन्ध-द्वितयं प्रणिनाय; तदपि द्राविडवेदमध्यपरिगणितं विभ्राजते । एवं च निर्दिष्टैर्द्वादशभिर्व्यक्तिविशेषैः प्रकाशितानां परमपावनीनां दिव्यसूक्तीनां द्राविडाम्नायव्यपदेशः सुप्रथितः ॥

संस्कृतभाषायां दिव्यमिति किमपि पदम् उत्तमोत्तमार्थकमुल्लसति । भगवद्गीतायां * जन्म कर्म च मे दिव्यम् * दिव्यं ददामि ते चक्षुः * इत्यादिस्थलेषूपात्तमिदं दिव्यपदं श्रीवैष्णवसम्प्रदाये प्रमाणप्रमेयप्रमातृषु प्रयुक्तं सत् परमविलक्षणं सौरभं धत्ते । तथा हि । प्रमाणेषु मूर्धन्यो द्राविडवेद एवेति तं दिव्यप्रबन्धनाम्ना व्यपदिदिशुः । प्रमेयमूर्धन्यता अर्चावतारस्थलविशेषाणामेवेति तान् दिव्यदेशनाम्ना प्रथयामासुः । प्रमातृमूर्धन्यता श्रीपरांकुशपरकालप्रमुखसूरिवराणामेवेति तान् दिव्यसूरिपदेनाभिलपन्तिस्म । अहो ! दिव्यतमेयं खलु व्यवस्था ॥

दिव्यसूरीणामेतेषामवतारक्रमः (पौर्वापर्य) प्रथमत एव निरदेशि । एवं स्थिते * भूतं सरश्च महदाह्वयभट्टनाथ श्रीभक्तिसारकुलशेखरयोगिवाहान् । भक्ताङ्घ्रिरेणुपरकालयतीन्द्रमिश्रान् श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम् ॥ * इत्यस्मिन् श्रीपराशरभट्टार्यप्रणीते पद्ये क्रमविपर्यासेन नामविन्यासः कुतः कृत इति केचिद्विशङ्कन्ते । अत्र केचिदाहुः—आनुपूर्व्या नामानि विन्यस्य श्लोकं कवयितुमसौकर्येण यथायोगमेवं कवयितव्यमासीदिति । तदिदं न चारुतरम् । अल्पज्ञा वयपि खलु आनुपूर्वीविपर्ययमन्तरेण यथायथं कवयितुं प्रभवामः । तथा हि — "कासारभूतमहदाह्वयभक्तिसारान् श्रीमच्छठारिकुलशेखरभट्टनाथान् । भक्तांघ्रिरेणुमुनिवाहनकार्तिकेयान् रामानुजं च यमिनं प्रणतोऽस्मि नित्यम् ॥" इति कवनमनायाससाध्यं खलु । आनुपूर्वी चात्र न विपर्येति । सति चैवं कथमानुपूर्वीविपर्यासं सोढ्वा * भूतं सरश्चेत्यादिरयं श्लोक आचार्यप्रवरैर्निरमीयतेति प्रश्नः समावेयो भवति । अत्रैवं समादधते प्राज्ञाः—* भूतं शिरो ह्रदमहाह्वयमक्षियुग्मं भट्टार्यमास्यमथ भार्गवमस्य कण्ठम् । बाहू वदन्ति कुलशेखरयोगिवाहौ दोर्मध्यनाभिचरणानितरान् शठारेः ॥ * इत्ययं पुरातनः कोऽपि श्लोकः प्रथते । प्रधानावयविभूतस्य श्रीशठकोपमुनीन्द्रस्य अवयवभूता अन्ये दिव्यसूरयः क्रमेणास्मिन्पद्ये परिकीर्तितास्सन्ति । अमुमेव क्रममवलम्ब्य श्रीपराशरभट्टार्यैः * भूतं सरश्चेत्यादि पद्यरत्नं प्रणिन्ये । अवयविनः श्रीशठकोपमुनीन्द्रस्य भूतयोगी शिरस्स्थानीयः । सरोयोगी महदाह्वययोगी च नेत्रस्थानीयौ । भट्टनाथसूरिः मुखस्थानीयः । भार्गवो भक्तिसारमुनिः कण्ठस्थानीयः । कुलशेखरमुनिवाहनसूरी बाहुद्वंद्वस्थानीयौ । भक्ताङ्घ्रिरेणुमुनिः वक्षःस्थलस्थानीयः । परकालसूरिर्नाभिस्थानीयः । श्रीरामानुजो यतिराजः पादस्थानीयः । एवमवयवभूतान् क्रमेण कथयित्वा अथ अवयविनः श्रीपरांकुशमुनेः कथनं न्याय्यमिति युक्तोऽयं सुशोभनः पन्था आश्रित आचार्यवरैः ॥

अवतारक्रमे प्राथम्यमनुद्वहतः शठकोपमुनेर्ननु कथमवयवित्वं प्रोच्यते ? इति चेत् ; तत्तु भगवत्सङ्कल्पाधीनतत्प्रभावातिशयनिबन्धनमिति सम्प्रति संक्षेपः । एतैः सर्वैरपि दिव्यसूरिवरैः प्रणीतास्सर्वेऽपि दिव्यप्रबन्धाः कदाचिद्विलुप्तप्रचारा अभूवन् । आचार्यपरम्परायामादिमः श्रीमन्नाथमुनिसमाख्यो गुरुवरस्तेषां दिव्यप्रबन्धानां पुनरुद्धारं चिकीर्षुस्सन् महतां नियोगेन श्रीशठकोपमुनीन्द्रदिव्यावतारस्थलीं श्रीकुरुकापुरीमुपेत्य तत्र दिव्यतिंत्रिणीतरुमूले निषद्य, श्रीशठकोपमुनीन्द्रविषयकं श्रीमधुरकविसूरिप्रणीतं लघुतरं प्रबन्धं द्वादशसहस्रकृत्वः सनियमं जपित्वा अथ योगदशायां दत्तसाक्षात्कारात् श्रीशठकोपमुनीन्द्रात् चतुस्सहस्रसंख्याकगाथात्मकं द्राविडाम्नायं लेभे (श्रीमन्नाथमुनिः) इति संप्रदायः । अनेनापि हेतुना श्रीशठकोपमुनेः प्राधान्यमवसेयम् । अत्र चायमनुसन्धेयः श्लोकः—* पत्युः श्रियः प्रसादेन प्राप्तसार्वज्ञ्यसम्पदम् । प्रपन्नजनकूटस्थं प्रपद्ये श्रीपरांकुशम् ॥ * इति ।

शठकोपमुनेरेव नामान्तरं श्रीपरांकुश इति । वकुलाभरणमुनिरित्यन्यस्य व्यपदेशः प्रथितः ॥

एतादृशमहिमशालिनि सत्यपि श्रीशठकोपमुनौ, दिव्यप्रबन्धपरिगणनायां प्राथम्यं तु श्रीभट्टनाथ (विष्णुचित्त) समाख्यदिव्यसूरिप्रणीतस्य तिरुप्पल्लाण्डुनाम्नो दिव्यप्रबन्धविशेषस्यैव समभूत् ॥

स एव द्राविडाम्नायरूपसकलदिव्यप्रबन्धेष्वपि प्राथमिकं स्थानं प्राप्नोति । संस्कृतवेदोपक्रमे यथा नियतं प्रणवानुसन्धानं तथा द्राविडवेदोपक्रमे एतस्य दिव्यप्रबन्धस्य पारायणं नियतमिति सम्प्रदायः । मङ्गलाशासनात्मकत्वादेतस्य प्रबन्धस्य ॥

'पल्लाण्डु' इति मङ्गलाशासनपर्यायः । (तिरु) इति श्रीशब्दपर्यायः । तथा च (तिरुप्पल्लाण्डु) इत्यस्य श्रीमङ्गलाशासनप्रबन्ध इत्यर्थस्सिद्धः । श्रीभागवतम्, श्रीभाष्यमित्यादाविव श्रीशब्दोऽत्र माङ्गलिकः, न तु लक्ष्मीवाचकः । शरदश्शतं विजयीभवेति भगवन्तमुद्दिश्य यन्मङ्गलाशासनं कृतं भट्टनाथमुनिवरेण, तत्प्रतिपादको दिव्यप्रबन्ध इति फलितम् । किमर्थं कदा वा मङ्गलाशासनं कृतमित्येतत्तु मुनिवरस्यास्य वैभवे विशदम्; तत्ततो वेदितव्यम् ॥

अवाप्तसमस्तकामत्वेन सर्वरक्षकत्वेन च प्रसिद्धस्य भगवतस्सकाशात् स्वस्य मङ्गलप्रार्थनं खलु युक्तम्; तादृशीं पद्धतिं विहाय, मङ्गलनिर्वेरेव भगवतो मङ्गलाशासनं कथं कृतमिति केचिदाशङ्केरन् । अत्रैवं समादधते पूर्वाचार्याः । भक्तानां सज्जनानां ज्ञानदशा प्रेमदशेति दशाद्वितयं वर्तते । ज्ञानदशायां रक्ष्यरक्षकभावः व्यवस्थितोऽवतिष्ठते । 'सर्वरक्षको भगवान्; वयं भगवता रक्ष्याः; तत्सकाशादस्माभिर्मङ्गलानि प्राप्तव्यानि' इत्यनुसन्धानं तन्मूलकप्रार्थनादिकं च ज्ञानदशायां प्रवर्तते । प्रेमदशायां तु विपर्यासेन भवति— रक्ष्यरक्षकभावानुसन्धानं विपर्यस्यति । सर्वेश्वरस्य ज्ञानशक्त्यादिगुणगणान् विस्मृत्य तदीयसौन्दर्यलावण्यसौकुमार्यादिकमसकृदनुसन्धाय द्रवीभवन्मनसां प्रेमपरवशानां भगवति रक्षकत्वाध्यवसायः प्रच्युतो भवति । भगवन्तं रक्षितुं प्रयतन्ते ते । अखिलहेयप्रत्यनीककल्याणैकतानेऽपि तस्मिन् भगवति कालदेशादिवैगुण्यवशात् हा हन्त किमप्यवद्यं सम्भवेत्किमु! इति शङ्कातङ्काङ्कुरो मनसि भवति प्रीतिरूपापन्नज्ञाननिधीनां महताम् । तयैवातिशङ्कया मङ्गलाशासनप्रवृत्तिरुन्मिषति ॥

दण्डकारण्ये श्रीरामचन्द्रं सेवितवतां महर्षीणां तस्मिन् परमपुरुषत्वप्रतिपत्तिरासीदेवानपाया । तथाऽपि ते प्रेमपारवश्यान्मङ्गलाशासने प्रावर्तन्तेति प्राह प्राचेतसः— " ते तं सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणः । मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः ॥ " इत्यनेन श्लोकरत्नेन ॥

आस्तां तावत्प्राकृतमण्डलवृत्तान्तः । अज्ञानान्यथाज्ञानाद्यवद्यगन्धमसहमानायां नित्यविभूत्यां प्रकृष्टविज्ञानबलैकधामशेषशेषाशनगरुडप्रमुखा नित्यसूरयोऽपि व्यामुग्धास्सन्तो भगवद्रक्षणदीक्षिता भवन्तीति प्रत्यग्दृशा पश्यन्तो विपश्चितो व्याहरन्ति । तथा च श्रीगुणरत्नकोशे भट्टपादाः— " स्नेहात् अस्थानरक्षाव्यसनिभिरभयं शार्ङ्गचक्रासिमुख्यैरित्यादिकमभिदधिरे । एवं च भगवतो मङ्गलाशासनं स्वरूपानुबन्धीति सिद्धम् ॥

एवंविधमङ्गलाशासनरुचिर्यद्यपि श्रीपरांकुशपरकालादीनामन्येषामपि दिव्यसूरीणामस्ति, तथाऽपि श्रीभट्टनाथसूरेरस्यैव सेयमतिशयिनीति सुगममैदम्पर्येण पृथक्प्रबन्धप्रणयनात् । महायोगीति संज्ञाऽप्यस्य एतन्निबन्धनैव हि ॥

अस्मिन् दिव्यप्रबन्धे द्वादश गाथास्सन्ति । आद्यगाथाद्वयेन सपरिवारस्य भगवतो मङ्गलान्याशास्ते स्वयं मुनिवरः । अथ तृतीयचतुर्थपञ्चमगाथाभिः क्रमेण भगवत्प्राप्तिकामुकान् कैवल्यार्थिन ऐश्वर्यार्थिनश्च भगवन्मङ्गलाशासनार्थमाह्वयति । आहूतानां तेषां त्रिविधानामधिकारिणां वाचा मङ्गलाशासनं निबध्नाति षष्ठ-सप्तमाष्टमगाथाभिः क्रमशः । तैस्संमिलितस्य स्वस्य वाचा मङ्गलाशासनं निबध्नाति नवमदशमैकादशगाथाभिः । अथ द्वादशी गाथा फलश्रुतिः— इति विवेकः ॥

अस्य श्रीमङ्गलाशासनप्रबन्धस्य सारांशः पद्यद्वयेन संगृह्यते ॥

तत्त्वं निर्णीय राज्ञस्सदसि करिवरे सन्निवेश्याथ राज्ञा
वीथीषु भ्राम्यमाणो वियति कमलया साकमीशं निशाम्य ।
तस्मै भद्राणि शंसन् तदनु बहुविधान् भक्तवर्गांश्च गोष्ठ्यां
स्वीयायां योजयंस्तैस्सह रचितनुतिर्विष्णुचित्तो जयी स्यात् ॥ १ ॥

लक्ष्मीनाथाङ्घ्रिपद्मप्रवणसुजनताः स्वात्मभोगाख्यमोक्षे
सक्तान् ऐश्वर्यलुब्धानपि च निजसमाजान्वयायाजुहाव ।
आहूतास्ते स्वसङ्गं सकुतुकमवदन् तैस्समेतोऽथ सूरिः
भद्राण्याशास्त चेति त्रिभिरपि विषयः पूरितोऽयं प्रबन्धः ॥ २ ॥

(तात्पर्यसंग्रहः) श्रीधन्विनव्यपुरेऽवतीर्य तत्र तुलसीकाननकैङ्कर्ये निरतो विष्णुचित्तसूरिर्भगवदाज्ञया पाण्ड्यराजविद्वत्परिषदि समेत्य परतत्त्वनिर्णयमकरोदिति प्रसिद्धमिदम् । अथायं सूरिवरस्तेन राज्ञा गजराजमूर्ध्नि प्रतिष्ठापितो वीथीभ्रमणमहोत्सवमनुभावितोऽभूत् । तदात्वे श्रीवैकुण्ठात्परमः पुमान् श्रिया सह समागत्य विहायसि दिव्यसेवामदात् । तं संसेव्य सूरिरसौ प्रेमभूमनिबन्धनया अस्थाने भयशङ्कया विह्वलस्सन् तस्मै भगवते सपरिकराय मङ्गलान्याशास्त । तदिदमाद्यगाथाद्वये निबद्धम् । * एकस्स्वादु न भुञ्जीतेति नयेन स्वयमेकाकी सन्ननुभवितुमक्षमोऽयम् अन्यैस्सहापि संयुज्यानुबुभूषुस्सन् मुमुक्षून् कैवल्यार्थिन ऐश्वर्यार्थिनश्च स्वगोष्ठ्यामाहूय संयोज्य तैस्समेतस्सन् भगवन्तं स्तुत्वा तृप्यतिस्म । लक्ष्मीनाथाङ्घ्रिपद्मप्रवणसुजनताः [मुमुक्षून्] तृतीयगाथया, स्वात्मभोगाख्यमोक्षे सक्तान्— कैवल्यार्थिजनान् चतुर्थगाथया, ऐश्वर्यलुब्धान्— भ्रष्टैश्वर्यकामान् अपूर्वैश्वर्यकामांश्च पञ्चमगाथया स्वीयगोष्ठ्यामन्वयार्थमाह्वयतिस्म । एवं तृतीयचतुर्थपञ्चमगाथात्रयेणाहूता इमे प्रत्येकमेकैकगाथया स्वसमागममसूचयन्निति तद्वाचा उपरि गाथात्रयं निबद्धम् । षष्ठसप्तमाष्टमगाथात्रयं तत् । अथ गाथात्रयं प्रत्येकं तैस्तैस्समेतस्य सूरेर्मङ्गलाशासनात्मकम् । एवं विषयत्रयेण भरितोऽयं दिव्यप्रबन्धः ॥

द्वादशगाथात्मकोऽयं प्रबन्धो द्वादशश्लोकात्मनाऽपि विवर्तितः संस्कृतविवरणेन हिन्दीटीकया च सह पृथगस्ति संमुद्रित इति वेदितव्यम् ॥

इति श्रीकाञ्ची-प्रतिवादिभयङ्कर अण्णङ्गराचार्यकृतिषु
मङ्गलाशासनदिव्यप्रबन्धसारः समाप्तः ॥

॥ श्रीरस्तु ॥
श्रीशठकोपयतिराजवरवरमुनिभ्यो नमः ।

श्रीकाञ्ची-प्रतिवादिभयङ्कर-अण्णङ्गराचार्यकृतिषु द्राविडाम्नायदिव्यप्रबन्धविवर्ते

* ॥ श्रीभट्टनाथमुखसूक्तसर्वस्वम् ॥ *

[पेरियाळ्वारतिरुमोऴि.]

பெரியாழ்வார் திருமொழியின் ஸாரஸங்கிரஹ ச்லோகமாலிகை.

प्रथमशतकम् ॥

१. — १. * वण्णमाडङ्गळ् * [வண்ணமாடங்கள்.]

(कृष्णावतारकालिकोपलालनविशेषवर्णनम् ।)

श्रीमन्नारायणे प्राक्परमकरुणया नन्दगोपस्य गेहं
संप्राप्ते कृष्णमूर्त्या निरवधिकमुदा तत्र गोपालवृन्दैः ।
सोत्साहैः कल्पितानां विविधबहुलनृत्तादिकोलाहलानां
व्याख्यानेनातिहृष्टो मुनिरधिवसताद्विष्णुचित्तो मनो मे ॥ १ ॥

* एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः । नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम् ॥ * इत्युक्तरीत्या श्रीमथुरायां वसुदेवदेवकीभ्यामधिष्ठिते कारागारेऽवतीर्याथ स्वकीयनिर्हेतुककृपया व्रजे नन्दगोपदिव्यभवनमधिजग्मिवान् श्रीमन्नारायणस्तत्र श्रीकृष्णमूर्त्या विरराज । तदात्वे तत्र वाचामगोचरोत्साहसंभृतैर्गोपालवृन्दैरनवधिकानन्दभरेण विविधबहुलनर्तनादिकाः कोलाहलाः कल्पिता अभूवन् । तेषामिह प्रथमदशके विपुलवर्णनेन हर्षप्रकर्षमेदुरान्तःकरणो विष्णुचित्तसूरिर्मम मानसमधिवसतु ॥

श्लोकोऽयं दशगाथार्थसारसंग्रहरूपः । एकैकगाथा एकैकपद्यात्मनाऽपि विवर्तिताऽस्ति । तानि पद्यानीह प्रथमदशके केवलम् आदर्शरूपेण प्रकाश्यन्ते । मध्ये मध्ये चैवं प्रकाशनं भविष्यति । ग्रन्थविस्तरभिया तावदेवम् ॥

१. (வண்ணமாடங்கள்) सद्वर्णाञ्चितसौधमण्डललसद्गोष्ठीपुराधीश्वरे
कृष्णस्वामिनि केशवे गुणगणैः पूर्णेऽवतीर्णे सति ।
तैलं चूर्णमथो मिथस्सकुतुकं व्याकीर्णमातन्वतां
चेष्टाभिर्बृहदङ्गणं तदभवज्जम्बालजालाकुलम् ॥ १ ॥

* वण्णमाडङ्गळ्शूळितिप्रथमगाथाविवर्तः । अर्थश्च— सद्वर्णशालिप्राकारमण्डलपरिवेष्टित-गोष्ठीपुरनामक [तिरुक्कोट्टियूरु] क्षेत्रनाथे भगवति श्रीकृष्णकिशोररूपेणावतीर्णे सति, तदवतारास्पदभूतं बृहद्गेहाङ्गणं पङ्किलमभूत् मिथस्तैलचूर्णयोर्विकिरणं कृतवतामानन्दिनां चेष्टितैरिति ॥ १ ॥

२. (ஓடுவார் விழுவார்) धावद्भिश्च पतद्भिरप्यथ मिथस्सानन्दसंश्लेषणं
कुर्वद्भिश्च गवेषयद्भिरधिपः कुत्रास्मदीयस्त्विति ।
पृच्छद्भिः कृतगीतिभिस्सपटहोद्घोषं च नृत्तं मुहुः
कुर्वद्भिश्च जनैर्मिलत्कलकला गोपालवाटी बभौ ॥ २ ॥

(ओडुवार्विळुवारु) कृष्णावतारश्रवणानन्दभूम्ना केचन धावन्ति; अन्ये पतन्ति; अपरे परस्परं सानन्दमाश्लिष्यन्ति । इतरे अस्मदधिपः कुत्रेति पृच्छन्ति चान्विष्यन्ति च । गायन्ति चान्ये । पटहघोषणया सह नृत्यन्ति चापरे । एवंविधाभिरपरिमितचेष्टाभिर्गोपालवाटिका कोलाहलभरिता बभौ ॥ २ ॥

३. (பேணிச்சீருடை.) संपत्संभृतनन्दनन्दनशिशुं जातं निगूढात्मकं
द्रष्टुं गोष्ठमुपागमन् सुबहवो दृष्ट्वा वहिर्निर्ययुः ।
पुंस्त्वं लोकविलक्षणं निरुपमं चास्येत्युपावर्णयन्
श्रोणर्क्षोदितविष्णुलोकमखिलं रक्षेदसावित्यपि ॥ ३ ॥

(पेणिच्चीरुडै) सर्वेश्वरत्वैकान्तिकं स्वस्वरूपं निगुह्यावतीर्णं गोपालकिशोरमवलोकयितुमागता बहवः; अवलोक्य वहिर्निष्क्रान्ता बहवः; सर्वलोकविसजातीयम् असमाभ्यधिकं चास्य पुंस्त्वमिति कथयन्तो बहवः; श्रोणानक्षत्रेऽवतीर्णस्य विष्णोः शेषभूतमशेषं जगत् असौ कुमार एकाकी संरक्षितुं प्रभविष्णुरिति मिथः कीर्तयन्तश्च बहवः । एवंविधजनताभिस्सान्द्रमासीन्नन्दगोपसदनम् ॥ ३ ॥

४. (உறியை முற்றத்து) शिक्यस्थनाखिलांश्च भाण्डनिवहानुल्लोल्य गेहांगणे
नृत्तं चक्रुरथो घृतं दधि पयो व्याकीर्णमातेनिरे ।
व्यावल्गत्कचबन्धनं विदधतस्साटोपनाटयोत्करं
प्रज्ञालोपमवापुरप्यहह ! ते गोपालवाटीजुषः ॥ ४ ॥

(उरियै मुत्तत्तु) कृष्णजननजनितसंतोषभूम्ना वल्लवास्सर्वे शिक्यस्थितानि दधिघृतनवनीतादिभरित-भाण्डवृन्दानि गेहाङ्गणे समुल्लोल्य विविधं नृत्यन्तः प्रज्ञालोपमप्यवापुरहह ॥ ४ ॥

५. (கொண்டதாளுறி.) जात्युचितशिक्यगणकुन्त-लगुडादीन् तालदलतल्पनिवहांश्च दधतस्ते ।
वल्लवजना विकचसत्कुटजदन्ताः संघश उपेत्य घृतनृत्तमथ चक्रुः ॥ ५ ॥

(कोण्डताळुरि) जात्यनुरूपं यथातथा शिक्यानि आयुधविशेषान् यष्टिविशेषांश्च तालच्छदपरिकल्पित-

तल्पविशेषांश्च बिभ्रतस्ते गोपालका आनन्दसंदोहतः कुटजकुसुमोपमेयान् दन्तान् प्रकाश्य हसन्तस्सन्तो घृतनर्तनमातेनिरे । [अभ्यञ्जनपूर्वकं मिथः परिरम्भणेन ससंभ्रमनर्तनं घृतनर्तनमित्युच्यते ।]

६. [கையுங்காலும்] पाणिपादमुन्नमय्य भाण्डतीर्थसेचनं मन्दमन्दमारचय्य रम्यया हरिद्रया ।
जिह्विकाविशोधने ददर्श सा जनन्यहो विस्तृते कृते मुखे शिशोर्जगन्ति सप्त च ॥ ६ ॥

(कैयुम् कालुम्) कृष्णकिशोरस्नपनसक्ता यशोदा तस्य दिव्यशिशोः पाणी पादौ च विस्तार्य हरिद्रालेपनमारचय्य सुगन्धिना सलिलेन स्नपयित्वा हरिद्राखण्डेन जिह्वानिर्लेहनं कुर्वती व्यात्ते तदास्ये सप्तलोकीमवैक्षत ॥ ६ ॥

७. [வாயுள் வையகம்] श्रीकृष्णस्य शिशोर्मुखे निखिललोकालोकनाद्विस्मिताः
सर्वे स्त्रीनिवहास्सहर्षमवदन्-नायं हि गोपात्मजः ।
दिव्यं दैवतमद्वितीयम् अनघैः पूर्णो गुणैः कीर्तिमान्
अत्याश्चर्यविचेष्टितादिभरितश्चेत्येवमुच्चावचम् ॥ ७ ॥

(वायुळ्वैयगम्) कृष्णशिशोर्मुखे सप्तलोकीं दृष्टवती यशोदा अन्यासामपि सखीनां तत्प्रदर्शनमकुरुतेति प्रतिपत्तव्यम् । तथाऽवलोकनेन विस्मितास्सर्वा अपि गोपाङ्गना मिथ एवमवोचन्— अयं न साधारणो गोपकुमारः ; अद्वितीयो दिव्यो देवः ; अखिलहेयप्रत्यनीककल्याणैकनिलयश्च ; अत्यद्भुतचेष्टितकारी परमः पुमानेव नूनमेवमवतीर्ण इति ॥ ७ ॥

८. [பத்துநாளுங்கடந்த] अथो दशसु वासरेष्वपि गतेषु गोपालकाः
परेद्यवि समन्ततो विजयतोरणस्तम्भकान् ।
निवेश्य परिमण्डितान्, तत उदूढगोवर्धनं
शिशुं करतलोत्सवानुभवतो ह्युपालालयन् ॥ ८ ॥

(पत्तु नाळुम् कडन्द) भगवतः कृष्णशिशोर्नामकरणदिनं प्राप्तम् । तदात्रे सर्वेऽपि वल्लवास्सर्वतो विजयतोरणस्तम्भान् सालङ्कारं प्रतिष्ठाप्य कृष्ण इति नाम च कृत्वा अथ तं दिव्यशिशुं करतले स्वीकृत्योपलाल्य महान्तमानन्दमन्वभूवन् । [उदूढगोवर्धनमिति विशेषणमिह भविष्यत्कथानुसन्धानेनेति नावद्यम् ॥ ८ ॥]

९. [கிடக்கில்தொட்டில்] पदाघातैस्तल्पं शिथिलयति शय्यामधिवसन्
कटिस्थाने पीडां जनयति धृतस्सन् शिशुरसौ ।
समाश्लिष्टो गाढं जठरमभिहन्त्यंघ्रितलतः
सखि ! क्लिश्ये साऽहं शिशुनियमने शक्तिविरहात् ॥ ९ ॥

(किडक्किल्तोट्टिल्) यशोदा स्वसखीमुद्दिश्य कृष्णशिशोरतिदुस्सहचेष्टापटुत्वं कथयतीति तद्भावनया निबद्धमिदं पद्यम् । सखि ! इत्येकवचनं जात्यभिप्रायम् । हे सख्यः ! इति यावत् । अयं शिशुः डोलातल्पमधिशायितो यदि चरणाघातैस्तच्छैथिल्यं संपादयति । हन्त ! सुकुमारयोश्चरणयोर्बाधा भवेदिति भिया डोलातल्पादुत्थाप्य कटिस्थाने यद्यसौ निवेश्यते तर्हि स्थानात् स्खलितस्सन् दुस्सहपीडां जनयति । यथाऽयं यत्किमपि चेष्टितं कर्तुं न शक्नुयात्तथा वक्षसि गाढमाश्लिष्टश्चेत् पादतलाघातैरुदरमभिहन्ति हन्त ।

एतादृशमिमं शिशुं यया कयाऽपि विधया नियन्तुमप्रभवन्ती साऽहं क्लेशमेव केवलमनुभवामीति सान्तर्मोदमभिदधाति यशोदा ॥९॥

१०. [செந்நெலார்வயல்சூழ்] सस्योदश्चित भूमिभागविलसद्गोष्ठीपुराधीशितुः
श्रीनारायणनामकस्य सुगुणैः पूर्णस्य जन्मोत्सवम् ।
उद्दिश्योज्ज्वलयज्ञसूत्रमहितश्रीविष्णुचित्तोदितं
श्रीगाथादशकं मुखे कलयतां पापक्षयो निश्चितः ॥ १० ॥

(शेन्नेलार्वयल्) इयं तु फलश्रुतिगाथा । सस्यसमृद्धकेदारततिशोभिश्रीगोष्ठीपुरनाथस्य कृष्णकिशोरत्वेनाभिमतस्य भगवतः कल्याणगुणगणपरिपूर्णस्य अवतारोत्सवमुद्दिश्य ब्राह्मणोत्तमश्रीविष्णुचित्तसूरिकथितं गाथादशकमिदं कीर्तयन्तो महान्तः अपहतपाप्मानस्स्युः ॥ इति *पेरियाळ्वार्तिरुमोळिनाम्नि विष्णुचित्तसूक्ते प्रथमशतके प्रथमं दशकं समाप्तम् । इतः परमिह एकैकदशकतात्पर्यसारसंग्राहकश्लोकमालिकैव सव्याख्यानं प्रकाश्यते ॥

१. – २. * शीदक्कडलुळ् * [சீதக்கடலுள்]

(श्रीकृष्णस्य पादादिकेशान्तसौन्दर्यानुभवो यशोदातादात्म्येन ।)

देवक्या धन्ययाऽत्र प्रहितमुपगतं कृष्णसंज्ञं किशोरं
सर्वाङ्गीणाभिरूप्यप्रचुरमनुपमं वीक्ष्य संमोदमाना ।
आहूयाशेषगोपीः स्वसुतपदसरोजादिकेशान्तशोभां
व्याचक्रे सा यशोदेत्युदितमुदितहृद्विष्णुचित्तो गतिर्नः ॥ २ ॥

* आकण्ठवारिभरमन्थरमेघदेश्यं पीताम्बरं कमललोचनपश्यहेति । ब्रह्म स्तनन्धयमयाचत देवकी त्वां श्रीरङ्गकान्त ! सुतकाम्यति का परैवम् * (श्रीरङ्गराजस्तवे) इत्युक्तरीत्या धन्यधन्या देवकी यं कृष्णकिशोरं स्वसविधे प्राहिणोत् तस्य भगवतो निरुपमं सर्वाङ्गसौन्दर्यं स्वयमनुभूय अमन्दानन्दसंदोहविवशस्वान्ता सती यशोदा अथ सर्वा अपि गोपाङ्गनास्समाहूय स्वपुत्रस्य तस्य पादादिकेशान्तवैलक्षण्यं विशदीचकारेति तस्या एव यशोदाया भावनया सहर्षं प्रोचिवान् विष्णुचित्तसूरिरस्माकं गतिः ॥

[विंशतिगाथात्मकमिदं दशकम् । अत एव शतकेऽस्मिन् नवैव दशकानीति ध्येयम् । विंशत्यामपि गाथासु विंशत्यवयवसौन्दर्यमनुभूयते । पादकमल-पादाङ्गुलि-जङ्घा-जानु-ऊरु-लिङ्ग-कटि-नाभि-उदर-वक्षः-अंस-करतल-कण्ठ-अधर-नासा-नयन-भ्रू-मकरकुण्डल-ललाट-अलकानुभवः क्रमेण ॥ २ ॥

१. – ३. * माणिक्कम्कट्टि * [மாணிக்கங்கட்டி]

(श्रीकृष्णस्य ब्रह्मादिदेवगणसमर्पितवस्तुकथनपूर्वकं डोलागीतिप्रपञ्चनम् ।)

डोलायां शाययित्वा मणिनिभवपुषं केशवं सा यशोदा
वेधाश्शम्भुर्मरुत्वान् अमरसमुदयो यक्षराजः प्रचेताः ।
पद्मा धात्री च वाणी तदिममथ च सद्भूषणान्यादरेण
प्राहिण्वन्नित्यगायत्तदिदमभिदधद्विष्णुचित्तोऽवतान्नः ॥ ३ ॥

यशोदा श्रीकृष्णकिशोरं डोलामधिशयितवन्तमारचय्य निद्रार्थं गीतानि गायतिस्म । तदानीं चतुर्मुखो डोलिकातलिमं समार्पिपदिति, शंभुः वासवः देवगणः वैश्रवणः वरुणः श्रीदेवी भूदेवी च नानाविधान्याभरणानि समर्पयन्तिस्मेति, सरस्वती (अथवा दुर्गादेवी) पटवासाञ्जनादिकं समर्पयामासेति च कथयामासेति कथितवान् विष्णुचित्तसूरिरस्मानभिरक्षतु ॥ ३ ॥

१. – ४. * तन्मुहत्तु * [தன்முகத்துச்சுட்டி]

(श्रीकृष्णमुदे यशोदाकृतचन्द्राह्वानवर्णनम् ।)

चन्द्राह्वानाख्यबाल्योचितकृतिनिरतं कृष्णमादाय कट्यां
भो चन्द्र ! त्वं किमन्धः ? किमु ननु बधिरो ? बालकस्यास्य लीलाम् ।
नो पश्यस्याह्वयोक्तिं न निशामयसि हा दण्ड्यसे नागतश्चेत्
एह्यत्रेत्याह मातेत्यभिहितवति मे विष्णुचित्ते रतिस्स्यात् ॥ ४ ॥

श्रीकृष्णकिशोरस्य डोलाशयनोचितं वयो व्यतीतम् । अथ अङ्गणादिषु विहरणोचितं वयः प्रादुरासीत् । तदा पांसुक्रीडादिसक्तोऽयं चन्द्राह्वानेऽपि लौकिकबालकवदनुरक्तोऽभूत् । तादृशं तं यशोदा स्वकटितले निदधाना 'हे चन्द्र ! दिव्येन मम सूनुना मुहुर्मुहुराहूतोऽपि त्वं कुतो न सन्निधत्से ? किं त्वं बधिरः ? अस्य क्रीडावैदग्ध्यमपि न वीक्षसे । किं त्वमन्धोऽसि ? सादरमेष खल्वयं त्वामाह्वयति ; तथाऽप्यनागतस्त्वं दण्डनार्होऽसि । यदि दण्डभीरुरसि, तर्हि सरभसमायाहि' इत्यकथयदिति प्रोक्तवति भट्टनाथ मुनौ ममास्तु रतिः ॥ ४ ॥

१. — ५. * उय्यवुलहु * [உய்யவுலகு] (श्रीकृष्णनटनविशेषदिदृक्षुयशोदाकृतप्रार्थनानुभवः ।)

बाल्ये माता तथाऽन्ये किमपि च नटनं कारयन्ते शिशूनां
शेङ्गीरैनर्तनं तत्त्वभिदधति बुधा द्राविडीवर्त्मविज्ञाः ।
तत्कृष्णे कारयन्ती नट नट तनयेत्युद्गृणाना यशोदा
नानास्तोत्रोक्तिवृन्दैस्सह मुदमभजत्, तद्वदन् सूरिरीड्यः ॥ ५ ॥

शैशवोचितनर्तनेषु * शेङ्गीरैनर्तनमिति द्राविडशास्त्रप्रक्रियया व्यपदिश्यमानं नर्तनविशेष कृष्णकिशोरे दिदृक्षमाणा यशोदा तं नानाप्रकारैस्स्तोत्रैरभिष्टूय 'हे पुत्ररत्न ! एवं नट, एवं नट' इत्युद्बोधयन्ती हर्षप्रकर्षमविन्दतेत्येतत् प्रकाशितवान् विष्णुचित्तसूरिरस्माकं स्तुतिविषयः ॥ * शेङ्गीरैनटनं नाम— माता चान्ये च शिशुहस्तावालम्ब्य नटनविशेषाभ्यासं यत्कारयन्ति, तदित्याचक्षते । शिशुः स्वस्य पाणितले जानुनी च धरायां निधाय ललाटमुन्नमय्य नटनविशेषं करोति यत्, तदेवैतदित्यप्याहुः ॥ ५ ॥

१. — ६. * माणिक्कङ्किण्किणि * [மாணிக்கக்கிண்கிணி]

(सहपाण्याख्यलीलाविशेषकाङ्क्षणानुभवः ।)

पाण्योस्साहित्यकृत्या विदधति शिशवः खेलनं, तच्च कृष्णे
माता संद्रष्टुकामा मणिनिभ ! मम च त्वत्पितुश्चाङ्कभागे ।
आगत्यागत्य हर्षात्प्रकलय सहपाण्याह्वयं क्रीडितं त्वं
पाणिभ्यां सेतुकृद्भ्यामिति कथितवतीत्यूचिवान् सूरिरीड्यः ॥ ६ ॥

द्राविड्यां शप्पाणिखेलनमिति किमपि कथ्यते । सहपाणिखेलनमेव तत् । पाणिना सह पाणिं संयोज्य ध्वनिविशेषं समुत्पाद्य क्रीडन्ति बालकाः । तादृशक्रीडाविशेषं दिदृक्षमाणा यशोदा 'हे मणिसन्निभ-दिव्यमङ्गलविग्रह ! मत्पुत्ररत्न ! त्वं मम च त्वदीयजनकस्य चोत्सङ्गे असकृदागत्य ताभ्यां पाणिभ्यां सहपाण्याह्वयं खेलनं कलय, यौ पुरा सेतुबन्धनादिकं चक्रतुः – इति प्रार्थयामासेत्यभिहितवान् श्रीविष्णुचित्तसूरिरस्माकं स्तुतिपात्रम् ॥ ६ ॥

१. — ७. * तोडर्शङ्गिलिहै * [தொடர்சங்கிலிகை]

(श्रीकृष्णकिशोरस्खलितगतिविशेषकांक्षणानुभवः ।)

सस्खालित्या गतिर्या शिशुषु भुवि जनैर्दृश्यते तां यशोदा
कृष्णे संद्रष्टुकामा, कलभ इह यथाऽऽयाति तद्वन्मुकुन्द ।
एहि स्खालित्यगत्या तनुगतमखिलं भूषणं नादयन् सन्
साकं रामेण चेति न्यगददिति गदन् विष्णुचित्तो गतिर्नः ॥ ७ ॥

शिशुषु स्खलितगतिः प्रथिता । धरायां पादतलयोस्सुदृढं निधानस्य दुश्शकतया स्खालित्येन युक्ता गतिर्भवति । तादृशीं मनोहरां गतिं दिदृक्षमाणा यशोदा 'हे मुकुन्द ! कलभागमननिर्विशेषं त्वमाव्रजन् दिव्यदेहगतसकलभूषणप्रणादमधुरं यथातथा अग्रजेन बलरामेण सह स्खलितगतिं कृत्वा मां प्रहर्षय' इति प्रार्थयामासेति प्रोक्तवान् श्रीविष्णुचित्तसूरिरस्माकं गतिः ॥ ७ ॥

१. — ८. * पोन्नियल्किण्किणिः * [பொன்னியல்கிண்கிணி]

(दूरादागत्य श्लेषकाङ्क्षणं कृष्णे ।)

बाला आधाव्य दूरात्सरभसमुपसृत्याथ मातुश्शरीरे
गाढाश्लेषं ददानाः कमपि कमपि चानन्दमुत्पादयन्ति ।
एत चानन्दमीप्सुर्निजसुतमभियाच्याञ्जसा संप्रहृष्टा
धन्यासीत्सा यशोदा तदिदमभिदधद्विष्णुचित्तोऽतिधन्यः ॥ ८ ॥

किशोरका मातुरुत्सङ्गमारोढुकामास्सरभसं दूरादागत्य मातुर्देहमधिरुह्य गाढसम्मर्दं दिशन्तो विलक्षणमानन्दमुत्पादयन्तीत्यनुभवसिद्धमेतत् । एतादृशानन्दलिप्सया यशोदा कृष्णकिशोरमभिष्टूय प्रार्थ्य प्रमुदितासीदित्यभिहितवान् श्रीविष्णुचित्तसूरिरेवंविधविलक्षणानुभवभूम्नाऽतितरां धन्यः ॥ ८ ॥

१. — ९. * वट्टुनडुवे * [வட்டுநடுவே] (कृष्णकृतपृष्ठतलाश्लेषेण हर्षानुभवाभिधानम् ।)

बालालङ्कारभूषाञ्चितमृदुतनुना कृष्णडिम्भेन शश्वत्
दूरादागत्य मूत्रस्रुतिततिसहितं पृष्ठभागे प्रदेयम् ।
कण्ठाश्लेषं प्रकाङ्क्ष्य प्रमदमनुपमं प्राप्तवत्या जनन्या
तत्स्तोत्रं यद्यदुक्तं तदभिहितवता सूरिणाऽहं सनाथः ॥ ९ ॥

अर्भका दूरात्सरभसमागत्य जनन्याः पृष्ठतलमाश्लिष्य खेलनविशेषं कुर्वन्तीति प्रसिद्धमिदं ननु । एतादृशं खेलनं कर्तुं कृष्णं याचते यशोदा । तदा खेलनकाले बाल्योचिताभरणनिनदश्रवणस्य मूत्रस्रुतेश्च परमभोग्यतया तद्याचनमपि कर्तव्यमासीत् । एवं कृतवत्या यशोदाया भावबन्धमात्मन्यावाह्य कथितवता श्रीविष्णुचित्तसूरिणाऽहं नाथवानस्मि ॥ ९ ॥

इति श्रीविष्णुचित्तसूरिसूक्ते प्रथमं शतकं समाप्तम् ॥

இரண்டாம் பத்து.

॥ अथ द्वितीयशतकमारभ्यते ॥

२. — १. * मेच्चूदुशङ्कम् * [மெச்சூதுசங்கம்]

(कृष्णस्य दृग्विभीषणचेष्टितोद्घोषणं गोपीजनकृतम् ।)

बालाः कुर्वन्ति दृश्यां किमपि विहरणं भीषणं ह्यर्भकाणां
तद्वत् कृष्णोऽपि गोपीष्वकुरुत निजदिव्यायुधख्यापनेन ।
प्रोचुर्गोप्यस्तदात्वे तदिदमतिभिया, तत्तथैवानुशंसन्
सूरिः श्रीविष्णुचित्तो विलसतु हृदये मामके ध्वान्तहारी ॥ १० ॥

लोके बालानां क्रीडितेषु दृग्विभीषणक्रीडितमप्यन्यतमं प्रथितम् । पक्ष्मणोर्विपर्यासनेन कुन्तलानां नेत्रभागेषु बन्धनेन च डिम्भानां भयोत्पादनं हि तत् । एवंविधं भीषणं चेष्टितविशेषं गोपकुमारिकास्वपि श्रीकृष्णः कृतवानिति तासां वाचा निबध्नाति दशकमिदं सूरिः । "कृष्णो विभीषयति हन्त भयं प्रसूते" इत्येव एकैकस्या अपि गाथायाश्चतुर्थश्चरणो विराजते । केन प्रकारेण भीषणं करोतीति तु स्पष्टतया नाभ्यधायि । लोके बाला यथा कुर्वन्ति तथैवायमपि कृष्णकिशोरः कृतवानिति सामान्यतया केषाञ्चिदभिसन्धिरासीत् । श्रीरङ्गक्षेत्रे अध्ययनोत्सवे एतद्दिव्यप्रबन्धानुसन्धानकाले [प्रथमोत्सवे प्रातः] अरैयरसमाख्यो दिव्यप्रबन्धगायक

एतद्दशकवर्णितचेष्टिताभिनयं कुर्वन् पक्ष्मणोर्विपर्ययकरणम् कुन्तलैर्मुखप्रच्छादनं च चक्रे । तदात्वे तत्र गोष्ठ्यां भगवान् रामानुजमुनिः तत्पृष्ठतो रामानुजपदच्छायाचार्यो गोविन्दसूरिरन्ये चासन् । गायकेन संदर्शितेऽभिनये अनौचित्यं प्रतिपद्यमानेन गोविन्दसूरिणा [एम्बारगुरुणा] अरसिकोऽयं गायक इति हृदि निर्विण्णेन प्रकारान्तरेणाभिनयप्रदर्शनं विलक्षणहस्तमुद्रया संसूचितम् । इङ्गितज्ञो गायकश्चाथ कृतचरमभिनयप्रकारमपहाय शङ्खचक्रदिव्यहेतिप्रदर्शनात्मकं विलक्षणमभिनयमकार्षीत् । कृष्णस्तु भगवानवतारसमये दिव्यायुधभूषितहस्त आसीत् । अथ * उपसंहर विश्वात्मन् रूपमेतच्चतुर्भुजम् । जानातु माऽवतारं ते कंसोऽयं दितिजन्मजः ॥ * इति पित्रोः प्रार्थनया दिव्यायुधोपसंहारमतनोत् । तथा तदोपसंहृतं दिव्यायुधमधुना गोपीसकाशे प्रदर्शयन् स एष तासां भीषणो भवतिस्मेति संप्रदायविदामनुसन्धानम् । गोविन्दसूरिप्रदर्शितरीत्या गायकस्वामिनि प्रदर्शितवत्यभिनयम्, गोष्ठीनिविष्टा भगवद्रामानुजप्रभृतयस्सर्वेऽपि हर्षप्रकर्षमवापुः ॥ १० ॥

२. — २. * अरवणैयाय् * [அரவணையாய்] (स्तन्यपानार्थं कृष्णस्याह्वानं यशोदाकृतम्)

वीथ्यां स्वैरं चरन्तं भयलवविधुरं नन्दनं नन्दपत्नी
हा कृष्ण! स्वैरमेवं विहरणमुचितं नैव ते वीथिकासु ।
काले स्तन्यं न पेयं किमु ?, कठिनहृदः कंसदैत्यस्य दौष्ट्यं
शङ्कां दत्ते, तदेहीत्यकथयदिति तत् प्रोचिवान् सूरिरीड्यः ॥ ११ ॥

श्रीकृष्णः कृत्स्नेऽप्यहनि लीलासक्तस्सन् क्षपितकालः श्रमातिशयेन स्तन्यपानमपि विस्मृत्य निद्रालुरभवत् । अथ प्रभातेऽप्यलब्धजागरं तं यशोदा प्रबोधयामास नानाविधस्तोत्रगीर्भिस्सह । प्रबुद्धोऽप्यथ कृष्णः स्वैरं वीथीषु विहरणे लोलुपस्सन् स्तन्यपानमकुर्वाण आसीत् । तदा कथयति माता 'हा कुमारक! दुर्बुद्धिदूषितः कंसस्त्वयि कठोरचेता इति प्रसिद्धम् । स च तुभ्यं द्रुह्यन् त्वज्जिघांसया आसुरप्रकृतीन् भूयसो मुहुः प्रेरयतीति च प्रसिद्धम् । अस्यामवस्थायां रथ्यासु निर्भयं स्वच्छन्दं विहरणं तव नैव मनागप्युचितम् । यथाकालं स्तन्यपानं किमु ते न कर्तव्यम्? वत्स! मा स्म चरः स्वैरम् । मातृवाक्यपरिपालनं ते भृशमावश्यकमहो । त्वदीयानि चेष्टितानि सर्वाणि मदुत्सङ्गे प्रदर्शयन् सन् प्रेम्णा स्रुतं मदीयं स्तन्यं पीत्वा कृतार्थय माम्' इति । इदं तद्भावभावनया दिव्यमधुरगाथाभिराचक्षाणो विष्णुचित्तसूरिरस्माकं स्तुतिपात्रम् ॥ ११ ॥

२. — ३. * पोय्प्पाड्डुडैय * [போய்ப்பாடுடைய] (श्रीकृष्णकर्णवेधोत्सवप्रस्तावे यशोदाकृतः ।)

श्रीकृष्णे कर्णवेधं कलयितुमधिकोत्कण्ठिता दिव्यमाता
तस्योक्त्वा केशवादिद्व्यधिकदशमहानामवर्गं सुभोग्यम् ।
जम्बूमुख्यं प्रदद्यां फलमतिमधुरं मास्म रोदीस्सुखं ते
भूयादित्याजुहावेत्यभिदधति मुनौ विष्णुचित्तेऽस्मि भक्तः ॥ १२ ॥

यशोदा कृष्णस्य कर्णवेधोत्सवं विकीर्षन्ती तदर्थं व्रजे सर्वा अपि ललना आहूय अथ तासां सत्कारार्थं ताम्बूलपूगादिकं च सज्जीकृत्य "आयाहि कृष्ण! कर्णवेधोत्सवमनुभवितुम्; कर्णवेधेन न ते बाधालेशोऽपि भविता; इह च पश्य सर्वानपि गोपालबालान् यथाकालमनुभूतकर्णवेधान् मकरकुण्डलालंकृतकर्णांश्च । त्वयाऽपि नन्वेवं

वर्तितव्यम्, मास्म रोदीः, त्वदभिमतजम्बूफलपनसफलादिकं च विशेषतो वितरेयम् । आयाहि तूर्णमायाहि कर्णवेधार्थं कर्णभूषणधारणार्थं चे" त्यकथयत् । तद्भावोपपत्त्या केशवादिद्वादशनामावलिग्रथनेन परमभोग्यमिदं दशकं प्रोक्तवति विष्णुचित्ते मुनावस्मि भक्तः ॥ १२॥

२. — ४. * वेण्णेयळैन्द * [வெண்ணெயளைந்த] (कृष्णस्य स्नानार्थमाह्वानं यशोदया ।)

गोष्ठेषु क्रीडनेन प्रचुरतरपरागोपरागं त्वदङ्गं
द्रष्टुं वाञ्छा गरिष्ठा मम, तदपि हसेन्नीलया सर्वलोकः ।
नैतच्छक्नोमि सोढुं तव बहु वितराण्यर्भक! स्वादुभक्ष्या-
ण्यायाहि स्नातुमित्याह्वयदथ जननी विष्णुचित्तस्तदूचे ॥ १३॥

स्नानार्थमुपकरणानि सर्वाणि सज्जीकृत्य 'कृष्णकिशोर! स्नातुमायाहि; गोष्ठेषु विहरणेन भवदीयं वपुरखिलं परागोपहतं दृश्यते। * सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोतीत्युक्त-नीत्या गोधूलिधूसरितकोमलदिव्यगात्रं द्रष्टुमुत्कण्ठा मम महती कामम्; तथाऽपि द्रष्टारस्सर्वेऽपि मदीयामश्रद्धा-मधिकृत्य विनिन्देयुः; त्वन्मनोरमा नीला च अहह मलीमसगात्रोऽसीति त्वां परिहसेत्। एतादृशपरिहासोपालम्भा-देरवकाशमप्रदाय क्षिप्रमायाहि स्नातुम्; ग्रहीष्यसि च स्वादूनि भक्ष्याणि' इति सानुनयमुक्तवती । तदिदमुवाच भगवान् विष्णुचित्तो मुनिः॥ १३॥

२. — ५. * पिन्नैमणाळनै * [பின்னை மணாளனை]

(कृष्णस्य केशपरिष्करणार्थं काकाह्वानं यशोदाकृतम् ।)

स्नातं कृत्वाऽथ कृष्णं चिकुरभरपरिष्कारकृत्यै यशोदा
सक्ता, लोके तदर्थं बलिभुजमखिला आह्वयन्तीति दृष्ट्या ।
कृत्वाऽमुष्यान्यपर्यं सुकरतरमिदं कृत्यमित्याशयाना
काकं प्रेम्णाऽऽजुहावेत्युदितवचसि मे विष्णुचित्तेऽस्तु भक्तिः ॥ १४॥

कृष्णस्य स्नानोत्सवो निरवर्तत। अथ चिकुरप्रकराणां परिष्करणं चिकीर्षितमासीद्यशोदायाः। तदर्थमाहूतः कृष्णो रथ्याक्रीडासु कुतूहलभूम्ना धावने समृद्धाभिरुचिस्सन् मातृचिकीर्षितनिर्वर्तनस्य अवकाशमप्रयच्छन्निवासीत्। लोके बालानां मनोविनोदनाय काकाह्वानादिकृत्यविशेषेषु मातरो व्यापृता भवन्ति; तदात्वे बालाश्च क्रीडावैयग्र्यं विहाय विस्मृत्य वा स्तब्धा अवतिष्ठन्ते; तादृशे समये स्वचिकीर्षितं कार्यं कुर्वन्ति मातरः कुमारकेष्वित्यनुभव-साक्षिकम्। एवमेवात्र यशोदापि कृतवतीति तत्कृतकाकाह्वानप्रणाल्या दशकमिदं निबध्यते । * अत्रागत्य विधेहि वायस! विभोः कृष्णस्य केशाञ्चनम् * इति प्रतिगाथं प्रोच्यतेऽत्र । किमहो वायस एव स्वयं करोति केशप्रसाधनमिति शङ्का जायेत । वस्तुस्थितिर्न तथा । वायसे आहूते सति बालानामान्यपर्यं जायते, तदात्वे तत्केशप्रसाधनं सुकरं भवति मातुः- इत्येव वस्तुस्थितिः । एवंचात्र केशप्रसाधनकृत्यस्य काके क्रियमाण-मारोपणं निर्वाह्यमुपचारात् ॥ १४॥

२. — ६. * वेलिक्कोलूवेट्टि * [வேலிக்கோல் வெட்டி]

(गोसंचारणार्हदण्डानयनार्थं काकचोदनं यशोदाकृतम्)

कृष्णं गोपालजन्मोचितकृतिकुतुकाद्गोततेश्चारणार्थं
कान्तारं यातुकामं छलवचनबलाद्रोद्धुकामा यशोदा ।
गोसञ्चारार्हदण्डं मम तनयवरस्याहरायाशु काके-
त्यूचे शश्वत्तदेतद्रसघनवचनैरूचिवान् सूरिरीड्यः ॥ १५ ॥

केशप्रसाधनानन्तरं पुष्पधारणं कारयितुमुत्कण्ठिताऽऽसीज्जननी । तदात्वे कृष्णस्तु गोचारणार्थं वनं व्रजद्भिर्बालकैस्साकं स्वयमपि जिगमिषन् 'वत्सचारणानुकूलं दण्डं देहि मातः!' इति निर्बवन्ध । पुष्पधारणशोभां दिदृक्षमाणा जननी तु तत्काङ्क्षानुरोधेन दण्डम् अप्रयच्छन्ती लौकिकरीत्या विप्रलम्भे प्रावर्तत । 'बालकृष्ण! तव दण्डस्तु वायसेन कुत्रापि नीत इव ; कथमहं सद्य एव तं दातुं प्रभवामि ? सहस्व मनाग्विलम्बम् ; दण्डमानेतुं काकमादिशामि ' इत्यभिधाय काकमाह्वयति । तदिदं निबध्यते दशकेऽस्मिन् । एवं यशोदातादात्म्येनानुभवन् विष्णुचित्तसूरिरस्माकं स्तुतिगोचरः ॥ १५ ॥

२. — ७. * आनिरैमेय्क्कनीपोदि * [ஆநிரை மேய்க்க நீபோதி]

(पुष्पधारणार्थं कृष्णाह्वानं यशोदाकृतम् ।)

स्नातं संपुष्टकेशं सुतमथ कुसुमालंक्रियाढ्यं चिकीर्षुः
माता चाम्पेयमल्लीदमनकसुरपुन्नागमागध्यभिख्यम् ।
सज्जीकृत्य प्रसूनप्रचयमभिनवं वत्स ! पुष्पाणि धर्तुं
द्रागायाहीति यत्प्रामकृत, वदति तद्विष्णुचित्तोऽस्मि भक्तः ॥ १६ ॥

अधस्तनदशककृतेन विप्रलम्भोपायेन निरुद्धवनप्रयाणौत्सुक्यं कृष्णकिशोरं नानापुष्पभूषितशिरस्कं कृत्वा प्रेक्षितुं कामयमाना यशोदा चाम्पेयमल्लिकादमनकसुरपुन्नागमागधीमालतीप्रभृतीनि सद्योविकसितानि कुसुमानि समाहृत्य 'वत्स ! एतानि पुष्पाणि धारयितुमायाही' त्ययाचत । तदिदं दशभिर्गाथाभिः कथयति विष्णुचित्तसूरावहमस्मि भक्तिमान् ॥ १६ ॥

इदं दशकं सर्वेष्वपि भगवदालयेषु सायं नित्यमधीयते भक्तप्रवरैः पुष्पसमर्पणसमय इति दशानामपि गाथानां प्रत्येकशः श्लोकविवर्तः कृतः प्रकाश्यतेऽत्र ।

१. [ஆநிரை மேய்க்க]

गास्सञ्चारयितुं प्रयासि , न हि वेत्स्यात्मप्रभावं हरे !
कान्तारे बहु सञ्चरन् बत ! वपुर्ग्लानिं समासीदसि ।
भाण्डे चूषसि दुग्धमित्यहह भो मित्रैस्तैर्हस्यसे
पीयूषादपि भोग्य ! चम्पकसुमं वोढुं समागच्छतात् ॥ १ ॥

हे कृष्ण! त्वं निजदिव्यविग्रहसौकुमार्यमीषदप्यजानन् सन् स्वयमेव हन्त! गाश्चारयितुं वनं व्रजसि । इतस्ततस्तत्र मुहुः पर्यटनेन परमशोभनस्य वपुषो बत! ग्लानिं विन्दसि । गृह एव तिष्ठता त्वया भाण्डे दुग्धं चूष्यत इति परिहसन्त्यमित्रजनाः ; परिहसन्तु नाम कामं ते, त्वदीयं सर्वमपि चेष्टितमस्मादृशां परमभोग्यं ननु । अमृतादप्यधिकभोग्यताशालिन् कृष्ण! चाम्पेयकुसुममर्पयामि ते शिरसि । तदिदं वोढुमायाहि भोः ॥ १ ॥

२. [கருவுடை மேகங்கள்] जीमूतो जलगर्भनिर्भर इवानन्दं दृशोर्वर्धयन्
सौन्दर्याञ्चित! सर्वलोकविततीरक्षार्थमत्रोदित ।
लक्ष्मीनायक! रंगनाम्नि निलये शेषे शयान प्रभो
सौगन्ध्याधिकमल्लिकास्रजमिमां वोढुं समागच्छ भोः ॥ २ ॥

हे कृष्ण! वर्षुकवाहकस्य विलोकने यावानानन्दो जायते, सत्यं तावानानन्दो जायते तवावलोकने । एवंनाम सुन्दर! सर्वजगद्रक्षार्थमत्राविर्भूत! श्रीरङ्गे भोगिभोगशयनीयशायिन् श्रियः पते! सौरभाढ्यां मल्लीमालामिमां धारयितुमायाहि ॥ २ ॥

३. [மச்சொடுமாளிகையேறி] आरुह्य प्रसभं महत्तरगृहप्रासाददेशादिषु
प्राप्य स्त्रीजनतान्तिकं शिथिलयन् तच्चोलचेलादिकम् ।
नित्यं दुश्चरितोत्सुक! क्षितिधरे शेषाभिधे सन् प्रभो!
वोढुं सद्दमनं च पाटलसुमं स्वामिन् समागच्छ भोः ॥ ३ ॥

उत्तुङ्गसौधादिस्थलेषु यत्रयत्र वनिता निवसन्ति तत्रतत्र समीपतो गत्वा तासां कञ्चुकवस्त्रादिकं शिथिलीकरोषि । एवंविधेषु दुश्चेष्टितेषु नित्यमुत्कण्ठित! शेषाद्रिशेखरविभो! दमनकं पाटलप्रसूनं च धारयितु-मायाहि ॥ ३ ॥

४. [தெருவின்கண்ணின்று] स्थित्वा वीथिषु बालगोपललनागोष्ठीषु दुश्चेष्टितं
स्वैरं मा कुरु नीलकेशललितभ्रूरम्यफालोज्ज्वल ।
भास्वन्मेघशिशूपमेयसुषमासंपूर्ण कृष्णप्रभो
वोढुं सौरभसंभृतं दमनकं श्रीपल्लवं चाऽऽव्रज ॥ ४ ॥

हे सर्वाङ्गसुन्दर! मेघडिम्भनिभ! कृष्णकिशोर! रथ्यासु बालिकाभिस्सह स्थित्वा स्वच्छन्दं दुरितानि मास्म कार्षीः । सुरभिदमनकं * मरुकोलुन्दुनामकं * श्रीपल्लवं च धारयितुमायाहि ॥ ४ ॥

५. [புள்ளினைவாய்பிளந்] वक्त्रं दैत्यबकस्य दीर्णमतनोः दन्तं गजस्याहरः
राक्षस्याः किल नासिकां व्युदसृजः रक्षःपतिं चावधीः ।
नाथ? त्वां! नवनीतजग्धिसमये निर्भीरहं प्राहरं
तत्त्वास्तां विमलाम्बुनिर्गतमिदं कल्हारमुत्तंसय ॥ ५ ॥

हे कृष्णभगवन्! तव एकैकमपि चेष्टितमतिमनोहरं भयानकं च ; बकासुरस्य वदनं विदारयामासिथ ; कंसप्रेरितस्य कुवलयापीडस्य करिणो दन्तं जहर्थ ; सूर्पणखाया अङ्गभङ्गं चकर्थ । लङ्केशं रावणं व्यापादयामासिथ ।

कर्तुमिच्छन्ती 'कृष्णकिशोर! त्वं सायंसन्ध्यासमयेऽस्मिन् चत्वरादिस्थलेषु मा स्म तिष्ठः; गृहाद्बहिः कुत्रापि मा स्म गच्छः; क्षिप्रमिह समायाहि; मया करिष्यमाण मङ्गलदीपाभ्यर्हणं स्वीकुरु' इत्याजुहाव । तदिदमाह्वानं श्रीविष्णुचित्तो मुनिः श्रीश्वेताद्रिनाथमेव नन्दनन्दनत्वेन विभाव्य तत्सविधे विज्ञापयामास; यतो ह्यधुना अर्चावतार एवानुभवयोग्यता वर्तते । एतादृगनुभवशाली मुनिवर एव नूनमनुभवरसिकेष्वग्रगण्यः ॥ १७ ॥

२. — ९. * वेण्णेय्विळुङ्गि * [வெண்ணெய் விழுங்கி]

(कृष्णचेष्टितखिन्नगोपीनामाक्रन्दनं मातुर्विनयन च)

गेहे गेहे च गव्यान्यसकृदपहरन् भाण्डभङ्गं च कुर्वन्
मुष्णन् भक्ष्याणि कन्यावलयमपहरन् ते तनूजोऽतिधूर्तः ।
कृत्यान्येतस्य सोढुं न वयमिह मनागप्यहो शक्नुमो भो
मान्ये धन्ये यशोदे! झटिति तव सुतं शिक्षयेत्यङ्गनासु ॥ १८ ॥

आक्रोशन्तीषु माता प्रमुदितहृदया कृष्ण दामोदर! त्वं
मैवं कार्षीरवज्ञास्पदचरिततातिं वत्स मायाह्युपेहि ।
तुभ्यं भक्ष्याणि हृद्यान्यहमिह वितराण्येहि मत्पार्श्वमाश्वि-
त्याहूयाश्लिष्यतिस्मेत्यभिदधति महायोगिनि स्यां प्रपन्नः ॥ १९ ॥

कृष्णस्तु व्रजे प्रतिगृहं प्रविश्य वनितानामसह्यानि बहुविधानि स्तेयादीनि चेष्टितान्यकार्षीदिति तास्ता ललना यशोदान्तिकमुपेत्य कथयन्ति तानि कृष्णचेष्टितानि; तदाकर्ण्य यशोदा श्रुतिसुभगैरुपदेशैर्विनयते कृष्णम् । इत्यनया प्रक्रियया निबद्धमिदं दशकमतिमात्रमनोहरम् । मातर्यशोदे! तव तनयः कृष्णोऽस्माकं सदनानि पुनः पुनरागत्य नवनीतादिकं मुषित्वोपभुज्य अथ शून्यभाण्डं च शिलायां प्रक्षिप्य भञ्जयन् तद्ध्वनिविशेषनिशमनेन हृष्यतीव । पात्रेषु गूढं निहितानि भक्ष्याणि च स्वैरमपहृत्य भुक्त्वा किमपि किमपि भाषते हन्त! । सरभसमस्मदीयसदनान्तः प्रविश्य कन्याकरवलयमपहृत्य जम्बूफलक्रयणे तद्विनियोगमतनुत । एवंविधान्यदसीयानि धूर्तकृत्यानि न वयं मनागपि सोढुं शक्नुमः; मानिनि भाग्यनिधे यशोदे! तव तनयं क्षिप्रमाहूय शिक्षयेथा इति गोपीष्वाक्रोशन्तीषु, एतदाकर्णनेन मुदितहृदया सती यशोदा 'कृष्णकिशोर मुकुन्द! अस्माकमवज्ञास्पदान्येतादृशानि कृत्यानि मा स्म कार्षीस्त्वम्; वत्स! मत्सविधमुपेहि; त्वदपेक्षितानि भक्ष्याण्यहमेव वितराणि ते; अह्नाय समायाहि वत्स!' इति सानुनयमभिधाय सप्रेमभरमाजुहाव । अथ सन्निहितं कृष्णमाश्लिष्य हृष्यतिस्म च । तदिदमत्यद्भुतगाथाभिः कथितवति भट्टनाथमुनावहमस्मि प्रपन्नः ॥ १९ ॥

२. — १० * आत्तिलिरुन्दु * [ஆற்றிலிருந்து]

(यमुनायां कृष्णचेष्टितान्यसहमानानां गोपकन्यकानामाक्रन्दनम् ।)

कृत्वा गेहेषु चेष्टामथ रवितनयामापगामेत्य तत्र
स्त्रीणां नेत्रेषु पङ्कप्रकरमवकिरन् केशवो मंक्षु हृत्वा ।
वासोभूषादि तासामथ रुदितवचांस्युद्गमय्य प्रहृष्टः
तद्गोपीक्रन्दनानि प्रवदति भगवद्भट्टनाथेऽस्मि भक्तः ॥ २० ॥

पूर्वदशके व्रजसदनेषु वासुदेवेन विरचितानि धूर्तचेष्टितान्यधिकृत्य गोप्यः क्रन्दन्ति स्म यशोदान्तिके । अथ कृष्णो व्रजाद्बहिर्यमुनासरित्प्रान्तप्रभृतिप्रदेशेषु वल्लवीवस्त्रभूषणाद्यपहरणमाततानेति तदिदमसह्यं विषादं प्रकाशयामासुर्यशोदान्तिके इति निबद्धमिदं दशकम् । अयि यशोदे ! नद्यां विहरन्तीष्वस्मासु पङ्कप्रकरमवकीर्य करवलयचेलादिकमपहृत्य सजवं प्रधाव्य सदनान्तः प्रविश्य वाचमप्यवितरता कृष्णेन वयमवसन्नास्स्मः ; कदाचिदस्मदीयं सर्वस्वमपहृत्य समुत्तुङ्गशाखिशाखास्थितेन कृष्णेन वयमुत्सीदामः ; कालियभुजगमर्दनं कृत्वा कृतमहोपकारो भगवान् हन्त भृशमस्मानवसादयति ; धेनुकासुरदमनपूर्वकं गोवर्धनाद्रिमुद्धृत्य गोगोपीजनरक्षणमप्रतिममाहितवता भगवता वयमहह ! विषादितास्स्मः । दधिदुग्धनवनीतादिस्तेयनिमित्तेन प्रापितोलूखलबन्धो मुकुन्दोऽस्मानुत्सादयति ; पूतनास्तन्यपानेन व्रजं सनाथीकृतवानच्युतोऽस्मान् विह्वलयति हन्त ; त्रैविक्रमक्रमकृताक्रमणत्रिलोको भगवान् दुःखापयति हन्तास्मान् ; विमोचितग्राहग्रासेन गजेन्द्रेण स्तुतो भगवान् बत ! मारयत्यस्मान् ; दिव्यवराहवेषधृत्वा भूदेवीं यथास्थानं स्थापितवान् भगवानद्य नः प्रणाशयति हन्तेत्येवमुच्चावचमाचक्रन्दुर्गोपालकुमारिका इति तद्भावभावनया कथितवति विष्णुचित्तसूरावहमस्मि भक्तः ॥ २० ॥

इति श्रीभट्टनाथसूरिसूक्तसर्वस्वे द्वितीयं शतकं समाप्तम् ॥

मून्ऱाम् पत्तु

॥ अथ तृतीयशतकमारभ्यते ॥

३. — १. * तन्नेरायिरम् * [तन्नेरायिरम्]

(कृष्णस्यातिमानुषचेष्टितध्यानेन चकिताया यशोदाया उक्तिः ॥)

श्रीकृष्णो बालकस्सन्नपि च बहुविधा दिव्यचेष्टास्तनोती-
त्येकैकस्मिन् क्षणेऽपि प्रचुरविभवया दृष्टवत्या जनन्या ।
हे कृष्ण ! त्वामहं वेद्म्यनुपमम् अथ ते स्तन्यदाने च भीता-
ऽस्मीत्युक्तं तत्तथैवाभिहितवति मुनौ विष्णुचित्ते रमेऽहम् ॥ २१ ॥

एतावता कालेन तदा तदा कृष्णकिशोरमाहूय स्तन्यं पाययन्ती यशोदा अधुना तस्मिन् कृत्ये स्वात्मनोऽतिमात्रमुदितां भीतिं प्रख्यापयति– हे कृष्ण ! त्वामहं वेद्म्यनुपममथ च स्तन्यदाने च भीताऽस्मीति दशकृत्वः कथयति । वत्स ! त्वामहं साक्षात्सर्वेश्वरमभिजाने ; त्वं साधारणो बालो न भवसि । नानाविधानि दिव्यतमानि खलु चेष्टितानि त्वं कलयसि ; प्रतिक्षणमपि तावकानि तानि सर्वाण्यप्यत्यद्भुतचेष्टितानि प्रेक्षमाणैव खल्वहं वर्ते । पूतनायाः स्तन्येन सह प्राणानपि तस्याः पीतवानसि ; शकटमप्यसुरं क्षणेन भञ्जयामासिथ स्तन्यार्थी प्ररुदन्निव । स्वात्मना निबद्धमुलूखलमप्याकृष्य व्रजन् यमलार्जुनभङ्गमप्याततन्थ । एवमेवं सुबहून्यतिमानुषचेष्टितानि कृतवन्तं कुर्वन्तं च त्वामहं साक्षान्नारायणमभिजाने । अतस्तुभ्यमितः परं स्वपुत्रधिया स्तन्यं दातुमतीव भीताऽस्मीत्यसकृदाह । तदिदं तद्भावभावनया कथितवति श्रीविष्णुचित्ते मुनिवरे प्रवणोऽस्मि ॥

३. — २. * अञ्जनवण्णनै * [அஞ்சனவண்ணனை]

(गोवृन्दचारणाय कृष्णमरण्यं प्रेषितवत्या यशोदाया अवसादः ।)

प्रत्यूषे बालकृष्णं मणिनिभवपुषं गोपजात्यर्हकृत्या-
नुष्ठानार्थं वनं प्रत्यतिकठिनहृदा प्रेषयन्त्या जनन्या ।
पश्चात्तत्रत्यरूक्षस्थितिमपि बहुशस्संमृशन्त्या सखेदं
प्रालापीत्यूचिवान्मे मनसि विजयते विष्णुचित्तो महात्मा ॥ २२ ॥

कृष्णे स्वपुत्रत्वप्रतिपत्तिप्रहाणं प्राक्तनदशके प्रकाशितवती यशोदा अथ तद्विस्मृत्य पुनरपि तस्मिन् पुत्रताधियमधिवहन्ती जात्युचिततया तं सुतं प्रभाते गोचारणार्थमरण्यं प्रति प्रेषितवती तदनु तद्विश्लेषमसहमाना भृशं दूयमाना, व्रजमधिवसता तेन तदा तदा क्रियमाणानि धूर्तचेष्टितानि स्मृत्वा कथयित्वा च 'हा हन्त! एवं नाम व्रजे धूर्तकृत्यकरणेन विहर्तुमर्हं मम कुमारं अतिकर्कशहृदयाऽहमतितीक्ष्णकण्टकसञ्चयपाषाणखण्डदन्तुरं काननं प्रापयम्! बत बत पापिनी खल्वहम्' इति स्वात्मानमतिमात्रमधिक्षिप्तवती । तत्तथैव कथितवान् भगवान् भट्टनाथस्सूरिवरो मम मनसि विराजते ॥ २२ ॥

३. — ३. * शीलैक्कुदम्बै * [சீலைக்குதம்பை]

(वनात्प्रतिनिवृत्ते कृष्णे यशोदाया उच्चावचभाषितानि ।)

गोचारणार्थं वनं गतवान् कृष्णस्सायं व्रजं प्रतिनिववृते । तदात्वे मातुर्यशोदाया यानि बभूवुरद्भुतभाषितानि तानि दशकेऽस्मिन्नतिरमणीयप्रक्रियया निबद्धानि विष्णुचित्तसूरिणा । दशकस्यास्य सारसंग्रहः पद्यैरष्टभिः क्रियते ॥

१. वृन्दारण्ये वयस्यैस्सह बहुलतरान् गोगणांश्चारयित्वा
सायं कृष्णस्समायात्यनुपमसुषमः पृष्ठतो गोगणानाम् ।
वन्यालङ्कारधन्यं तमिममनुकलं वीक्षमाणा यशोदा
सानन्दं यद्यदूचे तदिदमनिशमावर्तते मानसे मे ॥ २३ ॥

वृन्दावने वयस्यैस्साकं गाश्च वत्सांश्च चारयित्वाऽथ परमया सह शोभया गवां पृष्ठतस्सायंसन्ध्यासमये समागच्छति कृष्णो नानाविधकाननकुसुमपरिकर्मितगात्रस्सन् । तादृशमतिमनोहरतनुं तनयमनुकलमवेक्षमाणा यशोदा परमानन्दपूरितस्वान्ता यद्यदभिदधे, तत्सर्वं सत्यं मे मनसि सततमावर्तते– इति स्वानुभवोक्तिरेषा ॥२३॥

२. वैलक्षण्येन कर्णाभरणमुपवहन् चारु वासो वसानः
मुक्तास्रग्भूषणाढ्यो मम तनयवरः पृष्ठतो गोगणानाम् ।
आयातीक्षध्वमेतं नयनशतसहस्रावलोकार्हवेषं
सत्यं सर्वाः स्त्रियोऽस्मिन् जगति मदितरा हन्त! वन्ध्या हि सख्यः! ॥ २४ ॥

वामकर्णाभरणमन्यत् दक्षिणकर्णाभरणमन्यदित्येवंरीत्या वैलक्षण्येनार्पितं कर्णभूषणमुद्वहन् रमणीयं च

वस्त्रं वसानो मौक्तिकग्रैवेयकालंकृतो मदीयः पुत्रो मुकुन्दो गोगणानां पृष्ठत आयाति भोः सख्यः ! । नयनानां शतसहस्राण्यावाह्य वीक्षणीयचारुवेषमेतं कुमारमीक्षध्वमागत्य । सत्यं वच्मि, अहमेकैव भुवने प्रसूतपुत्राऽस्मि । मद्व्यतिरिक्तास्सर्वा अपि ललना वन्ध्या एव, न संशयः ॥ २४ ॥

३. कल्ये प्रोत्थाप्य कृष्ण ! प्रियसुततिलक ! त्वामहं भोजयित्वा
वत्सानां चारणार्थं सुकठिनहृदया प्रैषयं प्रत्यरण्यम ।
छत्रं पादूं च नादां किमहमकरवं बुद्धिहीना वराकी
तत्र क्लेशानुभूतीस्तव तु बहुविधाश्चिन्तयन्ती विदूये ॥ २५ ॥

अये प्रियपुत्रतल्लज कृष्णकिशोर ! अतिकठोरहृदयाऽहं प्रत्यूषे त्वां शयनादुत्थाप्य भोजयित्वा हन्त ! वत्सचारणार्थमरण्यं प्रति प्रैषयम् । आतपकण्टकादिबाधानिवारणार्थं छत्रं पादुकां च बत ! न प्रायच्छम् । हा बत ! हतबुद्ध्या मया किं कृतमभूत् ! कानने तव क्लेशानुभवान् बहुविधान् मनसि मुहुश्चिन्तयन्ती संप्रति विह्वलाऽस्मि ॥ २५ ॥

४. म्लाने पादारविन्दे नयनकमलमप्याप भूयोऽरुणत्वं
श्रीमन् गोविन्द ! तेऽभूद्वपुरपि बहुशो गोरजोभिः परीतम ।
स्नानीयं सुष्ठु सज्जीकृतमिह, कलितस्नान आयाहि भोक्तुं
साकं कृष्ण ! त्वयैवाशितुमुपवसति प्रेमधन्यः पिता ते ॥ २६ ॥

हा नन्दन ! तव सुकुमारतरे पादारविन्दे कर्कशकान्तारसञ्चरणेन म्लाने ह्यभूताम्; आतपादिबाधया नयनारविन्दमपि हि भूयोऽरुणत्वमवाप । दिव्यं वपुरपि हि बत ! गोधूलिधूसरितमभूत् । अलमतीतचिन्तनेन । सुभोग्य स्नानीयं सज्जीकृतमस्ति; अविलम्बेन स्नात्वा भोक्तुमायाहि वत्स ! । त्वयैव साकं भोक्तुमिच्छन् तव जनकोऽपि हन्त कृतोपवासो वर्तते ॥ २६ ॥

५. वत्स श्रीकृष्ण दामोदर जलदरुचे ! यामुने नीरपूरे
तुंगात्कुन्दान्निपत्योरगशिरसि ततन्थातिघोरं हि युद्धम् ।
हाहन्तैतन्निशम्याप्यहमिह न लभे जीवितस्य व्यपायं
कस्मात् कंसस्य चित्ते मुदमुपजनयन् क्रीडसीत्थं कठोरम् ॥ २७ ॥

नीलमेघनिभ ! वत्स कृष्णकिशोर ! काननं गतवता त्वया कालिन्दीप्रवाहे कालियफणिना सह कृतं युद्धं श्रुतं बत ! मया; यमुनातटस्थितं कुन्दमनोकहमारुह्य ततः फणिनश्शिरसि निपत्य घोरतरं युद्धमातनुथेव । प्राणापायशङ्काबीजमीदृशं साहसं त्वया कृतमाकर्ण्यापि प्राणान् धारयामि खल्वहमतिकठोरचेताः । अस्त्वेतत् । मत्प्रेमनिधे अर्भक ! एवंविधैस्तावकैस्साहसैः कंसस्य हृदि महीयानानन्दो हि जायते । यया कयाऽपि विधया अत्याहितं ते प्रतीक्षमाणस्य प्रार्थयमानस्य वा तस्य संतोषं संजनयन् किमर्थमेवं कठोरं क्रीडसि ? ॥ २७ ॥

६. वत्सात्मा कोऽपि दैत्यस्समुपगत इवारण्यकोणे, तमेनं
प्रोद्धृत्य त्वं कपित्थे व्यसृज इति कथा काचिदाकर्णिता भोः ।
सद्यस्सत्यं शपेऽहं मम तनयमणेर्यें सृजन्त्यापदस्ते
सोऽयं वत्सः कपित्थोऽप्यलभत यदहो तल्लभेरन् क्षणेन ॥ २८ ॥

वत्स दामोदर! अन्यामपि कथां कामपि त्वदीयामद्याहमाकर्णयम् । कंसप्रेरितः कोऽपि दैत्यो वत्सरूपी सन् विपिने समागत इव । तमुद्धृत्य त्वं कपित्थोपरि क्षिप्तवानिव । एतदपि ते सुमहत्साहसम् । अस्तु तत् । भो लोकाः :वत्सासुरः कपित्थासुरश्चेत्युभाविमौ कृतसंकेतौ खलु समागतौ मत्पुत्ररत्नप्राणापाय चिकीर्षया ।एवमन्येऽपि ये ये दौरात्म्यं वहन्ति, क्षणेन ते वत्सकपित्थयोर्गतिमेव लभन्ताम् ॥ २८ ॥

७. लोके कुत्राप्यनाकर्णितमिह किमपि श्रूयतेऽस्माद्य कृष्ण !
प्रत्तं गोपैर्मघोने दधिघृतमखिलं शाकसूपान्नमिश्रम् ।
निश्शेषं त्वं समाश्ना इति , ननु भगवन् प्राशयेयं कथं त्वाम्
अद्यारभ्येति भीताऽस्म्यहह ! मधुरिपो ! कुक्षिरन्यादृशस्ते ॥ २९ ॥

वत्स केशव ! इयता कालेन मया कुत्राप्यनाकर्णिता काऽपि चर्या हन्ताद्य शुश्रुवे । यथासमुदाचारं गोपालकैर्वासवाय समर्पितं दधिघृतदुग्धशाकसूपान्नादिकमशेषं त्वमेकाकी क्षणमात्रे अशितवानिव । एवंनाम पृथुतरोदरभरितं त्वामहं कथमिव भोः प्राशयेयम्? अन्यादृश इव ते कुक्षिरधोक्षज! । त्वदीयैतादृशविचित्र-चेष्टितश्रवणतः प्रभृति अहह! भृशमहं चकिताऽस्मि ॥ २९ ॥

८. कृष्ण ! श्रोणोत्सवस्ते सुतवर ! भविता सप्तमेऽह्न्येतदर्थं
सर्वासां वल्लवीनां पुर इह विदधाम्यंकुरारोपणं च ।
तस्मान्मा याह्यरण्यं परदिनत इहैवावतिष्ठस्व भव्यो
गोविन्देत्याह माता , तदिदमभिदधद्विष्णुचित्तोऽतिधन्यः ॥ ३० ॥

भगवन् कृष्ण विष्णो! पुत्ररत्न! इतस्सप्तमेऽहनि श्रोणानक्षत्रोत्सवस्ते भविता । एतदर्थमद्य सर्वा अपि गोपीरिहाहूय अङ्कुरारोपणमहोत्सवमप्यकार्षम् । अतस्त्वं श्वः प्रभृति मा स्म गच्छः काननं प्रति । सर्वथा विधेयस्सन् इहैव वर्तेथाः प्रियपुत्रमणे गोविन्द! — इत्याह जननी यशोदेति तद्भावभावनया तदेतत्सर्व-मतीव हृद्यं कथितवान् विष्णुचित्तो धन्यधन्यः ॥ ३० ॥

३.—४. * तळैकलुम् तोङ्गलुम् * [தழைகளுந் தொங்கலும்]

(वृन्दारण्यात् सायं गोकुलं प्रविशति गोविन्दे तादात्विकचर्याविशेषाणामत्यद्भुतं प्रकथनम् ।)

दिनान्ते वृन्दावनात् व्रजं विशति नन्दसूनौ गोपाङ्गनानां विलक्षणो व्यामोहस्समजनि; समजायन्त च तत्परीवाहरूपाणि मञ्जुभाषितानि विविधानि सुबहूनि । तत्सर्वमतिमधुरमनोहरप्रणाल्या विष्णुचित्तसूरिर्दशकेऽस्मिन्निबबन्ध । षड्भिः पद्यैरेतद्दशकसारसंग्रहः क्रियते दासेन ॥

१. नानाबर्हातपत्रैस्सह सह च गवां भूरिबृन्दैर्दिनान्ते
सानन्दं गोकुलं प्रत्युपगतमुचितालंक्रियं नन्दसूनुम् ।
दर्शंदर्शं विमुग्धैर्व्रजयुवतिगणैर्यत्कृतं पारवश्यात्
यच्च प्रेम्णाऽभ्यधायि प्रणिहितमनसां योगिनामप्यगम्यम् ॥ ३१ ॥

बर्हातपत्रशतसहस्रशोभी सन् गोगणैस्सह सायं विचित्रालङ्कारविततभिरभिरामो नन्दसूनुस्सानन्दं व्रज-

मुपाययौ । तदात्वे तं क्रियासमभिहारेण विलोक्य व्यामोहविवशाभिर्व्रजयोषिद्भिर्यद्यदकारि, यद्य यद्य व्याहारि, तत् पराशरपाराशर्यादियोगिपुंगवानामपि वाङ्मनसयोरभूमिः । धन्याग्रगण्यस्य विलक्षणभाग्यभूम्नो विष्णुचित्तसूरेरेकस्यैव वाचो गोचरोऽभूदिति यावत् । [विद्वेन दासेन स्वयं व्याहृतमिदम्] ॥ ३१ ॥

२. कट्यां कृष्णस्य भातं किसलयरुचिरं कोमलं दिव्यवस्त्रं
तस्योर्ध्वे खड्गबन्धो दृढतरघटितस्तत्र पट्टोपबन्धः ।
वन्यालङ्कारधन्या तनुरुचिरतुला गोपबालौघमध्ये
सायं सोल्लासयानं कथमिदमधुना मादृशां चिन्तनार्हम् ॥ ३२ ॥

कृष्णस्य कटितटे किसलयकोमलं दिव्यं वासः किमपि बभासे । तदुपरि सुदृढघटितः छुरिकाबन्धविशेषस्सुमनोहर आसीत् । स च चारुतरपट्टोपबन्धसनाथश्चकास्ति स्म । वन्यपुष्पबर्हादिभिर्विचित्रतरालङ्कारशालि विलक्षणं वपुरतिमात्रमशोभत । एतादृश्या दिव्यदिव्याद्भुतशोभया सायंतनं कृष्णस्य व्रजं प्रत्यागमनं तदा खलु दर्शनीयम् । हन्त दौर्भाग्योपहतानामिदानीन्तनानां मादृशां कथमहो चिन्तनार्हमेतत् ॥ ३२ ॥

३. लीलायष्टिं कृपाणं धनुरतिकमनीयोत्तरीयं च मित्रे-
ष्वादायाग्रे प्रयातेष्वथ परमसुहृद्वल्लमंसेऽवलम्ब्य ।
आयान्तं नन्दसूनुं बत ! मम तनया वीक्ष्य सौन्दर्यमग्ना
गाढं दृष्ट्वा च पार्श्वे न्यविशत, जनताश्चक्षतेऽत्रापवादम् ॥ ३३ ॥

कान्तारविहारकाले लीलायष्टिकृपाणधनुरादिकं कृष्णहस्ते स्थितम्; अथ गृहं प्रति निवृत्तिसमये तत्सर्वं वयस्या आदाय प्रतस्थिरे पुरस्तात् । तदनु प्राणनिर्विशेषं कमपि सुहृदरं अंसे सलीलमवलम्ब्य सोल्लासं प्रयातुमुपचक्रमे वासुदेवः । तथा नाम समागच्छन्तं तं काचन कन्यका वीक्ष्य विवशहृदया तदीयसौन्दर्यगाढावगाढा लज्जाभयादिकमपि विहाय पार्श्वेऽवतस्थे । तदिदं तस्या जननी सानन्दमभिधत्ते । अश्रुतदृष्टचरसौभाग्यविशेषशोभनोऽयं महापुरुष इति विस्मयविवशतया पार्श्वेऽवस्थितां मम दुहितरं हंहो! वृथा ह्यपवदन्ति जनता इति ॥ ३३ ॥

४. हाहा नाहं कदापीदृशसुभगतनुं प्रेक्षिषीत्याह काचित्
नाहं चेदस्य भार्या न खलु मम भवेज्जीविताशेति काचित् ।
काचिद्रूतेस्म सोऽयं यदि मम भवनप्रान्तमायाति तर्हि
प्रोच्य स्तेयं परीत्य प्रसभमथ निरीक्षेय तद्वक्त्रहासम् ॥ ३४ ॥

तदात्वे काचन वनिता कथयत्येवम्— हा हा कदापि कुत्रापि नाहमेतादृशसौभाग्यशेवधिं दिव्यं पुमांसमवैक्षिषीति । अन्या पुनराचष्टे— यद्यसौ सुन्दरो मम पाणिं न गृह्णीयात्तर्हि नाहं जीवितं धारयेयमिति । अपरा पुनरभिदधाति— मदीयसदनसविधमेष दिव्यपुरुषो यदि समागच्छेत्तर्हि 'सोयमस्मदीयं कन्दुकं प्रसभमपजहार' ति मिथ्या प्रकथ्य स्तेयापराधमारोप्य तदा किंकर्तव्यतामुग्धतया ततो निर्गन्तुमप्रभवतस्तत्रैव तस्थुषस्तस्य मुग्धमधुरस्मितमभिवीक्षेयेति ॥ ३४ ॥

५. सर्वालङ्काररम्यस्सकलजनमनोहारिरूपोऽत्र गोपः
कश्चित्सोल्लासमायात्यमुमिह सुभगे! मा स्म दर्शः कथञ्चित् ।
इत्युद्घोषे कृते सत्यपि मम दुहिता तस्थुषी चत्वराग्रे
प्रापत्कार्श्यं क्षणेनेत्यचकथदतिनिर्वेदतः काऽपि वृद्धा ॥ ३५॥

अथ च काचन वृद्धा मुग्धा व्याहरति— 'सर्वप्रकारालङ्कारशोभनस्सकलजनहृदयहारिचारुरूपः कोऽपि गोपोऽस्यां वीथ्यां सोल्लासमागच्छति; अयि सुभगे! कथञ्चिदपि माद्राक्षीरमुममीक्षम् । यदि पश्येस्तर्हि नूनं त्वमपहृतसर्वस्वा भविष्यसि; अतश्च वर्तस्व जाग्रत्तया' इति मम दुहितरमुद्दिश्याहमुच्चैराक्रन्दम् । तदिदं मम वचनं श्रुत्वा गृहान्तरेव स्थातुमर्हन्ती सा प्रसभं बहिरागत्य तद्दर्शनैकहेवाकेन चत्वराग्रेऽवतस्थे; अथ च क्षणेन सा कशिमानमन्वभूत्तनौ हन्त स्वाभिलषिततत्संश्लेषहर्षप्रकर्षानवाप्तिवेदनया--- इति ॥ ३५॥

६. सालङ्कारं सवेणुध्वनिरचनमुपायाति कृष्णे सुता मे
तिष्ठन्त्यग्रेऽविवेकादभजत सहसा प्रच्युतिं कङ्कणानाम् ।
इत्यूचे काऽपि गोपीत्यतिमधुरवचोराशिभिर्गोपकन्या-
प्रेमावेशं मुकुन्दे विशदमभिदधद्विष्णुचित्तस्सुधन्यः ॥ ३६ ॥

अपरा च गोपी निजगादेवम्— सर्वालङ्कारसुन्दराङ्गः कृष्णकिशोरो मृदुमधुरवेणुनादेन सह सोल्लासमायातीति विज्ञाय मम तनया अविवेकभरेण अग्रतस्तिष्ठन्ती सती क्षणेन वपुषः कृशतामनुविन्दन्ती प्रच्युतकरवलया बभूवेति । इत्येवमेवमतिमधुरवाग्विन्यासैर्मुकुन्दे गोपाङ्गनानां प्रेमावेशमप्रमेयमभिहितवान् विष्णुचित्तस्सूरिरप्रतिमानुभवभूम्ना धन्यधन्यः ॥ ३६ ॥

३. — ५. * अट्टुक्कुविशोत्तु * [அட்டுக்குவிசோறு] (श्रीगोवर्धनाद्रिप्रशंसनम् ।)

१. प्रत्यब्दं गोकुले यद्भवति दिविषदां पत्युराराधनं तत्
दृष्ट्वा कृष्णः कदाचित्तदिदमनुचितं भूधरायैव देयम् ।
इत्युक्त्वा दापयित्वा तदखिलमुपभुज्याशु वृष्टिं गरिष्ठां
सुत्रामक्रोधसृष्टामरुणदनुपदं छत्रमद्रिं दधानः ॥ ३७ ॥

२. इत्युक्त्वा प्राज्यकीर्तिं दधतमनुपमं दिव्यगोवर्धनाद्रिं
स्तोतुं प्रक्रम्य नन्दात्मजहरिचरितं दिव्यभोग्यं प्रशंसन् ।
साक्षाद्दृष्टेव दिव्यं सुभगमनुभवं दिव्यसूक्त्या प्रयच्छन्
वेदान्ताम्भोधिमन्थाचल इव विलसन् विष्णुचित्तो गतिर्नः ॥ ३८ ॥

व्रजे चिरात् किमप्यनुष्ठानं प्रवर्तमानमासीत्— प्रतिशरदं शरद्वतौ देवेन्द्रस्य समाराधनमिति । तदर्थमेकैकगोपालगृहादपि नानाभक्ष्यवर्गसमन्वितो महानन्नराशिः शकटबृन्दतस्समूह्यमानो गोवर्धनाद्रिं नीयमानस्तत्र मघोने समर्प्यमाण आसीत् । एवं सति प्रचलति, कस्मिंश्चन संवत्सरे भगवान् वासुदेवः परमदैवतस्य

स्वस्याग्रतो देवतान्तरसमाराधनमेतत् अहह किन्नाम ! इत्यसहमान इव तत्प्रतिरोधकुतूहली सन् अपरिमितान्नराशिसंभरणसमुद्यतान् गोपवृद्धान् पप्रच्छ किमर्थमिहैवमन्नराशिस्समूह्यत इति । ते च प्रत्यूचुः— कृष्ण ! किं न जानासि त्वम् ? प्रतिसंवत्सरं च खलु एवमनुष्ठीयते । गोधननामस्माकं गवामभिवृद्धये घासवृद्धिरपेक्षिता ; तदर्थं च वृष्टिरावश्यिकी । तदधिपतिर्हि दिविषदां पतिः ; तस्यैवं समाराधनमस्माकं श्रेयसे भूयसे कल्पेत । अत एवैष आचारश्चिरादत्र प्रवर्तते— इति । अथैतदाकर्ण्य कृष्णः प्रोवाच— * यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति * इति हि श्रूयते । प्रत्यक्षदैवतमस्माकं ननु गोवर्धनाद्रिरसावेव । एष एव हि साक्षात् घाससलिलप्रदानेन पुष्णाति गोगणम् । तमेनं विहाय परोक्षदैवताराधनमन्याय्यं भोः । उपहारराशिरेष सर्वोऽपि समर्प्यतामस्मा एव गोवर्धनाचलतल्लजाय— इति । युक्तरूपमेवासौ कथयति कृष्ण इति प्रतियन्तो गोपवृद्धास्सर्वेऽपि ओमित्यङ्गीकृत्य तथैव समार्पिपन् । अथ क्रुद्धो वासवः पुष्कलावर्तकादिपर्जन्यगणान् नियुज्य सुमहत्तरवृष्टिबाधामुदपादयत् । गोगोपगोपीजनसङ्घये सुदुस्सहवृष्टिबाधयाऽनया भृशं विषण्णो भगवान् भक्तवत्सलो नन्दनन्दनः स्वयं यमबलं रक्षकमाचचक्षे पुरा, तेनैवाचलेन रक्षां विधित्सुः तमेव गोवर्धनाद्रिं छत्रमिवोद्धृत्य सप्तरात्रं बिभर्तिस्म । अथ भृशमपत्रपयाऽभिभूतो बिडौजा अपचारक्षामणेन पूतो बभूवेति सुप्रथित इतिहासः । एतत्कथाप्रपञ्चनपूर्वकं भगवन्तं कृष्णं गोवर्धनाद्रिं च दशकेनानेन परमभोग्यसूक्तिनिकरेण स्तुवन् वेदान्तमहोदधिमन्थने मन्दराद्रिरिव प्रथमानो विष्णुचित्तसूरिरस्माकं गतिः ॥ ३७ – ३८ ॥

३. —६ * नावलम्पेरिय * [நாவலம்பெரிய] श्रीकृष्णस्य वेणुनादवदग्ध्यवर्णनम् ।

१. श्रुत्वा कृष्णस्य वेणुध्वनिममृतमयं मेनकाद्यप्सरस्स्त्री-
संघो व्रीडाभिभूतो दिवि बत ! विजहौ स्वस्वकृत्यं विमोहात् ।
घासग्राही मृगौघोऽप्यचलितदशनो भित्तिचित्रायितोऽभूत्
वृक्षाश्चैतन्यभाजो मधु सुममकिरन् संगताः कृष्णपार्श्वे ॥ ३९ ॥

२. जम्बूद्वीपेऽद्वितीयाद्भुतमिदमहह ! श्राव्यमित्यच्युतस्य
श्रीकृष्णस्याप्रमेयं मधुरमुरलिकागानवैदग्ध्यमुक्त्वा ।
अस्मादृक्कर्कशान्तःकरणमपि जडीकुर्वता विष्णुचित्ते-
नात्यन्तश्लाघ्यवाचाऽस्म्यहमपि कलितस्साधुगोष्ठीं प्रविष्टः ॥ ४० ॥

दशकेऽस्मिन् मुकुन्दस्य मुरलीगानवैदग्ध्यमतिमात्रमनोहरमुपवर्ण्यते । * शैलोऽम्भश्च जलांबभूव मुनयो मूढांबभूवुर्जडाः प्राज्ञामासुरगास्सगोपममृतामासुर्महाशीविषाः । गोप्याद्यास्सहजां बभूवुरपरे त्वन्यांबभूवुः प्रभो ! त्वं तेष्वन्यतमां बभूविथ भवद्वेणुक्वणोन्मादने ॥ * [श्रीरङ्गराजस्तवोत्तरशतके] इति श्रीपराशरभट्टार्यसूक्तिरत्नेन वेणुनादवैभवमप्रमेयमवगन्तव्यम् । तादृग्वेणुनिनदमाकर्ण्य रम्भोर्वशीमेनकाद्यप्सरस्समुदयो दिवि लज्जाभिभूतो निजगाननर्तनादिकृत्यवर्गं मुमोच विमोहात् । घासग्रहणतत्परतया स्थितो हरिणवर्गोऽपि विस्मृतस्वकृत्यो भित्तिलिखितचित्रसधर्मा बभासे । वृक्षाश्च चैतन्यभाजः कृष्णपार्श्वे समुपसर्पन्तो मधूनि

कुसुमानि चावाकिरन् । एवंनाम कृष्णस्य अप्रमेयमत्यद्भुतमद्वितीयमतिमधुरमुरलीगानं जम्बूद्वीपवासिजनतानाम् अप्रतिद्वंद्विश्रोत्रभाग्यमिति अस्मादृशामतिकठोरतरं हृदयमपि जडीकुर्वतीस्सूक्तितती रनुगृहीतवता विष्णुचित्त-मुनिना साधुगोष्ठीं प्रवेशितोऽभूदसाधुरप्येष जनः ॥ [एतद्दशकफलश्रुतिगाथायामन्तिमायां "श्रीमत्कृष्ण-किशोरवेणुनिनदस्योक्तं त्विदं वैभवं ये ध्यायन्ति - भजन्ति शीतलगिरस्ते साधुगोष्ठ्यन्वयम्" इत्यभ्यधायि । अत एवोक्तमिह दासस्य साधुगोष्ठीप्रवेशरूपभाग्यभाक्त्वम् ॥] ॥ ३९ – ४० ॥

३. — ७. ❋ पेयपुळुदि ❋ [ஐயபுழுதி]

(स्त्रीभावं गतो विष्णुचित्तो जननीवाचा स्वदशां वक्ति ।)

अवतारिकात्मकः प्रथमश्लोकः

१. भक्तेः शृङ्गारवृत्त्या परिणतिरिह चेज्जायते तर्हि पुंस्त्व-
च्युत्या स्त्रीवेषधृत्या प्रकथनसरणिः काचिदन्यादृशी स्यात् ।
मातुः पुत्र्यास्सखीनामपि वचनमिषात् प्रेयसि श्रीसहाये
स्वप्रेमाविष्कृतिस्स्यात्, इह तु मुनिवरो गाहते मातृवेषम् ॥ ४१ ॥

२. विष्णौ प्रेमप्रकर्षादधिगतवनिताभावनः स्वामवस्थां
मातुर्वाचा विवक्षन् बत! मम दुहिता बालिकैव ह्यथापि ।
श्रीशे रूढानुरागा कथयति सततं तत्कथाः शङ्खचक्र-
व्यामुग्धा, किं नु कुर्यामिति विहितवचा विष्णुचित्तो गतिर्मे ॥ ४२ ॥

दशकेऽस्मिन् श्रीविष्णुचित्तसूरिर्भगवति स्वकीयमभिनिवेशातिशयं स्त्रीभावनया प्रथयति । श्रीशठकोप-मुनि-कुलशेखरसूरि–विष्णुचित्तयोगि–परकालसूरीणां दिव्यप्रबन्धेषु मध्येमध्ये स्त्रीभावनयाऽपि गाथा अवतरन्ति । दुहितृवाक्यम्, मातृवाक्यम्, सखीवाक्यमिति तत्रापि सन्ति तिस्रो विधाः । अत्र तु मातृवाक्यापदेशेन श्रीविष्णुचित्तनायिका स्वानुरागभरमाविष्करोति । विष्णुचित्तसूरिरिदानीं कन्यकास्थानमधितिष्ठति । अस्या जननी स्वदुहितृवृत्तं वक्तीति अनया प्रक्रियया दशकमिदं निबध्यते । एतदनन्तरदशकं चैतादृशमेव ॥

पुरुषपुंगवतयाऽ वतीर्णस्य सूरेरियं स्त्रीभावना किमर्थं जाता? कथं जातेति शङ्कायाः परिहारः अवतारिकात्मकेन स्वतन्त्रश्लोकेन क्रियते [❋ भक्तेरित्यादिना] भक्तिरेव कदाचित् शृङ्गारवृत्त्या परिणामं भजते । ततश्च पुंस्त्वप्रच्युतिपूर्वकस्त्रीभावधारणेन कथनं संपद्यते । सत्यमन्यादृशी सेयं वैखरी । एवंविधकथन-समये मातृवचनं पुत्रीवचनं सखीवचनमिति वचो भेदा भवन्ति । एतद्वचनत्रैविध्यं युगपदेव न भवेत् । कदाचिन्मातृवाक्यम्, कदाचन पुत्रीवाक्यम्, अन्यदा सखीवाक्यमिति समयभेदेन भवेत् । [वक्ता तु सूरिरेव ।] एतादृशोक्तिच्छलेन स्वप्रिये लक्ष्मीनाथे स्वकीयप्रेमभूमैव भृशमाविष्क्रियत इति वेदितव्यम् । अस्मिन् दशके तु विष्णुचित्तसूरिर्मातृभूमिकां बिभ्राणः तदुक्त्यपदेशेन भगवति वासुदेवे स्वकीयमवगाहनभरं विरहासहिष्णु-भावमन्यदन्यच्च प्रकटयति । विष्णुचित्ताभिधाना मम दुहिता यद्यपि बालिकैव तथाऽपि लक्ष्मीनाथे भगवति गाढरूढदृढानुरागा सन्ततं तस्यैव कथाः कथयति; तदायुधेषु शङ्खचक्रादिषु व्यामोहातिशयमाविष्करोति ।

अतिबाल्य एव एवं भगवद्विषये अतिमात्रप्रावण्यमावहन्तीमिमामधिकृत्य किमहं करवै ? इति जननीवचनविन्यासं वितन्वानो विष्णुचित्तो मुनिर्मम शरण्यः ॥४१–४२॥

३. — ८. * नल्लदोर्तामरै * [நல்லதோர் தாமரைப் பொய்கை] (इदमपि तथा ।)

पूर्वावस्थानुवृत्त्या पुनरपि वचसा मातुः–एनां मदीयां
पुत्रीं कृष्णो व्यमुष्णान्मम गृहमभवच्छोभया शून्यमेव ।
श्वश्रूस्सैनां यशोदा किमु बहुमनुते क्लेशयेद्वा न जाने
बाला दध्नो न मन्थे प्रभवति बहुधैवं ब्रुवन् सूरिरीड्यः ॥ ४३ ॥

जननीवचसा कथनमस्मिन्दशकेऽप्यनुवर्तते । पुनरपि माता कथयति । हन्त ! मदीयां दुहितरं कृष्णो मुष्णातिस्म । अतश्च हिमहतनलिनं सर इव मम गृहं नष्टशोभमभवत् । कृष्णेन गूढं नीता सैषा यशोदायाः स्नुषा समजनि । हन्त ! न जाने सा श्वश्रूर्यशोदा अलभ्यलाभात्मिकामिमां स्नुषां किमु सानन्दमुपलालयिष्यति ? आहोस्वित् गव्यमथनादिकृत्येषु प्रेरयन्ती क्लेशयिष्यति । अस्या मत्पुत्र्याः श्वश्रूगृहे तु गव्यसमृद्धेरभ्यधिकत्वात् तन्मन्थनं नक्तंदिवं च कर्तव्यं भवेत् ; अबला कृशाङ्गी मम सुता सौकुमार्यनिधिः कथमहो कठोरतरं तत्कर्म कर्तुं क्षमा ! – इत्येवमुच्चावचं मातृवाचा वदन् स्वात्मनः कृष्णपत्नीत्वं स्थापयन् विष्णुचित्तो मुनिवरोऽस्माकं स्तोत्रपात्रम् ॥

अस्मिन् दशके चतुर्थी गाथा रसघना; श्रीवत्साङ्कमिश्रे दिवं प्रयाते भगवान् रामानुजमुनिः तां गाथां संकीर्त्य प्रलपतिस्मेति पुराविदः प्राहुः । तस्या गाथाया विवर्तश्चेत्थम् ; –श्लोकः–

एकामेव सुतामजीजनमहं त्रैलोक्यपूर्णप्रथां
पुष्णामिस्म रमामिव, अहरदिमां रक्तान्तनेत्रस्स्वयम् ।
गाम्भीर्याढ्यकुटुम्बिनी जनितसत्पुत्रा यशोदाह्वया
दृष्ट्वा हृष्टमनाः स्नुषां, किमु करिष्यैवाहिकीः प्रक्रियाः ॥ इति ॥४३॥

३. — ९. * एन्नादननेविक्कु * [என்னாதன்தேவிக்கு]

(गोपीद्वयमूर्तिधृत्या नन्दनन्दनदशरथनन्दनकथानुवर्णनम् ।)

श्रीकृष्णस्यैव चेष्टाः कथयितुममितोत्साहभाकाऽपि गोपी
श्रीरामस्यैव चर्याः कथयितुमितरेत्येवमास्थाय गोप्योः ।
मूर्ती , कृष्णस्य रामस्य च मधुरकथाः पारिजातापहार-
श्रीपादूदानमुख्या अभिदधदतुलो विष्णुचित्तोऽभिनन्द्यः ॥ ४४ ॥

भगवतः कृष्णस्येव श्रीरामचन्द्रस्यापि शुभगुणाननुभवितुमुत्कण्ठा सुमहती समजायत सूरेः । तत्रापि

तयोरुभयोर्गुणान् युगपदेव भोक्तुमभिलाष उदजृम्भत । अत एव सूरिरुभयोर्गोपकन्यकयोर्भूमिकां परिगृह्य, एकस्या वाचा कृष्णगुणान् अन्यस्या वाचा रामगुणांश्च संकीर्तयन्ननवधिकमानन्दमनुभवति । दशकेऽस्मिन् प्रथम-तृतीय-पञ्चम-सप्तम-नवमगाथाः कृष्णगुणानुभवनिष्णातया गोपकन्यकाया वाचा निबद्धाः । द्वितीय-चतुर्थ-षष्ठाष्टम-दशमगाथास्तु रामगुणोपभोगनिरतया ललनाया वाचा निबद्धाः । जगति विवाहादिसमयविशेषेषु वनितास्संघीभूय मण्डलाकारेण करतालसनाथगानविशेषेण सह चरन्त्यो नृत्तविशेषमनुतिष्ठन्तीति सर्वत्र साक्षात्कारार्हमेतद्दक्षिणदेशेषु । एतादृशनृत्तविशेषकलनेन सह नन्दनन्दन-दशरथनन्दनयोर्गुणानुभवः प्रचलतीहेति वेदितव्यम् । कृष्णो भगवान् शचीपतेः प्रार्थनया नरकासुरं निहत्य, तेन पुराऽपहृतमिन्द्रस्य वस्तुजातमानीय तस्मै प्रदातुं सत्यभामया सह तार्क्ष्यमधिरुह्य देवलोकमुपाययौ । तत्र तु शची सत्यभामाया नानाविधानुपचारान् कृत्वाऽपि देवैकभोग्यताधिया पारिजातप्रसूनं तस्यै न प्रादात् । भामा तु पारिजाततरोः द्वारकां प्रति नयनमकामयत भर्तुस्सविधे । स तु तस्याः कामनां सपदि पूरयितुमिच्छुः कल्पद्रुममुत्खाय तार्क्ष्यस्कन्धे निधाय अथ योद्धुमागतमिन्द्राणीपतिं च कान्दिशीकमारचय्य द्वारकां निनायेति कथा प्रथिता । इमामाह प्रथमतः कृष्णगुणानुरक्ता कन्यका । अथ ताटकावध-परशुरामभङ्ग-वृत्तान्तावाह रामगुणाविद्धा । अथ शिशुपालभङ्गपूर्वकं रुक्मिणीपाणिग्रहणकथाम्, कैकेयीनिदेशावतंसनेन राज्यभरण-मुपेक्ष्य सानन्दं वनप्रवेशकथाम्, पाण्डवदूत्यभारतसमरनिर्वहणादिकथाम्, प्रणतभरतमकुटघटितपादुकाभिषेक-कथाम्, कालियमस्तककलितविचित्रताण्डवकथाम्, शूर्पणखाङ्गभङ्गकथाम्, शकटासुरभङ्ग-यमलार्जुनभञ्जन-गोरक्षण-वेणुनादकथाम्, सेतुबन्धन-रावणमारण-विभीषणाभिषेचनकथाश्च क्रमशः कथयामासतुरुभे कन्यके इति अनया प्रणाल्या निबद्धमिदं दशकं भगवद्गुणविद्धभक्तजनभागधेयपरिपाकात्मकं वेदितव्यम् । एवंनाम दिव्यानुभूतिनिष्णातो विष्णुचित्तसूरिरतितरामभिनन्दनार्हः परमभागवतानाम् ॥ ४४ ॥

३. — १०. * नेरिन्दकरुङ्कुलल् * [நெறிந்தகருங்குழல்]

(सीतादेवीसकाशे अभिज्ञानविज्ञापकहनुमद्वाचा श्रीरामकथाविशेषानुसन्धानम् ।)

लङ्कायां जानकीं प्राक् पवनसुत उदीक्ष्यात्मनो रामदूती-
भावप्रत्यायनार्थं रघुवरकथितास्ता अभिज्ञानवाचः ।
विज्ञाप्य क्रोधरामे मदशमनमुखाः, रामनामांगुलीयं
दत्वा प्राहर्षयच्चेत्यभिहितवति मे विष्णुचित्ते दृढा धीः ॥ ४५ ॥

प्राक्तनदशके युगपद्रामकृष्णगुणानुभवतो हर्षप्रकर्षमनुभूतवान् सूरिवरः अथ भगवतो दशरथात्मजस्य परं गुणाननुबुभूषुः रावणेनापहृतामशोकवने स्थितां भगवतीं जानकीमभिवीक्ष्य अभिज्ञानानि विज्ञापितवतो हनुमतो वाचा रामचरितानि प्रथयन् दशकमिदं निबध्नाति । सीतापाणिग्रहसमनन्तरं परशुरामभङ्गतःप्रभृति-मारीचमायामृगाक्रन्दितश्रवणेन लक्ष्मणप्रस्थानपर्यन्तं कथाजातमभिज्ञानत्वेन विज्ञाप्य रामनामाङ्कितमङ्गुलीयकं च ददौ वायुसूनुः ; तच्च सीता सादरं स्वीकृत्य शिरसि निधाय निरवधिकमानन्दमन्वविन्दतेति कथनमस्मिन्दशके

रामचन्द्रदिव्यगुणानुभवात्मकमवसेयम् । मध्ये काकासुरनिग्रहानुग्रहकथाऽपि (षष्ठगाथायां) विज्ञाप्यते हनुमता । यद्यपि श्रीरामायणे सेयं काककथा सीतादेव्या हनुमते कथितेत्यवलोक्यते, तथापि न क्षतिः; अयं कोऽपि विलक्षणोऽनुभवप्रकार इति । एवंनाम हनुमद्वाचा रामगुणानुभवनिष्णाते भगवति विष्णुचित्ते मम धीरतिदृढा ॥४५॥

॥ इति तृतीयं शतकं समाप्तम् ॥

४. – १. * कदिरायिरमिरवि * [கதிராயிரமிரவி]

(भगवदन्वेषणपूर्वकं तत्सेवितत्वकथनेन विलक्षणानुभवप्रथनम्) ।

भास्वत्सूर्यायुतश्रीरुचिधरमकुटः पञ्चहेतीविभूषो
रामो न्यग्रोधपत्रे विरचितशयनः केशवो मृग्यते चेत् ।
प्रह्लादस्तूयमानः पशुपतिधनुरुद्भञ्जनः सेतुकारी
संदृष्टोऽद्यैव धन्यैरिति कलितवचा विष्णुचित्तो गतिर्नः ॥ ४६ ॥

एक एव सर्वेश्वरो मत्स्य-कूर्म-वराह-नरहरि-वामन-राम-कृष्णादिनानात्मनाऽवतरति, धर्मी त्वेक एवेति तादात्म्यप्रथनेन विलक्षणमनुभवं विरचयितुकामो विष्णुचित्तसूरिरधुना युगपन्मूर्तिद्वयं स्वयं बिभ्राणः एकया मूर्त्या भगवदन्वेषणरसमनुभवन् अपरया च मूर्त्या अमुत्र भगवानेवंविधो दृष्ट इति तद्दर्शनानन्दरसानुभवं प्रथयन् दशकमिदं विलक्षणवैखर्या निबध्नाति । उद्यद्भानुसहस्रभास्वरकिरीटधारी भगवान् रामचन्द्रः कच्चित्त्वयालोकीति गवेषणमिव पूर्वार्धे । दृष्टो ननु स भगवान् हिरण्यकशिपुवक्षःकवाटविदारणः प्रह्लादेन स्तूयमान इति प्रत्युत्तरार्पणमुत्तरार्धे । रथाङ्गशंखासिगदाशार्ङ्गभूषितपाणिर्भगवान् किमु दृष्ट इत्यन्वेषणमिव पुनः पूर्वार्धे । ननु दृष्टोऽधुनैव जनकराजसभायां पाशुपतं धनुर्भञ्जयन् सीतां परिणयन्निति प्रत्युत्तरविज्ञापनमुत्तरार्धे । प्रलयापदि सर्वमपि जगन्निगीर्य नैयग्रोधे दले कृतशयनो भगवान् किमालोकित इति प्रश्न इव पूर्वार्धे । नन्विदानीमेव दृष्टस्स भगवान् नीलादेवीपाणिग्रहणकृते सप्तवृषभौद्धत्यविध्वंसनेन श्रान्ततनुः कृष्ण इति कथनमुत्तरार्धे । कुवलयापीडाख्यमत्तवारणदर्पवारणसप्तसालभेत्ता भगवान् कच्चिद्दैक्षीत्यनुयोग इव पूर्वार्धे । नन्वद्यैव सेवितो वानरवीरेषु किंकुर्वाणेषु सेतुबन्धनसमुत्सुकस्सागरतीर-मध्यासीनस्स हरिरिति प्रबोधनमुत्तरार्धे । इत्येवमेवमतिविलक्षणप्रक्रियया वाचं विन्यस्यन् विष्णुचित्तो मुनिरस्माकं गुरुः ॥४६॥

४. – २. * अलम्बावेरुट्टा * [அலம்பாவெருட்டா] वनगिरिक्षेत्र (तिरुमालिरुञ्जोलै) प्रशंसनम् ।

लोकप्रध्वंसिरक्षोगणहननपटोरिन्द्रपूजानिरोद्धुः
हस्तित्रातुश्च हस्तिक्षपणकृतधियो वारुणास्त्रप्रयुक्त्या ।

पार्थाश्वप्रीणनस्य स्थितिमतिविभवां बिभ्रति श्रीवनाद्रौ
प्रेमाणं निस्समानं दधदमृतवचा विष्णुचित्तो हि वन्द्यः ॥ ४७ ॥

दशकद्वितयेन श्रीवनाद्रि [तिरुमालिरुञ्शोलैनामकश्रीसुन्दरबाहुभगवदभिव्यक्तिस्थल] प्रशंसा क्रियते । तत्रेदं प्रथमं दशकम् । अयं श्रीवनाद्रिस्सुन्दरभुजस्य भगवतः अतिशयितविभवां स्थितिं बिभर्ति । स भगवान् कीदृशः? सकलजगत्प्रध्वंसनैकप्रवणखरदूषणदशवदनकुम्भकर्णादियातुधानबृन्दनिर्मूलनविचक्षणः, व्रजे चिरात्प्रवृत्तामिन्द्रपूजां निरुध्य तां गोवर्धनमहीध्रे प्रवर्तितवान्, ग्राहग्रस्तगजेन्द्रार्तिहारी, कंसप्रचोदित-कुवलयापीडाख्यमातङ्गमदमर्दननिर्दयः, वारुणास्त्रप्रयोगतः कान्तारेऽपि कर्कशे जलवार्तादरिद्रे सलिलमुद्भाव्य पिपासितपाण्डवाश्वपिपासाशमनं कृतवान् । एतादृशप्रभावशालिना भगवताऽधिष्ठिते श्रीवनाद्रौ निस्तुलां भक्तिसम्पदं दधानो विष्णुचित्तो मुनिरेवास्मादृशां वन्द्यः ॥ ४७ ॥

४. – ३. * उरुप्पिणिनङ्गैय * [உருப்பிணிநங்கையை] (इदमपितथा)

रुक्मिण्यां गाढरूढप्रणयभरितहृत् कालियादिप्रहर्ता
विध्वस्तक्षोणिपुत्रो बलिजभुजवनच्छेदनश्चैद्यहन्ता ।
पाञ्चालीसूत्ररक्षी दशवदनमदध्वंसनो यत्र रागी
सोऽयं श्रीकाननाद्रिश्शरणमिति वदन् विष्णुचित्तोऽवतान्नः ॥ ४८ ॥

श्रीवनाद्रेरेव प्रशंसने द्वितीयमिदं दशकम् । गिरिवरेऽस्मिन्ननुरक्तो भगवान् श्रीमत्यां रुक्मिणीदेव्यां गाढानुरागभरितहृदयः, कालिययमलार्जुनधेनुकादिहननविख्यातः, नरकासुराभिधानस्य क्षोणीपुत्रस्य विध्वंसने विशारदः, बाणासुरबाहुवनच्छेदनचतुरः, शिशुपालनिहन्ता, द्रौपदीमङ्गलसूत्ररक्षणदक्षिणः, दशवदनमद-मर्दनश्च । एतादृशप्रभावशालिना भगवताऽलंकृतो वनाचल एवास्माकं गतिरिति निगदन् विष्णुचित्त एव सूरिरस्माकं गतिः ॥ ४८ ॥

४. – ४. * नावकारियम् * [நாவகாரியம்] श्रीगोष्ठीपुरवास्तव्यभागवतप्रशंसनम् ।

क्षुद्रस्तोत्रं मृषोक्तिं परनरपरिवादं च ये नाद्रियन्ते
येषां दुर्भिक्षकालेऽप्यतिथिजनसमाराधना निस्समाना ।
तैराढ्ये तन्निकाय्यप्रचुरमणिरुचिमोज्ज्वले दिव्यगोष्ठी-
क्षेत्रे दीव्यन्तमीशं स्तुवति मुनिवरे विष्णुचित्ते स्तुतिर्मे ॥ ४९ ॥

पाण्ड्यमण्डले तिरुक्कोट्टियूर्नाम्ना प्रसिद्धं श्रीगोष्ठीपुरमधिवसतां भागवतानां प्रशंसनमुखतस्स एव दिव्यदेशोऽनुभूयते सूरिवरेण । अत्रत्याः श्रीवैष्णवाः कीदृशाः? क्षुद्रपुरुषार्थलिप्सया क्षुद्रनरप्रशंसनम् अनृतभाषणम् इतरजनदूषणं चेत्येवंविधानां वाग्दुरितानां वैदेशिकाः, दुर्भिक्षकालेऽप्यतिथिसत्कारे अतीव सक्ताः ।

एवंविधप्रभावभासुरैर्भागवतैराढ्यमिदं क्षेत्रम् । तेषां भागवतानां भवनेषु दिव्येषु भासमानानां मणीनां प्रभया प्रोज्ज्वलं च । एवंविधे दिव्यगोष्ठीपुरे विभ्राजमानं सौम्यनारायणं भगवन्तं स्तुवतो विष्णुचित्तस्य मुनिवरस्य विषये मम स्तुतिरस्तु ॥४९॥

४.–५. * आशैवाय्च्चेन्र * [ஆசைவாய்ச்சென்ற]

(सांसारिकपाशबन्धनिन्दनपूर्वकं भगवत्प्रेमप्रशंसनम् ।)

माता मे मे कलत्रं मम सुत इति दुर्वासनामूलतृष्णाः
नित्यं संवर्धयन्तो मृतिमियुरिह ये ते विषीदन्ति हन्त ।
हृद्देशे स्थापयित्वा मुररिपुमनघप्रेमपुष्पार्चनाभिः
ये तं संमोदयन्ते त इह सुखपरा इत्युशन् सूरिरीड्यः ॥ ५० ॥

दशकेऽस्मिन् भगवत्सेवाभिमुखानां प्रशंसनम्, तद्विमुखानामुपालम्भश्च प्रचलतः । ये खलु पामरा यावज्जीवं पुत्रकलत्रादिष्वेव ममकारमतिमात्रं वहन्तस्सन्तो दुर्वासनामूलतृष्णास्सततं संवर्धयन्तो म्रियन्ते कदाचन, अथ ते नानाविधा यातनाः प्राप्य भृशमवसीदन्ति — इति अभागवतनिन्दनम् । ये तु हृदयाभिधाने दिव्यदेशे माधवाभिधानं दैवतं प्रतिष्ठाप्य प्रेमाभिधानपुष्पार्चनाभिस्तत्प्रीणननिरता भवन्ति ते तावदत्रामुत्र च शाश्वतसुखशालिनो भवन्तीति भागवतानां प्रशंसनं च कलयन् भट्टनाथस्सूरिवरोऽस्माकमीड्यः ॥ ५० ॥

४. – ६. * काशुम्करैयुडै * [காசுங்கறையுடை]

(भगवन्नाम्ना नामकरणमेव सर्वेषां श्रेयस्करमिति कथनम् ।)

ते ते स्वात्मीयपुत्रान् धनवसनमुखक्षुद्रवस्त्वीप्सयैव
क्षोदिष्ठैर्नामधेयैर्विदधति सहितान् तत्तु हेयं विगेयम् ।
भिक्षाचर्याऽपि वा स्यात् मधुमथनहरेर्दिव्यनामैव धार्यं
सर्वैरित्युद्गृणानो मम हृदि नियतं विष्णुचित्तो विभाति ॥ ५१ ॥

जगति जातानां शिशूनां नामकरणसंस्कारं कुर्वन्तः पितरो धनपालनरपालचन्द्रेन्द्रादिनामानि कुर्वन्तीति प्रसिद्धमिदं ननु । तादृशेभ्यो मधुरतर उपदेशो दीयतेऽनेन दशकेन । भो भो जनाः यूयं स्वापत्यानि क्षुद्रनामधारीणि कलयथ खलु । तदिदं न स्वयंप्रयोजनतया, नाप्यामुष्मिकफलविशेषलिप्सया । अपि तु कतिपयकाकणिकानामशनाच्छादनादीनां च लाभमेवाभिलष्य । हा हन्त! ईदृशाभिलाषविवशानां युष्माक-मविवेको हि भृशं शोचनीयः । एवं क्षुद्रफलकामनया क्षुद्राणि नामानि कुर्वन्तो यूयं यदि भगवतोऽच्युतस्य केशवस्य श्रीधरस्य पुण्डरीकाक्षस्य माधवस्य गोविन्दस्य दामोदरस्य नीलमेघनिभस्य नारायणस्य श्रीपतेर्नामानि दिव्यानि स्वस्वापत्येषु समाद्रियध्वे तर्हि नूनमत्रामुत्र च श्रेयो भूयो भवेद्वः । भगवन्नामशून्या अत्र दारिद्र्यमेव

फलति, न पुनरन्यदित्यपि कामं भवतु; भिक्षाचर्ययाऽपि कुक्षिपूरणं कामं युक्तं वः । सर्वथाऽपि स्वरूपविरुद्धनामकरणं तु हेयं विगेयमेव । नरकनाशकभगवन्नामकरणमेव नरकबाधानिवारणक्षमं पित्रोः – इति स्वादिष्ठमुपदिशन् विष्णुचित्तस्सूरिरन्तरङ्गे मम विराजते ॥ ५१ ॥

४. – ७. * तङ्गैयै मूक्कुम् * [தங்கையை மூக்கும்] देवप्रयागक्षेत्रकीर्तनम् ।

गङ्गा गङ्गेति वाचा दुरितमखिलमप्याशु हन्त्र्याः प्रतीरे
भागीरथ्या निवासं विदधतममरैश्शम्भुमुख्यैर्नतांघ्रिम् ।
श्रीखण्डाभिख्यपुर्या अधिपमधिगुणं दैत्यरक्षोगणघ्नं
संसेव्य प्रीतचित्तो विलसतु हृदये विष्णुचित्तो मदीये ॥ ५२ ॥

श्रीबदरिकाश्रममार्गे विराजमानं देवप्रयागक्षेत्रमेव * कण्डमेन्नुम्कडिनगरिति द्राविड्या व्यपदिश्यत इत्याहुरार्यवृद्धाः । श्रीखण्डक्षेत्रमिति संस्कृतनाम । तत्र श्रीपुरुषोत्तमनामा भगवान् भागीरथीतीरे दिव्यदर्शनप्रदानेन भक्तान् प्रहर्षयति । तदेतद्दिव्यक्षेत्रमनेन दशकेन स्तूयते । यत्र कुत्रापि पल्वले कूपे वा स्नानमाचरन्तोऽपि जना यदि गङ्गा गङ्गेति कीर्तयेयुः तावन्मात्रेणापि तदीयाशेषपापप्रणाशो भवतीति नातिशयोक्तिः । तादृशप्रभावशालिन्या गङ्गासरितस्तीरे नित्यसन्निधिमाकलयन्तं विधिशिवादिदिविषन्निषेवितं दैत्यरक्षोगणनिर्मूलनविचक्षणं श्रीखण्डपुराधिनाथम् अप्रमेयगुणगणं भगवन्तं संसेव्य संप्रीतस्वान्तो विष्णुचित्तसूरिरस्मदीये हृदये विराजताम् ॥ ५२ ॥

४. – ८. * मातवत्तोन् * [மாதவத்தோன்] श्रीरङ्गधामस्तवः ।

सान्दीपन्यात्मजन्मानयनमथ परीक्षित्समुज्जीवनं च
श्रीवैकुण्ठाच्चतुर्णां द्विजतनुजनुषामाहृतिश्चेत्यमूनि ।
अन्यान्याश्चर्यकृत्यान्यपि च कृतवता माधवेनातिदीव्यत्
श्रीरङ्गं स्तोत्रपात्रं विदधदनघवाग्विष्णुचित्तो गतिर्नः ॥ ५३ ॥

अथ त्रिषु दशकेषु श्रीरङ्गधामाभिष्टूयते । तन्नदमादिमं दशकम् । अवन्तिकायां सान्दीपनिमुनिसकाशे बलभद्रेण सह चतुष्षष्टिकलाध्ययनसमापनसमनन्तरं तदपेक्षानुरोधेन प्रभासघट्टे द्वादशहायनतः पूर्वं प्रमीतस्य तदीयपुत्रस्य तथैव समानयनम्, प्रसूतिगृहप्रमीतात्रिचतुरापत्यकतया सुबहु निर्विण्णस्य कस्यचन ब्राह्मणस्य निर्वेदप्रशमनार्थं लीलायै श्रीमहालक्ष्म्याऽपहृतानां तस्या उपलालनसुखमनुभवतां च तेषामपत्यानां धाम्नो निजात्समानीय प्रदानम्, भारतसमरे अपाण्डवास्त्रप्रयोगतः प्रभ्रंशितस्य उत्तरागर्भपिण्डस्य समुज्जीवनं चेत्यादीनि भूयांस्याश्चर्यचेष्टितानि कृतवता भगवता विराजमानं श्रीरङ्गदिव्यक्षेत्रं स्तुतवान् परमपवित्रवाग्विष्णुचित्तो मुनिवरोऽस्माकं गतिः ॥ ५३ ॥

४. – ९. * मरवडियैत्तम्बिक्कु * [மாவடியைத்தம்பிக்கு] इदमपि श्रीरङ्गस्तवनम् ।

वात्सल्यं भक्तवर्गे निरतिशयमिह ख्यापयन् भक्तरक्षो-

ऽध्यक्षे स्वं पक्षपातं निरवधिमुपसंदर्शयन्, दुष्टवर्गम् ।

कुर्वन्निर्मूलमुच्चैः करिवरविपदुद्ध्वंसिचक्रस्स देवः

श्रीरङ्गे सेवनीयो भवगदभिषगित्यूचिवान् सूरिरीड्यः ॥ ५४ ॥

प्राग्रामावतारकाले भरतविभीषणादिभक्तवर्गे यो वात्सल्यभरः पक्षपातातिशयश्च प्रादर्शि, तमद्याप्यर्चा-वतारेऽप्यत्र संदर्शयन् दुष्टवर्गनिर्मूलनमतितरां कुर्वन् गजेन्द्रापन्निवारणविचक्षणहेतिराजधारी संसारव्याधिहारी च स भगवान् देवदेवः श्रीरङ्गधाम्नि संसेवनीय इत्यभिहितवान् विष्णुचित्तसूरिरस्माकमीड्यः ॥

अस्मिन् दशके द्वितीयगाथा संप्रदायरसिकैर्महात्मभिर्विशेषत आद्रियते ; तदनुवादश्चेत्थम् ; —

स्वभक्तविषये रमाऽप्यभिदधाति चेद्दूषणं मदीयजनता रमे विरचयेन्न तादृक्कृतिम् ।

यदि व्यरचयद्ध्रुवं सुकृतमेव तच्चक इत्युशन्निव विभीषणप्रवणदृक् स रंगी गतिः ॥ इति ।

अत्रेदमवधेयम् । श्रियःपतिर्भगवान् स्वयं परमकारुणिकोऽपि सन् तत्तदपराधानुरूपदण्डधरत्वभूम्ना प्रणतानपि चेतनान् अनिष्कृतभूयिष्ठापराधान् अङ्गीकृत्य रक्षितुं न प्रभवति । तदात्वे कारुण्यरूपिणी नित्यमज्ञात-निग्रहा अनुग्रहमयी संमन्दितजगद्धिता च देवदेवदिव्यमहिषी श्रीमहालक्ष्मीः * किमेतन्निर्दोषः क इह जगतीति त्वमुचितैरुपायैर्विस्मार्य स्वजनयसि माता तदसि नः * [श्रीगुणरत्नकोशे] इत्युक्तरीत्या घटककृत्यं कुर्वती कथमपि घटयति सापराधानपि चेतनान् प्रणत्यभिमुखान् भगवता सह । तादृशलक्ष्मीपुरुषकारबलोत्तम्भितगुणविशेषो भगवानपि तांश्चेतनान् सुदृढं स्वीकरोति । अथ च सा लक्ष्मीः 'मन्नाथेन कृतोऽयमङ्गीकारः किं मदीयनिर्बन्ध-मूलकः ? उत स्वकीयसुदृढप्रेममूलक एव ?' इति परीक्षणार्थं कांश्चन दोषानाचष्टे तेषु चेतनेषु ये पुरा स्वात्मना स्वीकारिताः । 'भगवन् ! भ्रमतः प्रमादतो वा मयाऽमीषां चेतनानां विषये घटककृत्यं कृतमभूत् गुणोदाहरण-पूर्वकम् । अथ विमर्शे कृते दुष्टा एवामी न स्वीकारार्हा इति प्रतिभाति । तत् त्यज्यन्तामेते' इति प्रच्यावयितुमिव प्रयतते । तदा भगवान् प्रतिवक्ति — 'इन्दिरे ! त्वद्भक्ताः कदाचन दुष्टा अपि स्युः ; मद्भक्तास्तु न कदाऽपि तादृशास्स्युः' इति । पुनरपि रमा भर्तुरध्यवसायदृढिमानं जिज्ञासमाना चेतनदौष्ट्यं सुदृढं ब्रवीति । तदा माधवः प्राह * यद्यमी कृतदोषास्स्युः कृतसच्चरिता इति । इत्येवंविधो रमामाधवसंवादविशेषः कोऽपि निबद्धोऽस्ति द्वितीयगाथाया अस्याः पूर्वार्धे । एतेन संवादेन भगवतो वात्सल्यातिशयः अप्रकम्प्यभक्तानुग्रह-महिमा च प्रकाश्यते । दोषेष्वपि गुणत्वबुद्धिरेव वात्सल्यमिति पूर्वाचार्या निरणैषुः । तमिमं निर्णयं श्रुत-प्रकाशिकाचार्याः शरणागतिगद्यव्याख्याने श्रीभाष्यश्रुतप्रकाशिकायां च सुव्यक्तमनुजगृहुः । सत्संप्रदायपरम्परया सदाचार्यसकाशे सदर्थग्रहणभाग्यविकला अर्वाचीना भगवल्लोकाचार्यवरवरमुनीन्द्रादिदिव्यसूक्तिष्विव श्रुतप्रकाशिका-कृद्भट्टपाददिव्यसूक्तिष्वपि विद्वेषं वहन्तस्तद्दूषणे बद्धपरिकरा भवन्तीति स्थितम् । भगवतो यथापराधदण्डस्य चेतनानां दोषेष्वपि गुणत्वबुद्धिर्भवतीति चेत् भगवान् दोषभोग्य इत्युक्तं भवति । एतत्तु न साधु । अस्मदीयान् दोषान् भगवान् भोग्यतया पश्यतीति जानन् सर्वोऽपि जनो बुद्धिपूर्वमेव सततं दुरिताचरणेषु समुत्सुकस्स्यात् ;

शास्त्रपद्धतिरेव ततस्समुच्छिन्ना स्यात् । पापिनामेव जगति भृशमभिनन्दनीयता स्यात् इत्यादिचोद्याविष्करणेन प्रकृतगाथार्थम् एतदनुसारिणीं श्रुतप्रकाशिकाचार्यफणितिं च दूषयन्ति परे । तत्प्रतिक्षेपदक्षास्सिद्धान्तवादाश्चैवमिह वेदितव्याः ; — भगवतः कल्याणगुणास्सन्ति भूयांसः । तेषां लक्ष्यभूताश्चेतनाः के ? इति तु न कोऽपि ज्ञातुमीष्टे । * नासौ पुरुषकारेण न चाप्यन्येन हेतुना । केवलं स्वेच्छयैवाहं प्रेक्षे कञ्चित्कदाचन * इत्यूचुषा भगवता कदा को वा चेतनो विषयीक्रियेतेति सत्यं न कोऽपि वेद । यदा कदाचन कस्मिंश्चन व्यक्तिविशेषे तस्य वत्सलस्य हरेः प्रेमपूर उद्वेलं प्रसर्पति चेत् तदा स भगवान् तस्य पुंसो दोषानपि गुणतया भावयन् अत्यर्थप्रीतिमात्मनः प्रख्यापयतीति हि सिद्धान्तिभिरभिधीयते । एवञ्च सति बुद्धिपूर्वक साभिनिवेशञ्च पापाचरणमापद्येतेत्यापादनं सर्वात्मनाऽप्यप्रसक्तम् । भगवतः प्रेमा मय्येव प्रसरिष्यतीति पूर्वतो विज्ञाते सति हि कस्यचन पापाचरणौत्सुक्यं जायेत । गुणस्वरूपकथनमात्रेण आपत्तिर्भवेदित्यापादनं हि न स्थाने । तथा सति भगवतः क्षान्तिं नाम गुणमधिकृत्याप्येवमापादनमनिवार्यमेव स्यात् । क्षान्तिशीलस्य भगवतो दण्डधरत्वं नैव भविष्यतीति निश्चयेन स्वच्छन्दं पापाचरणप्रवृत्तयः कथं नु जगति वार्यन्ताम् । अथ भगवतः क्षान्तिरपि नास्तीत्येव परैर्वक्तव्यं स्यात् । यथापराधदण्डत्वमेकमेव भगवतो गुण इति परैराश्येयं स्यात् । * वैषम्यनैर्घृण्ये न सापेक्षत्वादिति सूत्रानुग्रहश्च तत्र भविष्यति । वात्सल्यं नाम गुणविशेषं प्रत्येकशोऽनुभवतां दिव्यसूरिवराणामाचार्यवर्याणां च श्रीसूक्तय एव नः शरणम् । प्रकृतगाथायां निबद्धे रमामाधवसंवादे विशिष्यावधेयोऽन्योऽपि कश्चन विषयोऽस्ति । प्रथमतो लक्ष्मीः प्राह, संप्रति भवता स्वीकृता अमी चेतना दुष्टा इति । तत्रोत्तरमुक्तं भगवता, न कदाऽपि मद्भक्तास्तथाविधास्स्युरिति । पुनरपि साग्रहमाह पद्मा दुष्टा एवामी इति । तदा तु भगवता कथितं तर्हि दोषभोग्यो भवानीति । इति तावत्संवादसंदर्भो वर्तते । तर्हि दोषभोग्यो भवानीति भगवता यदुक्तमिहान्ततः, तत्प्रथमत एव कुतो नोक्तम् ? यदा लक्ष्मीश्चेतनदोषकथने प्रवृत्ता तदैव दोषभोग्योऽहमिति कथनं प्राप्तावसरं खलु । तदा तु नैतदुक्तम् । मद्भक्ता नैव दुष्टास्स्युरित्येव तदा प्रोचे भगवान् । पुनरपि साग्रहं रमया दोषवत्त्वे कथिते, तर्हि दोषभोग्यो भवानीति प्राह हरिः । किमत्र कारणमिति च विवेचनीयम् । इदमत्र वेदितव्यम् । भक्तानां दोषाचरणं वर्जनीयमेव सर्वथेति शास्त्रार्थस्यापि प्रकाशनीयतया तत्प्रकाशनतात्पर्येण प्रथमतः 'मद्भक्ता नैव दुष्टास्स्युः' इत्यभिदधे । प्रामादिकेष्वगतिकेषु वा सत्स्वपचरितेषु, न मे दोषबुद्धिरुदियादिति स्वकीयगुणविशेषस्यापि प्रकाशनीयत्वावश्यंभावेन परस्तात् तर्हि दोषभोग्यो भवानीत्यभिदधे इति । अथ च गाथाया उत्तरार्धे प्रस्तुतो विभीषणपक्षपातोऽपि विशिष्यावधेयः । * निवेदयत मां क्षिप्रं विभीषणमुपस्थितम् । सर्वलोकशरण्याय राघवाय महात्मने * इत्युपनतं विभीषणमधिकृत्य दुष्टत्वादसौ परित्याज्य इत्यभिप्रेतवतां सुग्रीवप्रमुखानां मतमिव अदुष्टत्वादेष परिग्राह्य इति मारुतेरपि मतमवधीर्य * दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितमिति हि कथयामास राघवः । मारुते ! दोषो नास्त्यस्मिन्निति कथनं किमर्थम् ? अस्तु नाम कामं दोषः । स्वगुणातिशयसिद्ध्ये तदन्वेषणतत्परस्य मम दोषाः किं हेयास्स्युः ? इत्याशयमाविष्कृतवतो भगवतो विश्रृङ्खलविसृत्वरं वात्सल्यं को निरोद्धुं क्षमः ? अस्मदीयायां वात्सल्यार्थप्रकाशिकायां [श्रुतप्रकाशिकारक्षायाम्] सुविशदमिमे विषया अनुसन्धेया इति कृतमिह विस्तरेण ॥ ५४ ॥

४. – १०. * तुप्पुडैयारै * [துப்புடையாரை] (नरकयातनानिवृत्तये श्रीरङ्गनाथप्रपदनम् ।

प्राणान्ते दुर्गतौ या अहह बहुविधा यातनास्संभवित्र्यः
तास्सोढुं नाहमर्हः पटुतरकरणैस्सांप्रतं नाथ ! सर्वम् ।
कैङ्कर्यं ते क्रियासं प्रणिदधदखिलं चैतदात्मीयचित्ते
श्रीरङ्गाध्यक्ष ! रक्षेत्यभिदधदनिशं मे गतिर्विष्णुचित्तः ॥ ५५ ॥

जगति संसारिणां सर्वेषामपि शरीरवियोगसमये यमकिङ्करबाधा बलवती भवतीति प्रसिद्धमेतत् । तदनुचिन्त्य दूयमानस्सूरिवरोऽसौ, * स्थिते मनसि सुस्वस्थे शरीरे सति यो नरः । धातुसाम्ये स्थिते स्मर्ता विश्वरूपं च मामजम् ॥ ततस्तं म्रियमाणं तु काष्ठपाषाणसन्निभम् । अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥ * इति वराहचरमश्लोकं चानुसन्दधानः पटुतरकरणत्वावस्थायामस्यामेव श्रीरङ्गनाथ भगवन् ! ते सर्वविधं कैङ्कर्यं करवाणि ; एतत्सर्वं भवान् स्वकीयचित्ते निदधानस्सन् यथाऽहं न परितापभाग्भवेयं तथा करोत्विति प्रार्थयमानो विष्णुचित्तो मुनिर्मम सदा शरण्यः ॥

यद्यपि * स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले । परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ * कमलनयन वासुदेव विष्णो धरणिधराच्युत शङ्खचक्रपाणे । भव शरण-मितीरयन्ति ये वै त्यज भट दूरतरेण तानपापान् * इत्यादिप्रमाणवृन्दानुसन्धाननिष्कलङ्कान्तरङ्गस्य मुनिवरस्यास्य यमकिङ्करयातनानुसन्धानप्रसक्तिरेव नास्ति, तथाऽपि प्रकृतिमण्डलेऽस्मिन्नवस्थानपर्यन्तमतिशङ्कानुवृत्ते-रवर्जनीयत्वात् प्रार्थना सेयं युज्यत इति वेदितव्यम् ॥ ५५ ॥

इति श्रीभट्टनाथसूरिसूक्तसर्वस्वे चतुर्थं शतकं समाप्तम् ॥

நான்காம் பத்து முற்றிற்று.

अथ पञ्चमं शतकं प्रारभ्यते ॥

(पञ्चमं शतकमिति व्यपदेशमात्रम् । चत्वार्येव दशकान्यत्र सन्ति ॥)

५. – १. * वाक्कुत्तूय्मै * [வாக்குத்தூய்மை]

(भगवत्सविधे अनन्यप्रयोजनकैङ्कर्यरुचिविज्ञापनम् ।)

नाहं त्वां स्तोतुमर्हाम्यतिमलिनवचाः किं तु जिह्वा न वेद
त्वत्तोऽन्यं, तत्प्रणौमि प्रणतवश हरे वाचि दोषान् क्षमस्व ।
नैवान्नं वस्त्रमिच्छाम्यहमिह, सुलभं तत्तु सर्वत्र नाथ !
त्वद्दास्यं कामये तद्वितर करुणयेत्यूचिवान् सूरिरीड्यः ॥ ५६ ॥

भो अप्रमेयगुणगणमहोदधे भगवन्! विधिशिवसनकादीनामपि ध्यातुमत्यन्तदूरं त्वां अतिमलिनवचनस्सोऽहं स्तोतुं नैव प्रभवामि सत्यम्; तथापि मदीया रसना त्वदन्यं न कमपि वेदेति हेतुना प्रणतपरतन्त्रो भवानेवागत्या स्तोतव्यतां भजति । वाचिकदोषाणां क्षन्तव्यता ते किमु वक्तव्या । अथ भगवत एवमभिप्रायोऽभूदिव — स्तोत्रमकृत्वाऽवस्थातुं न प्रभवामीति कथयन्नुपसर्पन् भवान् अन्नवसनादिलिप्सामेव ह्यन्ततः प्रकाशयिष्यति; एवंविधा भक्ता भूयांसस्सन्ति नाम लोके; तेष्वन्यतमस्य भवतः अलं स्तवेनेति । तत्राह — * नैवान्नमित्यादि । भगवन् नाहं क्षुद्रफलप्रेप्सुः । यद्यपि प्रकृतिमण्डलेऽस्मिन्निवासपर्यन्तं क्षुद्राणामन्नवस्त्रादीनामप्यपेक्षा काममस्ति नाम; तथाऽप्येतदर्थं भवत्सकाशे प्रार्थनमनावश्यकं भगो! । अयं किङ्कर इति गौरवेण तत्र तत्र ते ते प्रदद्युर्नाम तानि तानि भृशमशनवसनादीनि । अतस्तदपेक्षणमप्रसक्तम् । केवलमनन्यप्रयोजनं कैङ्कर्यमेव कामये । तत्परमकृपया वितरेति प्रार्थयमानो विष्णुचित्तसूरिरस्मदीयस्तुतिगोचरः ॥

५.–२. * नेय्क्कुडत्तै * [நெய்க்குடத்தை]

(स्वात्मनि भगवदधिष्ठानप्रख्यापनेन दुःखरोगादीनां निष्क्रमणचोदनम् ।)

स्वीया भोगीन्द्रशय्या कलशजलनिधिरिसन्धुकन्येत्यमीभिः
साकं वैकुण्ठनाथो मम हृदि निरतस्सूरिभी रक्ष्यमाणः ।
हे पापव्याधिदुःखोच्चय! झटिति सर क्षीणमत्र स्थलं ते
प्राग्वन्नैवाद्य, रक्षाऽभवदिति कथयन् विष्णुचित्तो मदीशः ॥ ५७ ॥

मुनेरस्य विष्णुचित्त इति यन्नाम प्रथते तत् स्वस्यैव समुचितमिति ख्यापयतीव दशकमिदम् । भगवान् वैकुण्ठनाथः स्वकीयामहीन्द्रशय्यां क्षीराब्धिं स्वप्रेयसीमिन्दिरां च अविजहदेव स्थावरजङ्गमरूपसर्वपरिवारसमेतस्सन् शङ्खचक्रगदासिशार्ङ्गवैनतेयादिभिरस्थानरक्षाव्यसनिभिरभिरक्ष्यमाणस्समागत्य स्थावरप्रतिष्ठामवाप ममैव हृदये । इतः पूर्वमत्र सानन्दं स्थितवतां पापव्याधिदुःखराशीनामितः परमत्र क्षणमप्यवस्थातुमवकाशो नैव मनागपि । हे पापव्याधिदुःखबृन्दानि! क्षिप्रमपसरत । युष्माकमिह स्थलं क्षीणमभूत् । मम हृदयस्य स्थितिरधुना पूर्ववन्नैव; अपि तु प्रबलतमं रक्षणं प्राप्य अखिलहेयप्रतिभटमभवन्मम हृदयमिदम् । तस्माद्युष्माकमितस्सरभसं पलायनमेव शरणमिति सानन्दमुदीरयन् विष्णुचित्तो मुनिवरो मम शरण्यः ॥ ५७ ॥

५.–३. * तुक्कच्चुऴलैयै * [துக்கச்சுழலையை]

(श्रीवनाद्रीशसन्निधौ स्वकैङ्कर्याभिनिवेशविज्ञापनम् ।)

स्वामिंस्त्वत्पादपद्मप्रणतिनिरतधीस्सोऽहमन्यत्र दास्यं
ध्यायेयं चेतसा चेदपि च तदिह तेऽवद्यदायि प्रसिध्येत् ।
शर्वब्रह्मेन्द्रमुख्या अपि न भवमयव्याधिवैद्या वनाद्रि-
स्वामिन्! शेषी त्वमेवेत्यभिदधति मुनौ विष्णुचित्ते रतिर्मे ॥ ५८ ॥

अधस्ताच्चतुर्थशतके द्वितीयतृतीयदशकाभ्यां यद्यपि श्रीगन्
तथाऽप्यपर्याप्तामृतं हि स भगवान् दिव्यसूरीणाम्; विशिष्य च
समुज्जृम्भते । अधुनाऽस्य भगवतस्सविधे विलक्षणश्शास्त्रार्थश्च प्रकट
सर्वशेषिन्! श्रीकाननाद्रीशभगवन्! त्वत्पादारविन्दैकप्रवणहृदयोऽहं भवता म
दास्यं कर्तुं मनसाऽपि वा चिन्तयेयं तच्चिन्तनमात्रमपि हि ते महदघं स
शरणागतानां पराभवो नाथ! न तेऽनुरूपः * इति ह्यभियुक्ता अप्याहुः
मदुद्देश्यभूतः परमपुरुषार्थस्तु दुर्लभ एव; विधिशिवेन्द्रमुख्या देवा अपि यतः कति
मदपेक्षितमोक्षदाने भृशमकुशलाः । तस्मात्त्वमेव मे शेषी-कैङ्कर्यप्रतिसंबन्धी, नान्यः
ममैव चित्तमधितिष्ठ्यम् इति प्रार्थितवति विष्णुचित्ते मुनौ मे रतिर्भूयात् ॥

अस्य दशकस्य षष्ठी गाथा जीवातुभूता; तदनुवादश्चेत्थम्; —

नेशानो वृषभध्वजो न च पुनर्वेधा न चेन्द्रो न चाप्यन्यः कोऽपि जनोऽस्य संसृतिमहारोग
स्वामिन् वैद्यमणे मणिप्रभ! पुनर्जन्मापनीयाथ मां त्वत्सद्मैकनिवासिनं कुरु हरे श्रीकाननाद्री

५. –४. * शेन्नियोङ्गु * [செந்நியோங்கு] (स्वकीयब्रह्मानन्दविज्ञापक

स्वस्य स्वात्मीयवर्गस्समस्तमपि भगवद्दिव्यहेत्यङ्कितत्वात्
दग्धाशेषाघतामप्यतिशयितमहाज्ञानतां चाभिधाय ।
दिव्यानन्दामृताब्धिप्रपतितहृदयः स्वप्रबन्धं समाप्तं
चक्रे यो भट्टनाथस्स जयति धरणौ कीर्तिमूर्त्या

अस्मिन्दशके श्रीविष्णुचित्तसूरिः स्वाभिलषितब्रह्मानन्दावाप्तिं कथ
स्वात्मनः स्वात्मीयसमस्तवस्तुजातानां च भगवद्दिव्यहेत्यङ्कितत्वसंपादनेन निर्दग्धाश
सुमहत्तरज्ञानसंपत्तिकत्वञ्च कथयित्वा दिव्यानन्दामृतजलधिनिमग्नहृदयो भूत्वा स्वप्र
श्रीभट्टनाथसूरिर्जगति कीर्तिमूर्त्या नित्यं जयति ॥ ५९ ॥

दिव्यं तस्य प्रबन्धं श्रुतिशतशिखरोदञ्चदर्थौघगर्भं
द्राविड्या दिव्यवाचा स्थितममरवचोऽभिज्ञभक्तानुभूत्यै ।
काञ्चीस्थोऽण्णङ्गरार्यो विबुधपरिषदि ख्यातभूमा कवीन्द्रो
दैव्या वाण्या न्यवध्नात् कृतिरिह जयतात्सेयमाचन्द्रसूर्यम् ॥

इति श्रीकाञ्ची-प्रतिवादिभयङ्कर-अण्णङ्गराचार्यकृतिषु

श्रीभट्टनाथसूरिसूक्तसर्वस्वं सटीकं

समाप्तम् ॥

श्रीरस्तु ।

भो अप्रमेयगुणगणमहोदधे श्रीशासनप्रबन्धे भट्टनाथसूक्तप्रबन्धे च
स्सोऽहं स्तोतुं नैव प्रभवामि सत्य कीर्तितानां भगवच्चरितानां सूची
भवानेवागत्या स्तोतव्यतां भज
मभिप्रायोऽभूदिव — स्तो ाह-नृसिंह-वामन-त्रिविक्रम-परशुराम-दाशरथि-बलभद्र-नन्दनन्दन-कल्किसमाख्या
ह्यन्ततः प्रकाशयिष्यति ॥
तत्राह — नैवाम्न
क्षुद्राणामन्नवस्त्रादीनाम ृतमथनम्, अमरेभ्योऽमृतप्रदानम्, दैत्यगुरोश्चक्षुषः पवित्रदर्भाग्रेण व्याकुलीकरणम्,
अयं किङ्कर इति गौदारविन्दाद्गङ्गाप्रवाहप्रजननम्;
केवलमनन्यप्रयो

[रामावतारे]

–ञ्जनम्, मिथिलायां रौद्रधनुर्भञ्जनम्, मल्लिकास्रजा वैदेहीकृतं श्रीरामचन्द्रबन्धनम्, श्रीराम-
गुहेन सख्यम्, भरताय पादुकाराज्यप्रदानम्, आसुरप्रकृतेः काकस्य एकचक्षुर्हरणम्,
म्, जनस्थानस्थितराक्षसौघनिर्मूलनम्, मारीचमायामृगानुसरणेन देवीवियोगः, सुग्रीव-
सप्तसालभ ा वैदेह्यै मारुतिना कृतमङ्गुलीयकप्रदानम्, समुद्रराजभीषणम्, सेतुबन्धनम्,
साकं वैकुण्ठेन

हे पापव्याधिदुः

[कृष्णावतारे]

प्राग्वन्नैवा गवदनान्तस्सप्तलोकीदर्शनम्, पूतनामारणम्, शकटदैत्यभञ्जनम्, दामबन्धानु-
लयमर्दनम्, बकासुरवदनविदारणम्, तुरगरूपकेशिविध्वंसनम्, अरिष्टासुरवधः,
मुनेरस्य विष्णुचि ध्वंसनम्, धेनुकासुरमर्दनम्, कुन्दानोकहभञ्जनम्, सहस्राक्षसमाराधनप्रतिरोधनपूर्वक-
वैकुण्ठनाथः स्वकीय वृन्दस्य स्वयमशनम्, गोवर्धनोद्धरणेन गोगोपगोपीजनाभिरक्षणम्, प्रलम्बासुरवधः, गोपीभिस्सह
स्सन् शङ्ख ... ण्डतम्, नीलादेवीपरिणयार्थमृषभसप्तकौद्धत्यमर्दनम्, घटप्रणर्तनम्, गोपीवस्त्रापहरणम्, मालिक-
ह ... शिरःकृन्तनम्, कुब्जाया अनुलेपनदायिन्या अनुग्रहणम्, कुवलयापीडनामककंसगजाभिहननम्, मल्लमारणमेव
कंसधनुर्भञ्जनम्, कंसहननम्, रुक्मिणीसोदरावमाननम्, विरोधिवर्गनिरसनपूर्वकं रुक्मिणीस्वीकरणम्,
नरकासुरनाशनम्, मुरासुरमारणम्, षोडशस्त्रीसहस्रपरिग्रहणम्, पारिजातापहरणम्, बाणासुरबाहुवनच्छेदनम्,
धार्तराष्ट्रसकाशे दूत्यम्, अर्जुनसारथ्यम्, अर्जुनरथाश्वपिपासाप्रशमनम्, वैदिकपुत्रानयनम्, सान्दीपनिपुत्र-
संजीवनम्, अभिमन्युपुत्रसमुज्जीवनम्, चक्रेण सूर्यापिधानम्, जयद्रथमारणम्, दुर्योधनादिप्रणाशनम्,
रैवतकगिरौ नारदमुनिनाऽभिष्टुतत्वम्,

ग्राहग्रस्तगजेन्द्रत्राणम्, शम्भुशापविमोचनम्, मधुकैटभहननम्, प्रलये सप्तलोकीनिगिरणम्, वटदले
बालरूपेण शयनम् ॥ इति ॥

॥ इति भगवत्कथानुसन्धानसूची समाप्ता ॥

गीताञ्जलि प्रेस्, पुदुकोट्टै

भो अप्रमेयगुणगण

स्सोऽहं स्तोतुं नैव प्रभवामि

भवानेवागत्या स्तोतव्यतां

मभिप्रायोऽभूदिव —

हन्ततः प्रकाशयिष्य

तत्राह — * नैव

क्षुद्राणामम्नवर

अयं कि

केव